वृहती cfr. वृहती
वृहन्नल 4, 299
वोधि 2, 240
व्रह्मण्य 3, 494
व्रह्मन् 2, 271
व्रह्मवन्धु 4, 154
व्राह्मण 3, 215–16
व्राह्मी 2, 321

भ.

भ, भा 1, 9
भक्त 2, 179
भक्ति 2, 179
भग 2, 36
भङ्ग, ०ङ्गा 2, 37
भङ्गि 2, 37
भङ्गुर 3, 577
भट 2, 93

भट्टारक 4, 25
भट्टिनी 3, 388
भण्डन 3, 387
भद्र, °द्रा 2, 431–33
भद्रकाली 4, 293
भन्द 2, 227
भय 2, 363
भयानक 4, 25
भर 2, 433
भरण, °णी 3, 207
भरत 3, 273–74
भरद्वाज 4, 55
भरु 2, 434
भर्तृ 2, 179
भर्मन् 2, 272
भल्ल, °ल्ली 2, 492
भव 2, 521
भवन 3, 387
भव्य, °व्या 2, 363-64
भसद् 2, 227
भस्मक 3, 68
भस्मतूल 4, 293
भा 1,9
भाग 2, 33
भागधेय 4, 228
भाग्य 2, 364
भाण्ड 2, 123
भात्कूट 3, 156
भानु 2, 272
भार 2, 434
भारत, °ती 3, 274–75
भारद्वाज, °जी 4, 56
भार्गव, °वी 3, 701
भार्याटिक 4, 26
भार्योरु 3, 578
भाल 2, 492
भालाङ्क 3, 69–70
भाव 2, 521–23
भावना 3, 388
भावाट 3, 156
भावित 3, 275
भास् 1, 16
भास 2, 572
भासन्त 3, 275
भास्कर 3, 578
भास्वत् 2, 180
भिक्षा 2, 554
भित्ति 2, 180
भिन्न 2, 273
भीम 2, 323
भीरु 2, 434
भीषण 3, 208
भीष्म 2, 323
भुज 2, 72
भुजंग 3, 118
भुजिष्य, °ष्या 3, 490
भुवन 3, 388
भू 1, 9
भूक 2, 13
भूकेश 3, 718
भूजम्बू 5, 441
भूत 2, 180
भूतवृक्ष 4, 321
भूतात्मन् 3, 389
भूति 2, 181
भूतीक 3, 70
भूभृत् 2, 181
भूमि 1, 9
भूमिका 3, 71
भूमिज, °जा 3, 137
भूरि 2, 435
भूस्पृश् 2, 539

भृगु 2, 39
भृङ्ग 2, 38
भृङ्गराज 4, 56
भृङ्गार, ॰री 3, 579
भृति 2, 182
भृशम् 7, 41
भृष्टि 2, 93
भेक 2, 13
भेद 2, 227
भेरुण्ड, ॰ण्डा 3, 173
भेल 2, 493
भैरव 3, 702
भोग 2, 39
भोगवती 4, 125
भोगिन् 2, 273
भौम 2, 324
भ्रम 2, 322
भ्रमणी 3, 207
भ्रमरक 4, 24
भ्रातृव्य 3, 489
भ्रान्ति 2, 180
भ्रामक 3, 69
भ्रामर 3, 578
भ्रूण 2, 148

म.

म, मा 1, 10
मकर 3, 580
मकुर 3, 589-90
मकुट 3, 166
मङ्क्षु 7, 49
मङ्गल, ॰ला 3, 669-70
मङ्गल्य, ॰ल्या 3, 491-93
मञ्जरी 3, 587
मञ्जुल 3, 669
मणि 2, 148
मणिच्छिद्रा 4, 276
मणिमाला 4, 296
मण्ड, ॰ण्डा 2, 124
मण्डन 3, 390
मण्डल 3, 668
मण्डूक, ॰की 3, 73
मण्डूकपर्ण, ॰र्णी 5, 15-16
मत 2, 182
मति 2, 183
मत्कुण 3, 208
मत्तवारण 5, 14
मत्सर, ॰रा 3, 579-80
माथित 3, 276
मद, ॰दी 2, 228
मदकल 4, 294
मदन 3, 389
मधु 2, 240
मधुक 3, 72
मधुर, ॰रा 3, 581-82
मधुरसा 4, 332
मधुसूदन 5, 30
मध्य 2, 365
मध्यम, ॰मा 3, 463-64
मनाक् 7, 18
मन्त्र 2, 435
मन्थ 2, 216
मन्थर 3, 583-84
मन्द् 2, 229
मन्द्र 3, 580
मन्दार, 3, 584
मन्दिर 3, 583
मन्मथ 3, 311
मन्यु 2, 365
मय 2, 365
मयु 2, 365
मयूख 3, 104

मयूर 3, 586
मयूरक 4, 27
मरीचि 3, 130
मरु 2, 435
मरुत् 2, 183
मरुवक 4, 26
मर्कट, ०टी 3, 157
मर्जू 2, 72
मर्मर, ०री 3, 585-86
मर्यादा 3, 329
मल 2, 493-94
मलय, ०या 3, 490-91
मलिन, ०नी 3, 389-90
मलिनमुख 5, 8
मलिम्लुच 4, 52
मलीमस 4, 331
मल्ल 2, 493
मल्लनाग 4, 50
मल्लिक, ०का 3, 73-74
मशक 3, 72
मसुर, ०रा } 3, 584-85
मसूर, ०रा }
मसृण, ०णा 3, 209
मह, ०ही 2, 587
महत् 2, 183
महस् 2, 572
महाकाल 4, 294
महाघोष, ०षा 4, 322
महाधन 4, 186
महानाद 4, 144
महानील 4, 295
महापद्म 4, 218
महाबल, ०ला 4, 295-96
महामात्र 4, 276
महामुनि 4, 186
महामूल्य 4, 229
महारजन 5, 30
महारस 4, 331
महार्घ 3, 126
महालय 4, 228
महावीर 4, 275
महाशङ्ख 4, 44
महासेन 4, 186
महिला 3, 670
महिषी 3, 734
मही 2, 587
महेन्द्र 3, 587
महोदय 4, 229
महौषध 4, 153
मा 1, 10
माकन्द, ०न्दी 3, 329
मागध, ०धी 3, 339-40
माचल 3, 671
माठर 3, 587
माढि 2, 128
माणवक 4, 27
मातङ्ग 3, 119
मातुल 3, 670
मातुलपुत्रक 6, 1
मातुलानी 4, 187
मातृ 2, 183
मातृका 3, 74
मात्र, ०त्रा 2, 436-37
माधव, ०वी 3, 702-3
मान 2, 274
मानस 3, 747
माय, ०या 2, 366
मार, ०री 2, 436
मारण्ड 3, 174
मारिष, ०षा 3, 735
मारीच 3, 130
मार्ग 2, 40

मार्गण 3, 210
मार्जन, ०ना 3, 390-91
मार्जार 3, 588
मार्जालीय 4, 230
मार्तण्ड 3, 174
माल, ०ला 2, 494
मालती 3, 276
मालिका 3, 74-75
मालिनी 3, 391
मालु 2, 495
मालुधान, ०नी 4, 187
माल्य 2, 366
माष 2, 555
मास् 1, 16
मिति 2, 184
मित्र 2, 437
मिथस् 7, 51
मिथुन 3, 392
मिद्ध 2, 241
मिष 2, 555
मिसि 2, 572
मिह्रिर 3, 588
मीन 2, 274
मीनाम्रीण 4, 86
मुकुन्द 3, 330
मुकुर 3, 589-90
मुक्ता 2, 184
मुक्ताफल 4, 297
मुक्ति 2, 184
मुख 2, 24
मुग्ध 2, 242
मुचुकुन्द 4, 144
मुण्ड 2, 124
मुण्डन 3, 392
मुदिर 3, 589
मुद्गर 3, 588
मुनिभेषज 5, 12
मुर्मुर 3, 590
मुषित 3, 277
मुष्क 2, 13
मुसल, ०ली 3, 671-72
मुहिर 3, 589
मूक 2, 14
मूढ 2, 128
मूर्छित 3, 277
मूर्ति 2, 185
मूर्धाभिषिक्त 5, 20
मूल 2, 495
मूल्य 2, 367
मृग, ०गी 2, 41
मृगयु 3, 493
मृगाक्षी 3, 735
मृत 2, 185
मृत्युफल, ०ली 4, 297
मृत्युवञ्चन 5, 30
मृत्सा 2, 573
मृत्स्ना 2, 274
मृदङ्ग 3, 119
मृदु 2, 230
मृष्टेरुक 4, 28
मेखला 3, 672
मेघ 2, 52
मेघनाद 4, 145
मेघपुष्प 4, 211
मेचक 3, 75
मेध, ०धा 2, 242
मेनाद 3, 330
मेला 2, 495
मेष 2, 555
मेहन 3, 392
मैथुन 3, 393
मोक्ष 2, 556

मोघ, ०घा 2, 53
मोच, ०चा 2, 57
मोचक 3, 76
मोचाट 3, 158
मोण 2, 149
मोदक 3, 76
मोरट, ०टा 3, 157-58
मोह 2, 587
मौलि 2, 496
म्लिष्ट 2, 94
म्लेच्छ 2. 63

य.

यक्ष 2, 556
यज्ञ 2, 77
यतस् 7, 49
यति 2, 186
यथा 7, 29
यद्वत् 7, 25
यन्तृ 2, 185
यन्त्रण 3, 210
यम 2, 324
यमक 3, 76
यमन 3, 393
ययु 2, 367
यवफल 4, 298
यष्टि 2, 94
याजक 3, 77
यातयाम 4, 219
यात्रा 2, 438
यादसांपति 5, 21
यान 2, 275
यापन 3, 393
याम 2, 325
याम्या 2, 367
यावत् 7, 23
युक्ति 2, 186
युग 2, 42
युत 2, 186
युतक 3, 77
यूथ, ०थी 2, 216-17
योग 2, 42-44
योग्य, ०ग्या 2, 367-68
योजन 3, 394
योजनगन्धा 5, 22
योनि 2, 275
यौवनलक्षण 6, 4

र.

र 1, 11
रक्त 2, 186
रक्तप, ०पा 3, 437
रक्तपाद 4, 141
रक्तरेणु 4, 87
रक्ताक्ष 3, 736
रक्ताङ्ग, ०ङ्गा 3, 119-20
रक्षा 2, 556
रङ्कु 2, 14
रङ्ग 2, 44
रङ्गमातृ 4, 125
रजक 3, 78
रजत 3, 277-78
रजनी 3, 395-96
रजस् 2, 575
रञ्जन, ०नी 3, 395
रण 2, 149
रण्डा 2, 125
रतनारीच 5, 11
रतर्द्धिक 4, 28
रति 2, 187
रत्न 2, 275
रथ 2, 217

रथकार 4, 277
रथाङ्ग 3, 120
रथ्य, ०थ्या 2, 369
रद 2, 230
रन्ध्र 2, 411
रभस 3, 747
रम, ०मा 2, 325
रमण 3, 210–11
रम्भ, ०म्भा 2, 306
रम्य, ०म्या 2, 368–69
रश्मि 2, 326
रस, ०सा 2, 573–74
रसन 3, 394
रसायन 4, 188
रसाल, ०ला 3, 673
रसिका 3, 78
रसित 3, 278
रहस् 2, 575
रहस्य, ०स्या 3, 493
राका 2, 14
राक्षसी 3, 748
राग 2, 44
रागचूर्ण 4, 87
रागसूत्र 4, 277
रागिन् 2, 276
राघव 3, 703
राजजम्बू 4, 213
राजन् 2, 275
राजराज 4, 57
राजवृक्ष 4, 322
राजहंस 4, 332
राजादन 4, 189
राजिका 3, 80
राजी 2, 73
राजीव 3, 703–4
राढा 2, 129
रात्रक 3, 79
राध, ०धा 2, 242
राधन 3, 396
राधरङ्कु 4, 29
राम, ०मा 2, 326–27
रामिल 3, 674
राशि 2, 539
राष्ट्र 2, 438
रास 2, 575
रासेरस 4, 333
रास्ना 2, 276
रिष्ट 2, 95
रीति 2, 187
रुक्म 2, 327
रुच् 1, 7
रुचक 3, 80
रुचि 2, 57
रुजा 2, 73
रुदथ 3, 311
रुधिर 3, 591
रुमा 2, 327
रुरु 2, 438
रूक्ष 2, 557
रूप 2, 293
रूपक 3, 81
रूप्य 2, 370
रेक 2, 15
रेखा 2, 24
रेचनी 3, 396
रेणु 2, 150
रेणुका 3, 81
रेत्र 2, 438
रेप 2, 294
रेफ 2, 297
रेरिहाण 4, 88
रेवती 3, 279

रेवा 2, 523
रै 1, 11
रैवत 3, 279
रोक 2, 15
रोचन, °ना 3, 397
रोदन 3, 397
रोदस्, °सी 3, 748
रोध्र 2, 439
रोप 2, 294
रोमहर्षण 5, 16
रोषाण 3, 211
रोहिणी 3, 212
रोहित 3, 280
रोहिताश्व 4, 308
रोहिन् 2, 277
रौद्र, °द्री 2, 439
रौरव 3, 704
रौहिणेय 4, 230
रौहिष 3, 736

ल.

लक्ष 2, 557
लक्षण 3, 213
लक्ष्मण, °णा 3, 213–14
लक्ष्मन् 2, 277
लक्ष्मी 2, 328
लक्ष्मीपति 4, 125
लक्ष्मीपुत्र 4, 278
लग्न 2, 277
लघिष्ठ 3, 166
लघु 2, 53
लघ्वी 2, 524
लङ्का 2, 16
लङ्ग 2, 45
लङ्घन 3, 398
लञ्ज 2, 73
लट्वा 2, 524
लता 2, 188
लभ्य 2, 371
लम्पाक 3, 82
लम्बकर्ण 4, 88
लम्बोदर 4, 278
लय 2, 370
ललना 3, 399
ललाम, °मन् 3, 398
ललित 3, 280
लव 2, 523–24
लवण, °णा 3, 212–13
लाङ्गल, °ली 3, 674–75
लाङ्गलिन् 3, 400
लाङ्गूल 3, 674
लाज 2, 73
लाञ्छन 3, 399
लाट 2, 95
लालस 3, 748
लालाटिक 4, 29
लासक 3, 82
लिङ्ग 2, 45
लिप्त 2, 189
लीला 2, 496
लुब्ध 2, 243
लूता 2, 189
लूतामर्कटक 6, 2
लूनक 3, 82
लेख, °खा 2, 25
लेखन 3, 400
लेखीलक 4, 30
लेप 2, 294
लोक 2, 16
लोचक 3, 82–83
लोमश, °शा 3, 719–20
लोल, °ला 2, 497
लोह 2, 588

लोह्ल 3, 675
लोहित 3, 281–82
लोहित्य 3, 494

व.

व 1, 14
वंश 2, 541
वक्तव्य 3, 495
वक्त्र 2, 441
वक्र 2, 441
वक्रनक्र 4, 279
वङ्ग 2, 46
वच, ०चा 2, 58
वज्र, ०ज्रा 2, 442
वञ्चक 3, 84
वञ्चथ 3, 311
वञ्जुल 3, 675
वट 2, 95
वडवा 3, 705
वणिज् 2, 74
वण्ठ 2, 106
वण्ठाल 3, 676
वतंस 3, 741
वतण्डा 3, 175
वत्स 2, 576
वदान्य 3, 495
वध 2, 243
वधू 2, 244
वन 2, 278
वनज, ०जा 3, 139
वनश्वन् 3, 404
वनस्पति 4, 126
वनित, ०ता 3, 282–83
वपन 3, 403
वपा 2, 295
वपुस् 2, 578
वप्र 2, 441
वमथु 3, 313
वमन 3, 402
वमि 2, 328
वयस् 2, 576
वयःस्थ, ०स्था 3, 312–13
वर, ०री 2, 439–40
वरचन्दन 5, 31
वरवर्णिनी 5, 31
वरटा 3, 159–60
वरण 3, 214–15
वरण्ड 3, 174
वरण्डक 4, 32
वरत्रा 3, 592
वरद, ०दा 3, 330–31
वराक 3, 84
वराङ्ग 3, 120
वराटक 4, 31
वरारोह, ०हा 4, 343
वराह 3, 763
वरिष्ठ 3, 166–67
वरीयस् 3, 749
वरुण 3, 214
वरूथ 3, 312
वर्चस् 2, 576–77
वर्जन 3, 402
वर्ण 2, 150–51
वर्णक 3, 85
वर्णविलोडक 6, 2
वर्णाट 3, 159
वर्णिन् 2, 279
वर्तक 3, 84
वर्तनी 3, 403
वर्तरूक 4, 31
वर्ति 2, 190
वर्त्मन् 2, 279
वर्धन, ०नी 3, 403

वर्धमान 4, 189
वर्धित 3, 282
वर्ध्र 2, 442
वर्ष 2, 557–58
वर्षाभू 3, 449
वर्म्मन् 2, 278
वलज, ०जा 3, 138
वलय 3, 496
वलि 2, 489–90
वल्क 2, 16
वल्गु 2, 47
वल्मीक 3, 85
वल्लभ 3, 449
वल्लर 3, 591
वल्लव 3, 704
वल्ली 2, 497
वल्लूर 3, 592
वश, ०शा 2, 540
वसति 3, 283
वसन 3, 402
वसन्तदूत, ०ती 5, 21
वसु 2, 577
वसुक 3, 85
वस्न 2, 278
वस्त्रोकसारा 5, 42
वह 2, 588
वा 7, 14
वागर 3, 593
वाग्मिन् 2, 281
वाच् 1, 7
वाच्य 3, 495
वाज 2, 75
वाजिन् 2, 281
वाट, ०टी 2, 96
वाडव 3, 705–6
वाणि 2, 151
वाणिनी 3, 405
वातकेलि 4, 299
वातखुडा 4, 72
वातरायण 5, 17
वातरूष 4, 323
वातूल 3, 676
वान 2, 280
वानप्रस्थ 4, 135
वापित 3, 284
वाम, ०मा, ०मी 2, 328–29
वामन 3, 404
वामिल 3, 677
वायस, ०सी 3, 749–50
वायुफल 4, 298
वार 2, 443–44
वारण 3, 215
वारबाण 4, 88
वाराही 3, 763
वारि 2, 444
वारुणी 3, 216
वारुण्ड 3, 175
वारूढ 3, 179
वार्त्त, ०र्त्ता 2, 191
वार्दर 3, 594
वार्द्धक 3, 88
वार्षिक 3, 87
वालिका 3, 68
वाली 2, 491
वालुक, ०का 3, 88–89
वालेय 3, 496
वाल्हिक, ०ल्हीक 3, 87–88
वास, ०सा 2, 578
वासन्त, ०न्ती 3, 285–86
वासर 3, 594
वासित, ०ता 3, 286–87
वासुरा 3, 595

वाम्नु 2, 192
वाह,°हा 2, 588-89
वाहस 3, 750
वाहिनी 3, 405
वि 7, 15
विकट 3, 160
विकार 3, 596
विकाश 3, 721
विकृत 3, 289
विकृति 3, 292
विक्रम 3, 465
विक्लिन्न 3, 407
विगत 3, 288
विगूढ 3, 180
विग्रह 3, 764
विघ्नकारिन् 4, 193
विचकिल 4, 299
विच्छित्ति 3, 293
विच्छिन्न 3, 408
विजय, °या 3, 496-97
विजात, °ता 3, 292
विज्ञान 3, 407
विट 2, 96
विटप 3, 438
विडङ्ग 3, 121
वितण्डा 3, 176
वितर्क 3, 89
वितान 3, 406
वितुन्नक 4, 33
वित्त 2, 193
वित्ति 2, 193
विदथ 3, 314
विदा 2, 230
विदार, °री 3, 597
विदारण 4, 89
विदित 3, 287
विदुर 3, 596
विदूषक 4, 33
विदेह 3, 764
विद्ध 2, 245
विद्रव 3, 706
विद्रुम 3, 466
विद्वंस् 2, 579
विधा 2, 245
विधातृ 3, 294
विधान 3, 409
विधि 2, 245
विधु 2, 246
विधुत 3, 289
विधुर, °रा 3, 598
विनत, °ता 3, 290-91
विनय, °या 3, 498
विनायक 4, 32
विनिपात 4, 127
विनीत 3, 289-90
विनेतृ 3, 294
विन्दु 2, 230
विन्ध्य, °न्ध्या 2, 371
विन्न 2, 281
विपणि 3, 217
विपत्ति 3, 293
विपन्न 2, 410
विपाक 3, 89
विपाश, °शा 3, 721
विपुल, °ला 3, 677
विप्रतिसार 5, 43
विप्रलाप 4, 211
विबुध 3, 340
विभव 3, 707
विभाकर 4, 280
विभाव 3, 706
विभावसु 4, 334

विभु 2, 306
विभ्रम 3, 466
विमल 3, 677
विमान 3, 409
विरूढ 3, 180
विरोचन 4, 190
विलग्न 3, 407
विलास 3, 751
विलासिन् 3, 411
विलीन 3, 407
विलेपनी 4, 194
विलोम, ०मी 3, 464–65
विवध 3, 341
विवर 2, 411
विवर्त 3, 292
विवश 3, 720
विवस्वत् 3, 287
विविक्त 3, 288
विवेक 3, 90
विश् 1, 15
विशद 3, 331
विशल्या 3, 499
विशाख, ०खा 3, 105
विशारद 4, 145
विशालाक्ष 4, 323
विशिख, ०खा 3, 104
विशेषक 4, 34
विश्रब्ध cfr. 3, 341
विश्रम्भ cfr. 3, 451
विश्राणन 4, 192
विश्रुत 3, 287
विश्लेष 3, 737
विश्व, ०श्वा 2, 525
विश्वकद्रु 4, 280
विश्वकर्मन् 4, 193
विश्वप्सन् 3, 410
विश्वंभर, ०रा 4, 279–80
विश्वस्त, ०स्ता 3, 291
विश्वावसु 4, 333
विष, ०षा 2, 558
विषघ्न, ०घ्ना 3, 408
विषय 3, 497–98
विषयिन् 3, 411
विषाण, ०णी 3, 216–17
विष्कम्भ 3, 450
विष्टर 3, 595
विष्टि 2, 98
विष्णुपद, ०दी 4, 145–46
विष्वक्सेन, ०ना 4, 191–92
विष्वक्सेनाप्रिया 6, 5
विसर 3, 598
विसर्ग 3, 121
विस्तार 3, 595
विस्मय 3, 498
विस्मापन 4, 191
विस्रब्ध 3, 341
विस्रम्भ 3, 451
विहनन 4, 192
विहस्त 3, 291
विहायस् 3, 751
विहार 3, 596
विहेठन 4, 190–91
वीक्ष्य 2, 372
वीड्डा 2, 25
वीची 2, 58
वीणा 2, 152
वीत 2, 193
वीति 2, 194
वीतिहोत्र 4, 282
वीथी 2, 218
वीर, ०रा 2, 446–47
वीरतर 4, 281–82

वीरभद्र 4, 281
वीरवृक्ष 4, 324
वीरुध् 2, 246
वीर्य 2, 371
वीवध 3, 341
वृकधूप 4, 212
वृक्षादन, ०नी 4, 194-95
वृजिन 3, 413
वृति 2, 196
वृत्त 2, 194
वृत्तान्त 3, 294
वृत्ति 2, 195
वृत्र 2, 448
वृथा 7, 29
वृद्ध 2, 247
वृद्धि 2, 247
वृन्त 2, 195
वृन्दारक 4, 34
वृश्चिक 3, 91
वृष, ०षा, ०षी 2, 558-60
वृषन् 2, 281
वृषपर्वन् 4, 195
वृषभ 3, 451
वृषल 3, 678
वृषाकपायी 5, 38
वृषाकपि 4, 212
वृषाङ्क 3, 90
वृष्णि 2, 152
वृहतिका 4, 35
वृहती 3, 295
वृहन्नल 4, 299
वेकट 3, 160
वेग 2, 47
वेणी 2, 152
वेणु 2, 153
वेदना 3, 414
वेदि 2, 231
वेधस् 2, 579
वेर 2, 448
वेरट 3, 160-61
वेला 2, 498
वेल्लित 3, 295
वेश 2, 541
वेश्य, ०श्या 2, 372-73
वेष्टन 3, 413
वेष्टित 3, 296
वै 7, 15
वैकुण्ठ 3, 167
वैजयन्त, ०न्ती 4, 127-28
वैजिक 3, 91
वैतरणी 4, 89
वैतालिक 4, 35
वैदेहक 4, 36
वैदेही 3, 765
वैनाशिक 4, 36
वैरोचन 4, 196
वैशाख 3, 105
वोढृ 2, 129
व्यक्त 2, 191
व्यग्र 2, 443
व्यङ्ग 2, 47
व्यञ्जन 3, 401-2
व्यतिकर 4, 279
व्यतीपात 4, 126
व्यलीक 3, 86
व्यवहार 4, 278
व्यवहारिका 5, 6
व्यवाय 3, 494
व्यसन 3, 400-401
व्याघात 3, 284
व्याघ्र, ०घ्री 2, 445
व्याघ्रनख 4, 45

व्याज 2, 76
व्याड 2, 125
व्याध 2, 244
व्याप्ति 2, 192
व्यायत 3, 285
व्यायाम 3, 464
व्याल 2, 498
व्यास 2, 578
व्युत्थान 3, 412
व्युष्ट 2, 97
व्युष्टि 2, 97
व्यूढ 2, 129
व्यूह 2, 589
व्रज 2, 74
व्रतति 3, 284
व्रह्मण्य 3, 494
व्राह्मण 3, 215–16
व्रीहिराजिक 5, 6

श.

शंसा 2, 579
शक 2, 17
शकल 3, 678
शकुन 3, 415
शकुनि 3, 416
शकुन्त 3, 296
शकुलादनी 5, 32
शक्ति 2, 196
शक्र 2, 449
शक्करी 3, 601–2
शङ्का 2, 17
शङ्कु 2, 17
शङ्ख 2, 26
शङ्खक 3, 92
शची 2, 59
शठ 2, 107
शण्ढ 2, 129
शतघ्नी 3, 416
शतपत्त्र 4, 282–83
शतपर्विका 5, 7
शतह्रदा 4, 105
शतानीक 4, 37
शद्रि 2, 450
शपथ 3, 314
शफ 2, 297
शबर 3, 599
शब्द 2, 231
शम् 7, 15
शमथ 3, 314
शमन 3, 414
शमी 2, 330
शम्पाक 2, 92
शम्ब 2, 301
शम्बर, ०री 3, 599–600
शम्बल 3, 678
शम्बूक 3, 93
शंभु 2, 307
शयथ 3, 315
शयन 3, 414
शयालु 3, 679
शय्या 2, 374
शर 2, 448–49
शरण 3, 218
शरद् 2, 232
शरवाणि 4, 90
शरु 2, 450
शर्करा 3, 600–601
शर्वरी 3, 601
शलाका 3, 93–94
शल्क 2, 16
शल्य 2, 373
शल्लकी 3, 94
शश 2, 541–42

शशिलेखा 4, 45
शश्वत् 7, 25
शष्प 2, 295
शस्त 2, 197
शस्त्र, ०स्त्री 2, 449-50
शाक 2, 18
शाक्कर 3, 603
शाखा 2, 26
शाखिन् 2, 282
शाण 2, 153
शाण्डिल्य 3, 500
शात 2, 198
शातकुम्भ 4, 214
शात्रव 3, 707
शाद 2, 232
शान्त 2, 197
शान्ति 2, 197
शाप 2, 296
शाबर, ०री 3, 602-3
शार 2, 450
शारद, ०दा 3, 331-32
शारि 2, 451
शारीर 3, 602
शार्कक 3, 94
शार्ङ्ग 2, 48
शार्दूल 3, 679
शार्वर 3, 602
शाल 2, 499
शालङ्कायन 5, 33
शाला 2, 499-500
शालार 3, 603
शालावृक 4, 37
शालि 2, 500
शालु 2, 500
शालेय 3, 500
शाल्मलि 3, 680
शासन 3, 417
शास्तृ 2, 197
शास्त्र 2, 451
शिखण्ड 3, 176
शिखण्डिन् 3, 418
शिखर 3, 604
शिखरिणी 4, 90
शिखरिन् 3, 417
शिखा 2, 27
शिखिन् 2, 282
शिग्रु 2, 452
शित 2, 198
शिति 2, 198
शिपिविष्ट 4, 65
शिफा 2, 298
शिरस् 2, 579
शिल, ०ला, ०ली 2, 501
शिलाटक 4, 37
शिलिन्ध्र, ०न्ध्री 3, 605-6
शिलीमुख 4, 46
शिव, ०वा 2, 525-27
शिवि 2, 527
शिशिर 3, 605
शिशुक 3, 95
शिष्प 2, 296
शीकर 3, 606-7
शीघ्र 2, 452
शीत 2, 199
शीतक 3, 95
शीतचम्पक 5, 7
शीतमयूख 5, 9
शीतल 3, 680
शीन 2, 283
शीर्षण्य 3, 501
शील 2, 501
शुक 2, 18

शुक्त 2, 199
शुक्ति 2, 200
शुक्र 2, 452
शुक्ल 2, 502
शुङ्गी 2, 48
शुचि 2, 59
शुण्ड, ०ण्डा 2, 125–26
शुद्ध 2, 248
शुद्धान्त 3, 297
शुभ 2, 307
शुभ्र 2, 453
शुल्क 2, 19
शुल्व 2, 527
शुश्रूषा 3, 737
शुषि 2, 560
शुषिर 3, 607
शुष्म 2, 332
शूक,०का 2, 20
शूकक 3, 95
शून्य,०न्या 2, 374
शूर 2, 453
शूल, ०ला 2, 502
शृगाल, ०ली 3, 681
शृगालजम्बू 5, 35
शृङ्खल 3, 682
शृङ्ग, ०ङ्गी 2, 48–49
शृङ्गाटक 4, 38
शृङ्गार 3, 607–8
शृङ्गारिन् 3, 418
शेष, ०षा 2, 560–61
शैल 2, 503
शैलाट 3, 161
शैलूष 3, 738
शैलेय 3, 501–2
शोण 2, 154
शोभन 3, 419
शोष 2, 561
शौक 2, 21
शौण्ड, ०ण्डी 2, 126
शौर्य 2, 374
शौष्कल 3, 682
श्याम,०मा 2, 330–31
श्यामल 3, 679
श्येन 2, 283
श्रद्धा 2, 248
श्रमण 3, 217
श्रवण 3, 218
श्राद्ध 2, 248
श्राम 2, 332
श्री 1, 12
श्रीकण्ठ 3, 167
श्रीपति 3, 296
श्रीपर्ण, ०र्णी 3, 219
श्रीमत् 2, 198
श्रीवास 3, 751
श्रुत 2, 201
श्रुति 2, 201
श्रुतिकट 4, 66
श्रेणि 2, 153
श्रेयस् 2, 580
श्रेयसी 3, 752
श्रेष्ठ 2, 107
श्लाघा 2, 54
श्लेष्मघना 4, 197
श्लेष्मघ्ना 3, 419
श्लोक 2, 20
श्वशुर्य 3, 500
श्वःश्रेयस 4, 334
श्वसन 3, 415
श्वेत, ०ता 2, 202
श्वेतधामन् 4, 196
श्वेतवाहन 5, 33

ष.

षड 2, 127
षड्ग्रन्थ, °न्था 3, 315
षण्ड 2, 127
षण्डाली 3, 683
षण्ढ 2, 129
षष्ठ, °ष्ठी 2, 107

स.

संयमन, °नी 4, 199
संरूढ 3, 181
संरोध 3, 342
संवदन 4, 201
संवर्त 3, 298
संवाहन 4, 201
संवित्ति 3, 302
संविद् 2, 232
संवेश 3, 722
संव्यान 3, 422
संसरण 4, 91
संसिद्धि 3, 343
संसृष्ट 3, 162
संस्कार 3, 610
संस्कृत 3, 298
संस्तर 3, 608
संस्त्याय 3, 503
संस्था 2, 218
संस्थान 3, 423
संहत 3, 298
संहर्ष 3, 738
संहिता 3, 299
सकटाक्ष 4, 324
सकृत् 7, 25
सकृत्प्रज 4, 57
सखि 2, 28
संकार, °री 3, 610-11
संकाश 3, 722
संकीर्ण 3, 219
संकुल 3, 683
संख्य, °ख्या 2, 376
संख्यावत् 3, 297
संगति 3, 301
संगर 3, 609
संग्रह 3, 765
संघाटिका 4, 38
संघात 3, 299
सचिव 3, 708
सज्ज 2, 76
सज्जन, °ना 3, 423-24
सञ्ज 2, 76
संज्ञा 2, 77
सटा 2, 98
सत् 1, 9
सती 2, 202
सत्तम 3, 466
सत्त्र 2, 454
सत्त्व 2, 528
सत्य 2, 375
सदन 3, 420
सदागति 4, 130
सदादान 4, 199
सदाफल 4, 300
सदृश 3, 722
सदेश 3, 721
सनातन 4, 198
सनाभि 3, 452
संतति 3, 300
संतान 3, 422
संतानिका 4, 39
संधा 2, 249
संधान 3, 424
संधि 2, 250

संधिनी 3, 424
संधिला 3, 684
संध्या 2, 376
संनति 3, 301
संनद्ध 3, 342
संनय 3, 504
संनिधि 3, 343
सप्तला 3, 684
सप्तार्चिस् 3, 753
सभा 2, 308
सम् 7, 16
सम 2, 332
समभिहार 5, 44
समय 3, 502-3
समया 7, 57
समर्थ 3, 316
समर्याद 4, 146
समाधान 4, 128
समादान 4, 200
समाधि 3, 342
समान 3, 422
समापन 4, 197
समापन्न 4, 200
समायोग 4, 50
समास 3, 752
समाहार 4, 284
समाहित 4, 129
समाह्वय 4, 232
समिति 3, 302
समीक्षा 3, 738
समीरण 4, 91
समुच्छ्रय 4, 231
समुत्थान 4, 201
समुदय 4, 231
समुदाय 4, 231
समुद्धत 4, 129
समुद्रान्ता 4, 129
समुद्गार 4, 284
समुल्लद्ध 4, 154
समूढ 3, 180
संपद् 2, 233
संपराय 4, 231
संपर्क 3, 98
संप्रयोग 4, 51
संप्रयोगिन् 4, 202
संप्रहार 4, 283
संबाध 3, 342
संभव 3, 707
संभार 3, 609
संभोग 3, 122
संभ्रम 3, 467
संमति 3, 302
संमूर्छन 4, 198
सर 2, 453
सरक 3, 97
सरणि 3, 219
सरण्ड 3, 177
सरल 3, 683
सरस्वत् 3, 297
सरस्वती 4, 130-31
सरोजिनी 4, 202
सर्ग 2, 50
सर्वंसह, ०हा 4, 343
सर्वग 3, 122
सर्वज्ञ 3, 141
सर्वतोभद्र, ०द्रा 5, 43-44
सर्वतोमुख 5, 9
सर्वरस 4, 335
सवन 3, 419
सव्य 2, 375
सस्यक 3, 97
सह, ०हा 2, 589-90

सह (indecl.) 7, 53
सहचर 4, 283
सहज 3, 139
सहदेव, ०वा, ०वी 4, 309–10
सहस् 2, 580
सहस्रपाद 5, 22
सहस्रवेधिन् 5, 33
सह्य 2, 375
साक्षात् 7, 26
साति 2, 203
सादिन् 2, 285
साधन 3, 425–26
साधिष्ठ 3, 168
साधीयंस् 3, 753
साधु 2, 250
साध्य 2, 377
सान्त्र 2, 529
सामज 3, 140
सामयोनि 4, 204
सामर्थ्य 3, 504
सामि 7, 41
सामिधेनी 4, 204
सामुद्र 3, 611
सांप्रतम् 7, 57
साय 2, 378
सायक 3, 98
सार 2, 455
सारङ्ग 3, 122
सारण 3, 220
सारस 3, 754
सारसन 4, 203
सार्थ 2, 218
सार्वभौम 4, 219
साल 2, 503
सालमार 4, 285
सावित्र,०त्री 3, 611–12
साहस 3, 753
सिंह, ०ही 2, 590–91
सिंहाण 3, 220
सिकता 3, 303
सिक्थ 2, 219
सित, ०ता 2, 203
सिद्ध 2, 251
सिद्धार्थ 3, 316
सिद्धि 2, 251
सिध्मल, ०ला 3, 685
सिन्दूर, ०री 3, 612–13
सिन्दूरतिलक, ०का 6, 3
सिन्धु 2, 252
सिप्र, ०प्रा 2, 457
सिर, ०रा 2, 457
सीता 2, 204
सीमा 2, 333
सीर 2, 457
सुकर्मन् 3, 427
सुकुमार 4, 285
सुकृत 3, 304
सुख, ०खा 2, 28
सुखाश 3, 722
सुत 2, 205
सुतल 3, 685
सुदर्शन, ०ना, ०नी 4, 205–6
सुदामन् 3, 427
सुधन्वन् 3, 427
सुधा 2, 252
सुनन्दा 3, 332–33
सुनार 3, 613
सुनीति 3, 305
सुन्दरी 3, 613
सुपर्ण, ०र्णा 3, 222
सुपर्वन् 3, 428
सुप्ति 2, 205

सुप्रतीक 4, 39
सुमनस् 3, 754
सुमुख 3, 105
सुमेधस् 3, 755
सुयामुन 4, 204
सुर, ०रा 2, 458
सुरततालो 5, 47
सुरभि 3, 452–53
सुरस 3, 755
सुरूप 3, 438
सुवर्ण 3, 221
सुवह, ०हा 3, 766
सुवेल 3, 686
सुव्रत, ०ता 3, 304
सुषम, ०मा 3, 467–68
सुषवी 3, 708
सुषिर cfr. 3, 607
सुषीम 3, 467
सुषेण 3, 221
सूक्ष्म 2, 333
सूचक 3, 99
सूचना 3, 428
सूची 2, 60
सूत 2, 205
सूतक 3, 99
सूत्र 2, 458
सूत्रकण्ठ 4, 70
सूत्रधार 4, 285
सूद 2, 234
सून, ०ना 2, 286
सूनु 2, 286
सूनृत 3, 305
सूप 2, 234
सूर्यभक्त 4, 131
सृक 2, 21
सृगाल cfr. 3, 681
सृगालजम्बू cfr. 5, 35
सृति 2, 206
सृदाकु 3, 100
सृष्ट 2, 99
सृष्टि 2, 99
सेचक 3, 100
सेतु 2, 206
सेनानी 3, 429
सेवक 3, 100
सेवन 3, 429
सेव्य 2, 378
सैकतिक 4, 40
सैन्धव 3, 709
सैन्य 2, 378
सैरन्ध्री 3, 614
सोढ़ 2, 130
सोम 2, 333–34
सोमवल्क 4, 41
सौगन्धिक 4, 41
सौदामिनी 4, 206
सौम्य 2, 379
सौरभ्य 3, 504
सौवीर 3, 615
स्कन्ध 2, 249
स्खलित 3, 298
स्तनन 3, 420
स्तनयित्नु 4, 203
स्तम्ब 2, 301
स्तम्भ 2, 307
स्तिमित 3, 303
स्तोक 2, 21
स्त्यान 2, 285
स्थपति 3, 300
स्थाणु 2, 154
स्थान 2, 284
स्थाने 7, 32

स्थापन 3, 425
स्थापित 3, 303
स्थाल, ०ली 2, 504
स्थासक 3, 98
स्थित 2, 204
स्थिति 2, 204
स्थिर, ०रा 2, 456
स्थूणा 2, 154
स्थूल 2, 504
स्थूलोच्चय 4, 232
स्थेय 2, 378
स्नान 2, 284
स्नेह 2, 591
स्पर्श 2, 542
स्पर्शन 3, 421
स्पश 2, 542
स्फार 2, 456
स्फुट 2, 98
स्फुटि 2, 99
स्म 7, 16
स्मृति 2, 206
स्यन्दन 3, 421
स्यमीक,०का 3, 96
स्रवन्ती 3, 257–58
स्रुव, ०वा 2, 529
स्रु 1, 13
स्रोतस् 2, 581
स्व 1, 14
स्वप्न 2, 284
स्वभू 2, 308
स्वर 2, 454
स्वरु 2, 454
स्वस्ति 7, 26
स्वस्तिक 3, 96
स्वादु 2, 233
स्वाप 2, 296
स्वामिन् 2, 286
स्विद् 7, 15
स्वेद 2, 234
स्वैर 2, 459

ह.

ह 7, 16
हंस 2, 581–82
हठ 2, 108
हताश 3, 723
हनु 2, 287
हन्त 7, 26
हम् 7, 18
हर 2, 459
हरण 3, 223
हरि 2, 459–61
हरिकण्ठ 4, 70
हरिण 3, 223
हरिणी 3, 223--24
हरित् 2, 207
हरिताली 4, 301
हरेणु 3, 225
हर्षण 3, 224
हर्षयित्नु 4, 207
हलाहल 4, 301
हलिन् 2, 287
हव 2, 529
हविस् 2, 582
हसन्ती 3, 305
हस्त 2, 207
हस्तिकर्ण 4, 92
हस्तिमल्ल 4, 300
हा 7, 17
हायन 3, 429
हार 2, 461
हारक 3, 101

हारीत 3, 306
हार्य 2, 380
हाल, ०ला 2, 504–5
हि 7, 17
हिंसा 2, 582
हिंस्र, ०स्रा 2, 461
हिङ्गुनिर्यास 5, 48
हिण्डन 3, 430
हित 2, 208
हिम 2, 335
हिमज, ०जा 3, 140
हिरण 3, 225
हिरण्मय 4, 233
हिरण्य 3, 225, 505-6
हिरण्यरेतस् 5, 48
हिरुच् (हिरुक्) 7, 20
ही 7, 17
हीन 2, 268
हीर, ०रा 2, 462
हीही 7, 53
हुडुक्क 3, 101
हुम् 7, 18
हृच्छय 3, 506
हृदय 3, 506
हृद्य, ०द्या 2, 380-81
हृषित 2, 100
हृष्ट 2, 100
हे 7, 5
हेति 2, 208
हेमपुष्प 4, 212
हेमपुष्पक, ०ष्पिका 5, 8
हेमल 3, 686
हेरम्ब 3, 442
हेरुक 3, 102
हेला 2, 505
हेलि 2, 505
है 7, 5
हैमवती 4, 132
हो 7, 6
होमि 2, 335
होरा 2, 462
हौ 7, 6
ह्रस्व 2, 508
ह्लादिनी 3, 429.

८० ॥ ॐ नमः सर्वज्ञाय ॥ अर्हं ॥



श्रीसिद्धहेमचन्द्रव्याकरणनिवेशिनामुणादीनाम् ।
आचार्यहेमचन्द्रः करोति विवृतिं प्रणम्यार्हम् ॥ १ ॥

कृवापाजिस्वदिसाध्यशौदृस्नासनिजानिरहीण्भ्य उण् ॥ १ ॥

करोतीत्यादिभ्यो धातुभ्यः सत्यर्थे वर्तमानेभ्यः संप्रदानापादानाभ्यामन्यत्र कारके भावे च संज्ञायां बहुलमुण्प्रत्ययो भवति ॥ डुकृंग् करणे । कृंग्ट् हिंसायां वा । निरनुबन्धग्रहणे सामान्यग्रहणात् । करोति करति कृणोति वा । कारुः कारी नापितादिरिन्द्रश्च ॥ वांक् गतिगन्धनयोः । पैं ओवैं शोषणे वा । वाति वायति वा द्रव्याणि । वायुर्नभस्वान् ॥ पां पाने । पिबन्त्यनेन तैलादिद्रव्यम् । पायुरपानमुपस्थश्च । पातिपायत्योस्त्वर्थासंगतेर्न ग्रहणम् ॥ जिं अभिभवे । जयत्यनेन रोगान् श्लेष्माणं वा । जायुरौषधं पित्तं वा ॥ ष्वदि आस्वादने । स्वद्यत इदमनेन वा । स्वादु रुच्यं स्वदनं वा स्वादु ॥ साधंट् संसिद्धौ । उत्तमक्षमादिभिस्तपोविशेषैर्भावितात्मा साध्नोतीति साधुः । सम्यग्दर्शनादिभिः परमपदं साधयति वा । साधुः संयतः । उभयलोकफलं साधयति वा । साधुर्धर्मशीलः ॥ अशौटि व्याप्तौ । अश्नुते तेजसा सर्वं केदारं वेत्याशुः सूर्यो व्रीहिश्च । अशनं वाशु । क्षिप्रमश्नुत इति वाशुः शीघ्रगामी शीघ्रकारी च ॥ दृ भये । दृश् विदारणे वा । दरति दृणाति दीर्यते वा । दारु काष्ठं भव्यं च ॥ ष्णैं वेष्टने । स्नायति । स्नायुरस्थिनहनम् ॥ षन भक्तौ । षणूयी दाने वा । सनति सनोति वा मृगादीनिति सानुः पर्वतैकदेशः ॥ जनैचि प्रादुर्भावे । जायतेनेनाकुञ्चनादि । जानु ऊरुजंघासंधिमण्डलम् । जानीत्याकारनिर्देशात् । न जनवध इति प्रतिषिद्धापि वृद्धिर्भवति ॥ रह त्यागे । रहति गृहीत्वा सूर्याचन्द्रमसौ स्वशरीरं वा । राहुः सैंहिकेयः ॥ इण्क् गतौ । एति । आयुः पुरुषः शकटमौषधं जीवनं पुरूरवःपुत्रो वा । जरायुर्गर्भवेष्टनं जलमलं वा । जटायुः पक्षी । धनायुर्देशः । रसायुर्भ्रमरः । संप्रदानाच्चान्यत्रोणादय इति यथायोगं प्रत्ययो वेदितव्यः ॥ १ ॥

अः ॥ २ ॥

सर्वस्माद्धातोर्यथाप्रयोगमकारः प्रत्ययो भवति ॥ भवः । तरः । वरः । स्रवः । शयः । शरः । परः । करः । स्तवः । चरः । वदः ॥ २ ॥

म्लेछीडिर्ह्रस्वश्च वा ॥ ३ ॥

आभ्यामः प्रत्ययो भवति दीर्घस्य च ह्रस्वो वा भवति ॥ म्लेछ अव्यक्तायां वाचि । म्लिच्छः मूकः ॥ म्लेच्छः कुमनुष्यजातिः ॥ ईडिक् स्तुतौ । ईड इडश्च देवताविशेषौ मेदिनी च ॥ ३ ॥

नञः क्रमिगमिशमिखन्याकमिभ्यो डित् ॥ ४ ॥

नञ्परेभ्य एभ्यो डिदः प्रत्ययो भवति ॥ क्रमू पादविक्षेपे । न क्रामति । नक्रो जलचरो ग्राहः ॥ गम्लृ गतौ । नगो वृक्षः पर्वतश्च ॥ शमूच् उपशमे । नशो यक्षः ॥ खनूग् अवदारणे । नखः करजः । नास्य खमस्तीति वा नख इत्यपि । कमूङ् कान्तौ । नाकः स्वर्गः । नात्राकमस्तीति नाक इत्यपि । नखादित्वादन्स्वर इत्यन्न भवति । डित्करणमन्त्यस्वरादिलोपार्थम् ॥ ४ ॥

तुदादिविषिगुहिभ्यः कित् ॥ ५ ॥

तुदादिभ्यो विषिगुहिभ्यां च किदः प्रत्ययो भवति ॥ तुदः । नुदः । क्षिपः । सुरः । बुधः । सिवः । तुदादीनां यथासंभवं कारकविधिः ॥ विष्लृंकी व्याप्तौ । वेवेष्टि । विषं प्राणहरं द्रव्यम् । गुहौग् संवरणे । गूहति । गुहः स्कन्दः । गुहा पर्वतैकदेशः ॥ ५ ॥

विन्देर्नलुक् च ॥ ६ ॥

विन्देः किदः प्रत्ययो भवति तत्संनियोगे नस्य लुक् च [भवति] ॥ विदु अवयवे । विदो गोत्रकृद्वृक्षजातिश्च ॥ ६ ॥

कृगो द्वे च ॥ ७ ॥

करोतेः किदः प्रत्ययो भवत्यस्य च धातोर्द्वे रूपे भवतः ॥ डुकृंग् करणे । चक्रं रथाङ्गमायुधं च ॥ ७ ॥

कनिगदिमनेः सरूपे ॥ ८ ॥

किदिति निवृत्तम् । एभ्योकारः प्रत्ययो भवत्येषां च सरूपे समानरूपे द्वे उक्ती भवतः ॥ कनै दीप्तिकान्तिगतिषु । कनति दीप्यते । कङ्कनः कान्तः ॥ गद व्यक्तायां वाचि । गदत्यव्यक्तं वदति गद्यतेऽव्यक्तं कथ्यते वा । गद्गदोऽव्यक्तवाक् ।

गद्गदमव्यक्तं वचनम् ॥ मनिंच् ज्ञाने । मन्मनोविस्पष्टवाक् । सरूपग्रहणं व्यञ्जन-स्थानादेर्लुगित्यादिकार्यनिवृत्त्यर्थम् ॥ ८ ॥

ऋताष्टित् ॥ ९ ॥

ऋकारान्ताद्धातोरकारः प्रत्ययो भवति स च बहुलं टित् धातोश्च सरूपे द्वे रूपे भवतः ॥ दॄश् विदारणे । दीर्यते भिद्यतेनेन श्रोत्रमिति दर्दरो वाद्यविशेषः पर्वतश्च । दर्दरी सस्यलुण्टिः ॥ कॄत् विक्षेपे । कर्करः क्षुद्राश्मा । कर्करी गलन्तिका ॥ वॄग्श् वरणे । वर्वरो म्लेच्छजातिः । वर्वरी केशविशेषः ॥ भॄश् भरणे । भर्भरः छद्मवान् । भर्भरी श्रीः ॥ जॄष्च् जरसि । जर्जरो वृद्धः । जर्जरी स्त्री ॥ झॄष्च् जरसि । झर्झरो वाद्यविशेषः । झर्झरी झल्लरिका ॥ गॄत् निगरणे । गर्गरो राजर्षिः । गर्गरी महाकुम्भः ॥ मॄश् हिंसायाम् । मर्मरः शुष्कपत्त्रप्रकरः । तद्धर्मान्योपि क्षोदासहिष्णुर्मर्मरो दानवश्च । मर्मरायां दूर्वायामित्यादौ टित्त्वेपि ङीर्न भवति बहुलाधिकारात् ॥ तत एव च ऋकारान्तादपि ॥ घृं सेचने । घर्घरः सघोषोव्यक्तवाक् । घर्घरी किङ्किणिका ॥ ९ ॥

किच्च ॥ १० ॥

ऋकारान्ताद्धातोर्यथादर्शनं किदकारः प्रत्ययो भवति धातोश्च सरूपे द्वे रूपे भवतः ॥ मॄश् हिंसायाम् । मूर्यतेनेनेति मुर्मुरो ज्वलदङ्गारचूर्णम् ॥ पॄश् पालनपूरणयोः । पूर्यते जलघातेन । पुर्पुरः फेनः ॥ तॄ प्लवनतरणयोः । तीर्यतेनेनास्मिन्वा । तिर्तिरः संक्रमः ॥ भॄश् भर्जने च । भूर्यते संचीयते । भुर्भुरः संचयः ॥ शॄश् हिंसायाम् । शीर्यते समन्तात् । शिर्शिरः पुञ्जः ॥ १० ॥

पॄपलिभ्यां टित् पिप् च पूर्वस्य ॥ ११ ॥

आभ्यां टिदः प्रत्ययो भवत्यनयोश्च सरूपे द्वे रूपे भवतः पूर्वस्य च स्थाने पिप् इत्यादेशो भवति ॥ पॄश् पालनपूरणयोः । पृणाति छायया । पिप्परी वृक्षजातिः ॥ पल गतौ । पलत्यातुरम् । पिप्पल्यौषधजातिः ॥ टित्करणं ङ्यर्थम् ॥ ११ ॥

क्रमिमथिभ्यां चन्मनौ च ॥ १२ ॥

आभ्यामः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य च स्थाने यथासंख्यं चन् मन् इत्यादेशौ भवतः ॥ क्रमू पादविक्षेपे। क्रामति सुखमनेना-

त्विन्वा। चङ्क्रमः संक्रमः॥ मथे विलोडने। मथति चित्तं रागिणाम्। मन्मथः कामः॥ १२॥

गमेर्जम् च वा॥ १३॥

गमेरः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य च जम् इत्यादेशो [वा] भवति॥ गम्लृं गतौ। गच्छति पादविहरणं करोति। जङ्गमश्चरः॥ गच्छत्यगाध्यस्थ्यमिति गङ्गमश्चपलः॥ १३॥

अदुपान्त्यऋद्व्यामश्चान्ते॥ १४॥

अकारोपान्त्यादृकारान्ताच्च धातोरः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य चान्तेकारो भवति॥ पल फल शल गतौ। शलशलः॥ सल गतौ। सलसलः॥ हल विलेखने। हलहलः॥ कलि शब्दसंख्यानयोः। कलकलः। मलि धारणे। मलमलः॥ घटिष् चेष्टायाम्। घटघटः॥ वद व्यक्तायां वाचि। वदवदः॥ पदिंच् गतौ। पदपदः॥ ऋदन्तः॥ डुकृंग् करणे। करकरः॥ मृंत् प्राणत्यागे। मरमरः। दृंङ्त् आदरे। दरदरः॥ सृं गतौ। सरसरः॥ वृग्ट् वरणे। वरवरः॥ अनुकरणशब्दा एते॥ १४॥

मषिमसेर्वा॥ १५॥

आभ्यामः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य चान्तेकारो वा भवति॥ मष हिंसायाम्। मषमषः। मष्मषः॥ मसैच् परिणामे। मसमसः। मस्मसः॥ १५॥

हसृफलिकषेरा च॥ १६॥

एभ्यो अः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य चान्त आकारो भवति॥ हृंग् हरणे। हरति नयति शस्त्राण्यस्खलन् लक्ष्यम्। हराहरो योग्याचार्यः॥ सृं गतौ। धावति वायुना नीयमानः समन्तात्। सरासरः सारङ्गः॥ फल निष्पत्तौ। फलति निष्पादयति नानाविधानि पुष्पफलानि। फलाफलमरण्यम्। कष हिंसायाम्। कषति विदारयति। कषाकषः कृमिजातिः॥ १६॥

इदुदुपान्त्याभ्यां किदिदुतौ च॥ १७॥

इकारोपान्त्यादुकारोपान्त्याच्च किदः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य च यथासंख्यमिकार-उकारावन्ते भवतः॥ किलत् श्वैत्यक्रीडनयोः। किलिकिलः॥ हिलत् हावकरणे। हिलिहिलः॥ सिलत् उञ्छे।

सिलिसिलः॥ छुरत् छेदने। छुरुछुरः॥ मुरत् संवेष्टने। मुरुमुरः॥ घुरत् भीमार्थशब्दयोः। घुरुघुरः॥ पुरत् अग्रगमने। पुरुपुरः॥ सुरत् ऐश्वर्यदीप्त्योः। सुरुसुरः॥ कुरत् शब्दे। कुरुकुरः॥ चुरण् स्तेये। चुरुचुरः॥ हुल हिंसासंवरणयोश्च। हुलुहुलः॥ गुजत् शब्दे। गुजुगुजः॥ गुडत् रक्षायाम्। गुडुगुडः॥ कुटत् कौटिल्ये। कुटुकुटः॥ पुटत् संश्लेषणे। पुटुपुटः॥ कुणत् शब्दोपकरणयोः। कुणुकुणः॥ मुणत् प्रतिज्ञाने। मुणुमुणः॥ अनुकरणशब्दा एते॥ १७॥

जजलतितलकाकोलीसरीसृपादयः॥ १८॥

एते अप्रत्ययान्ता निपात्यन्ते॥ जल घात्ये। अस्य द्वित्वे पूर्वस्य च जभावः। जजलः। यस्य जाजलिः पुत्रः॥ तिलत् स्नेहने। अस्य द्वित्वे पूर्वस्य च तिभावे धातोरिकारस्य अकारे। तितलः॥ कुल बन्धुसंस्त्यानयोः। अस्य द्वित्वे पूर्वस्य च काभावे। काकोली। क्षीरकाकोलीति च वल्लीजातिः॥ सृप्लृं गतौ। अस्य द्वित्वे गुणाभावे पूर्वस्य च सरीभावे। सरीसृप उरगजातिः॥ आदिग्रहणाद्यथादर्शनमन्येऽपि॥ १८॥

बहुलं गुणवृद्धी चादेः॥ १९॥

धातोः किदः प्रत्ययो भवति सरूपे च द्वे रूपे भवतः पूर्वस्य च इकार-उकारावन्ते भवतो यथादर्शनं च गुणवृद्धी भवतः॥ केलिकिलः कैलिकिलश्च हसनशीलः॥ हिलत् हावकरणे। हेलिहिलो हैलिहिलश्च विलसनशीलः॥ शेलिशिलः शैलिशिलश्च॥ शुभि दीप्तौ। शोभते पुनः पुनरिति शोभुशुभः। शौभुशुभः॥ णुदंत् प्रेरणे। नुदति पुनः पुनरिति नोदुनुदः। नौदुनुदः॥ गुडत् रक्षायाम्। गुलति भ्राम्यति पुनः पुनरिति गोलुगुलः। गौलुगुलः॥ बुलण् निमज्जने। बोलयति पुनः पुनरिति बोलुबुलः। बौलुबुलः॥ तत्तद्धात्वर्थास्तच्छील अनुवादविशेषा वैते॥ १९॥

णेर्लुप्॥ २०॥

धातोरप्रत्ययसंनियोगे बहुलं णेर्लुप् भवति॥ वज्रं धारयतीति वज्रधर इन्द्रः॥ एवं चक्रधरो विष्णुः॥ भूधरोऽद्रिः॥ जलधरो मेघः॥ बाहुलकात्प्रत्ययान्तरेऽपि॥ देवयतीति दिव् द्यौः स्वर्गो व्योम च॥ पुण्यं कारयन्तीति पुण्यकृतो वा॥ एवं पर्णं शोषयतीति पर्णशुट्॥ वान्ति पर्णशुषो वातास्ततः पर्णमुचोपरे।

ततः पर्णरुहः पश्चात्ततो देवः प्रवर्षति ॥ तथा महतः कारयां चक्रुराक्रन्दानिति प्राप्ते महतश्चक्रुराक्रन्दानिति भवति ॥ महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः। घोषयां चक्रुरित्यर्थः ॥ २० ॥

भीण्शलिवलिकल्यतिमर्च्यर्चिमृजिकुतुस्तुदाधारात्राकापानिहान-ञ्शुभ्यः कः ॥ २१ ॥

एभ्यः कः प्रत्ययो भवति ॥ ञिभींक् भये। बिभेति दुन्दुभात्परस्माच्च। भेको मण्डूकः कातरश्च। बिभेति वायोः। भेको मेघः॥ इणक् गतौ। एत्यद्वितीय इत्येकोसहायः संख्या प्रधानमसमानोन्यश्च ॥ पल फल शल गतौ। शलन्त्यात्मरक्षणाय तमिति शल्कः शरणम्। शलति त्यक्तं बहिरिति शल्कं गृहीतरसं शकलम्। शल्कः काष्ठत्वग्मलिनं च काष्ठं मुद्गरः करणं च ॥ वलि संवरणे। वल्को दशनो वासस्त्वक् च ॥ कलि शब्दसंख्यानयोः। कल्कः कषायो दम्भः पिष्टपिण्डश्च ॥ अत सातत्यगमने। अत्क आत्मा वायुर्व्याधितश्चन्द्र उत्पातश्च ॥ मर्चः सौत्रो धातुः। मर्को देवदारुर्वायुर्दानवो मनः पन्नगो विघ्नकारी च। चजः कगमिति कत्वम् ॥ अर्च पूजायाम्। अर्कः सूर्यः पुष्पजाति[र्झाट]जातिश्च ॥ मृजौक् शुद्धौ। मार्को वायुः ॥ कुंक् शब्दे। कोकश्चक्रवाकः ॥ तुंक् वृत्तिहिंसापूरणेषु। तोकमपत्यम् ॥ ष्टुंग्क् स्तुतौ। स्तोकमल्पम् ॥ डुदांग्क् दाने। दाको यजमानो यज्ञश्च ॥ डुधांग्क् धारणे च। धाक ओदनोनड्वानम्भः स्तम्भश्च ॥ रांक् दाने। राको दातार्थः सूर्यश्च। राका पौर्णमासी कुमाररजस्वला च ॥ त्रैङ् पालने। त्राको धर्मः शरणस्थानीयश्च ॥ कैं शब्दे। काको वायसः॥ पां पाने। पांक् रक्षणे वा। पाको बालोसुरः पर्वतश्च ॥ ओहांक् त्यागे। निहाको निःस्नेहो निर्मोकश्च। निहाका गोधा ॥ शुं गतौ। न शवतीत्यशोकः ॥ २१ ॥

विचिपुषिमुषिशुष्यविसृवृशुसुभूधूमूनीवीभ्यः कित् ॥ २२ ॥

एभ्यः कित्कः प्रत्ययो भवति ॥ विचूंपी पृथग्भावे। विक्कः करिपोतः ॥ पुषंच् पुष्टौ। पुष्को निशाकरः ॥ मुषश् स्तेये। मुष्कश्चौरो मांसलो वा। मुष्कौ वृषणौ ॥ शुषंच् शोषणे। शुष्कमपगतरसम् ॥ अव रक्षणादिषु। ऊकः कुन्दुमः॥ सृं गतौ। सृको वायुर्बाणः सृगालो बको निरयश्च। सृकायुधविशेषः ॥ वृग्ट् वरणे। वृङ्श् संभक्तौ वा। वृको मृगजातिरादित्यो धूर्तो जाठरश्चाग्निः ॥ शुं गतौ। शुकः कीर ऋषिश्च ॥ षुंग्ट् अभिषवे। सुको निरामयः ॥ भू सत्तायाम्। भूकः

कालश्छिद्रं च ॥ धूत् विधूनने । धुगृट् कम्पने वा । धूगृश् कम्पने वा । धूको वायुर्व्याधिश्च । धूका पताका ॥ मूङ् बन्धने । मूकोवाक् ॥ णींग् प्रापणे । नीकः खगो ज्ञाता च । नीकोदकहारिका ज्ञातिश्च ॥ वींक् प्रजननादिषु । वीको वायुर्नाशोर्थी मनो वसन्तश्च । वीका पक्षिजातिर्नेत्रमलं च ॥ २२ ॥

कृगो वा ॥ २३ ॥

कृगः कः प्रत्ययो भवति स च किद्वा भवति । डुकृंग् करणे । कर्कोग्निः सारङ्गो दर्भः श्वेताश्वश्च ॥ कृकः शिरोग्रीवम् ॥ २३ ॥

घुयुहिपितुशोर्दीर्घश्च ॥ २४ ॥

एभ्यः कित्कः प्रत्ययो भवत्येषां च दीर्घो भवति ॥ घुंङ् शब्दे । घूकः कौशिकः ॥ युक् मिश्रणे । यूका क्षुद्रजन्तुः स्वेदजः ॥ हिंट् गतिवृद्ध्योः । हीकः पक्षी ॥ पिंत् गतौ । पीक उपस्थो जलाश्रयश्च ॥ तुंक् वृत्त्यादिषु । तूक उपस्थः पर्वतश्च ॥ शुं गतौ । शूकः किंशारुरभिषवः शोकश्च । शूका हल्लेखः ॥ २४ ॥

ह्रियो रश्च लो वा ॥ २५ ॥

ह्रियः कित्कः प्रत्ययो भवति रेफस्य च लकारो वा भवति ॥ [ह्रींक् लज्जायाम् ।] ह्रीकः । ह्लीको लज्जापरो नकुलश्च । ह्रीकोलिङ्ग्यपि ॥ २५ ॥

निष्कतुरुष्कोदर्कालर्कशुल्कश्वफल्ककिञ्जल्कोल्कावृक्कछेककेकायस्कादयः ॥ २६ ॥

एते कप्रत्ययान्ता निपात्यन्ते ॥ नेः सीदतेर्डिच्च । निष्कः सुवर्णादिः ॥ तूरैचि त्वरायाम् । अस्य ह्रस्व उपश्चान्तः । तुरुष्को वृक्षो म्लेच्छश्च ॥ उदः परात् अर्तेः । उदर्कः क्रियाफलम् ॥ अली भूषणादौ । अस्मादर् चान्तः । अलर्क उन्मत्तो मदालसात्मजश्च ॥ पल फल शल गतौ । इत्यस्योपान्त्योत्वं च । शुल्कं रक्षानिर्वेशः ॥ शुनः परात् फालेर्ह्रस्वश्च । श्वफल्कोन्धकविशेषः ॥ किमः परात् जूषो रस्य लश्च । किञ्जल्कः पुष्परेणुः ॥ ज्वलेरुलादेशश्च । उलेः सौत्रस्य वा । उल्कौत्पातिकं ज्योतिरग्निज्वाला च ॥ वृजैकि वर्जने । अगुणत्वं च । वृक्को मुष्कः ॥ छ्यतिकायत्योरेत्वं च । छेको मनीषी । केका मयूरवाक् ॥ यमेर्मस्य सः । यस्कः ॥ आदिग्रहणात् ढक्कास्थकादयोपि ॥ २६ ॥

दॄकॄनॄसॄभृधृवृमृस्तुकुक्षुलङ्घिचरिचटिकटिकण्टिचणिचपिफ-
लिवमितम्यविदेविवन्धिकनिजनिमशिक्षारिकुरिवृतिव-
ल्लिमल्लिसल्ल्यलिभ्योकः ॥ २७ ॥

एभ्योकः प्रत्ययो भवति ॥ दॄश् विदारणे । दरको भीरुः ॥ कॄत् विक्षेपे । करको जलभाजनं कमण्डलुश्च । करका वर्षपाषाणः ॥ नॄश् नये । नरको निरयः ॥ सॄं गतौ । सरको मद्यविशेषः कंसभाजनविशेषश्च । सरका मधुपानवारः ॥ टुडुभृंग्क् पोषणे च । भरको गोण्यादिः ॥ धृंङ् अवध्वंसने । धरकः सुवर्णोन्मानियुक्तः ॥ वृग्ट् वरणे । वरको वधूजानिसहायो वाजसनेयभेदश्च ॥ मृंत् प्राणत्यागे । मरको जनोपद्रवः ॥ ष्टुंग्क् स्तुतौ । स्तवकः पुष्पगुच्छः ॥ कुंक् शब्दे । कवकमभक्ष्यद्रव्यविशेषः ॥ टुक्षुक् शब्दे । क्षवको राजसर्षपः ॥ लघुङ् गतौ । लङ्घको रङ्गोपजीवी ॥ चर भक्षणे । चरको मुनिः ॥ चटण् भेदे । चटकः पक्षी ॥ कटे वर्षावरणयोः । कटको वलयः ॥ कटु गतौ । कण्टकस्तरुरोम ॥ चण शब्दे । चणको मुनिर्धान्यविशेषश्च ॥ चपी भक्षणे । चपकः पानभाजनम् ॥ फल निष्पत्तौ । फलकः खेटकम् ॥ टुवमू उद्गिरणे । वमकः कर्मकरः ॥ तमूच् काङ्क्षायाम् । तमको व्याधिः क्रोधश्च ॥ अव रक्षणादौ । अवका शैवलम् ॥ देवृङ् देवने । देवकाप्सराः । देविका नदी ॥ बन्धंश् बन्धने । बन्धकश्चारकपालः ॥ कनै दीप्त्यादिषु । कनकं सुवर्णम् ॥ जनैचि प्रादुर्भावे । जनकः सीतापिता ॥ मश रोषे च । मशकः क्षुद्रजन्तुः ॥ क्षर संचलने । ण्यन्तः । क्षारकं बालमुकुलम् ॥ कुरत् शब्दे । कोरकं प्रौढमुकुलम् ॥ वृतूङ् वर्तने । वर्तका वर्तिका वा शकुनिः ॥ वल्लि संवरणे । वल्लकी वीणा ॥ मल्लि धारणे । मल्लकः शरावः । मल्लिका पुष्पजातिर्दीपाधारश्च ॥ सल्लः सौत्रः । सल्लकी वृक्षः । सत्कृत्य लक्ष्यते स्वाद्यते गजैः सल्लकीति वा ॥ अली भूषणादिषु । अलकः केशविन्यासः । अलका पुरी ॥ २७ ॥

कौ रुरुण्टिरण्टिभ्यः ॥ २८ ॥

कुशब्दात्परेभ्य एभ्योकः प्रत्ययो भवति ॥ रुक् शब्दे । कुरवको वृक्षः ॥ रुटु स्तेये । कुरुण्टको वर्णगुच्छः ॥ रण्टिः सौत्रः । कुरण्टकः स एव ॥ २८ ॥

ध्रुधून्दिरुचितिलिपुलिकुलिक्षिपिक्षुपिक्षुभिलिखिभ्यः कित् ॥ २९ ॥

एभ्यः किदकः प्रत्ययो भवति ॥ ध्रुं स्थैर्ये च । ध्रुवकः स्थिरः । ध्रुवकावपनविशेषः ॥ धूत् विधूनने । धुवकं धूननम् । धुवकः प्रधानम् । स्त्री धुवका-

वपनविशेषः ॥ उन्दैप् क्लेदने । उदकं जलम् ॥ रुचि अभिप्रीत्यां च । रुचक आभरणविशेषः ॥ तिलत् स्नेहने । तिलको विशेषको वृक्षश्च ॥ पुलण् समुच्छ्राये । पुल महत्त्वे वा । पुलको रोमाञ्चः ॥ कुल बन्धुसंस्त्यानयोः । कुलकं संयुक्तम् ॥ क्षिपींत् प्रेरणे । क्षिपको वायुः । क्षिपकायुधम् ॥ क्षुपः सौत्रो ह्रस्वीभावे । क्षुपको गुल्मः ॥ क्षुभच् संचलने । क्षुभकः पाञ्चालकः ॥ लिखत् अक्षरविन्यासे । लिखकश्चित्रकरः ॥ २९ ॥

छिदिभिदिपिटेर्वा ॥ ३० ॥

एभ्योकः प्रत्ययो भवति स च किद्वा भवति ॥ छिदूंपी द्वैधीकरणे । छिदकः खड्गः क्षुरश्च । छेदकः परशुः ॥ भिदूंपी विदारणे । भिदकं जलं पिशुनश्च । भेदकं वज्रम् ॥ पिट शब्दे च । पिटकः क्षुद्रस्फोटकः । पेटकं संघातः ॥ ३० ॥

कृषेर्गुणवृद्धी च वा ॥ ३१ ॥

कृषेरकः प्रत्ययो भवति गुणवृद्धी चास्य वा भवतः ॥ कृषींत् विलेखने । कर्षकः । कृषकः परशुः ॥ कार्षकः । कृषकः कुटुम्बी ॥ ३१ ॥

नञः पुंसेः ॥ ३२ ॥

नञः परात् पुंसण् अभिमर्दने । इत्यस्मात्किदकः प्रत्ययो भवति ॥ नपुंसकं तृतीया प्रकृतिः ॥ नखादित्वाचवत् न भवति ॥ ३२ ॥

कीचकपेचकमेचकमेनकार्भकधमकवधकलघकजहकैरकैडकाश्मकलमकक्षुल्लकवटवकाढकादयः ॥ ३३ ॥

एते कीचकादयः शब्दा अकप्रत्ययान्ता निपात्यन्ते ॥ कचि बन्धने । अस्योपान्त्यैत्वं च । कीचको वंशविशेषः ॥ डुपचींष् पाके । मचि कल्कने । मनिंच् ज्ञाने । एषामुपान्त्यैत्वं च । पेचकः करिजघनभागः ॥ मेचको वर्णः ॥ मेनकाप्सराः ॥ अर्तेर्भश्चान्तः । अर्भको बालः ॥ ध्मां शब्दाग्निसंयोगयोः । अस्य धमादेशश्च । धमकः कीटः कर्मारश्च । अन्यत्रापि धमादेशो दृश्यते । क्ते धान्तः ॥ हन्तेर्वधश्च । वधको हन्ता व्याधिश्च । वधकं पद्मबीजम् । अन्यत्रापि दृश्यते । वृत्रं हन्ति । अचि । वृत्रवधः शक्रः । वधिता निर्मोचकः । वध्यः । वधनम् ॥ लघुङ् गतौ । नलुक् च । लघकोसमीक्ष्यकारी ॥ जहातेर्द्वे रूपे

अन्तलुक् च । जहकः कालः क्षुद्रश्च ॥ ईरिक् गतिकम्पनयोः । ईडिक् स्तुतौ । अनयोर्गुणश्च । एरकोदकतृणजातिः ॥ एडकाविजातिः ॥ अशौटि व्याप्तौ । अस्य मोन्तः । अश्मका जनपदः ॥ रमिं क्रीडायाम् । अस्य लमादेशश्च । लमक ऋषिविशेषः ॥ क्षुदृंपी संपेषे । अस्य क्षुल्लादेशश्च । क्षुल्लको दभ्रः । क्षुधं लातीति वा क्षुल्लः । क्षुल्ल एव क्षुल्लक इति वा ॥ वट वेष्टने । अस्यावोन्तश्च । वटवकस्तृणपुञ्जः ॥ आङ्पूर्वात् ढौकतेर्डिच्च । आढकं मानम् ॥ आदिग्रहणात् बृहत्तन्त्रात् । कला आपिबन्तीति कलापकाः शास्त्राणि ॥ कथण् वाक्यप्रबन्धे । कथयतीति कथकस्तोटकाख्यायिकादीनां वर्णयिता ॥ एवमुपकचम्पकफलहकादयोऽपि ॥ ३३ ॥

शलिबलिपतिवृतिणभिपटितटितडिगडिभन्दिवन्दिमन्दिनमिकुङ्पूसनिखजिभ्य आकः ॥ ३४ ॥

एभ्य आकः प्रत्ययो भवति ॥ पल फल शल गतौ । शलाकैषणी पूरणरेखा द्यूतोपकरणं सूची च ॥ वल प्राणनधान्यावरोधयोः । बलाका जलचरी शकुनिः ॥ पत्लृ गतौ । पताका वैजयन्ती ॥ वृतूङ् वर्तने । वर्ताका शकुनिजातिः ॥ णभच् हिंसायाम् । नभाकश्चक्रवाकजातिस्तमः काकश्च ॥ पट गतौ । पटाका वैजयन्ती पक्षिजातिश्च ॥ तट उच्छ्राये । तटाकं सरः ॥ तडण् आघाते । तडाकं तदेव ॥ गड सेचने । गडाकः शाकजातिः ॥ भदुङ् सुखकल्याणयोः । भन्दाकं शासनम् ॥ वदुङ् स्तुत्यभिवादनयोः । वन्दाकश्चीवरभिक्षुः ॥ मदुङ् स्तुत्यादिषु । मन्दाकौषधिः ॥ णमं प्रह्वत्वे । नमाका म्लेच्छजातिः ॥ कुंङ् शब्दे । कवाकः पक्षी ॥ टुदुंट् उपतापे । दवाको म्लेच्छः ॥ पूङ् पवने । पवाका वात्या ॥ मनिंच् ज्ञाने । मनाका हस्तिनी ॥ खज मन्थे । खजाक आकरो मन्था दर्विराकाशं बन्धकी शरीरं पक्षी च ॥ ३४ ॥

शुभिगृहिविदिपुलिगुभ्यः कित् ॥ ३५ ॥

एभ्यः किदाकः प्रत्ययो भवति ॥ शुभि दीप्तौ । शुभाका पक्षिजातिः ॥ गृहणि ग्रहणे । गृहाकः ॥ विदक् ज्ञाने । विदाका भूतग्रामः ॥ पुल महत्त्वे । पुलाकोऽर्धस्विन्नो धान्यविशेषः ॥ गुंङ् शब्दे । गुंत् पुरीषोत्सर्गे वा । गुवाकं पूगफलम् ॥ ३५ ॥

पिषेः पिन्पिण्यौ च ॥ ३६ ॥

पिष्लृंप् संचूर्णने । इत्यस्मात्किदाकः प्रत्ययो भवत्यस्य च पिन् पिण्य इत्यादेशौ भवतः ॥ पिनाकमैशं धनुः शूलं वा । पिनाको दण्डः । पिण्याकस्तिलादिखलः ॥ ३६ ॥

मवाकश्यामाकवार्ताकवृन्ताकज्योन्ताकगूवाकभद्राकादयः ॥ ३७ ॥

एत आकप्रत्ययान्ता निपात्यन्ते ॥ मव्य बन्धने । यलोपः । मवाको रेणुः ॥ श्यैङ् गतौ । मोन्तः । श्यामाको जघन्यो व्रीहिः ॥ वृतेर्वृद्धिश्च । वार्ताकी शाकविशेषः । तत्फलं वार्ताकम् ॥ स्वरान्नोन्तश्च । वृन्ताक्युचबृहती । तत्फलं वृन्ताकम् ॥ ज्युङ् गतौ । न्तश्च प्रत्ययादिः । ज्यवतेस्मिन्स्विद्यमान इति ज्योन्ताकं स्वेदसद्मविशेषः ॥ गुंत् पुरीषोत्सर्गे । गुंङ् शब्दे वा । ऊवादेशश्च । गूवाकं पूगफलम् ॥ भदुङ् सुखकल्याणयोः । अस्य भद्रादेशश्च । भद्राकोकुटिलः ॥ आदिग्रहणात् स्योनाकचार्वाकपराकादयो भवन्ति ॥ ३७ ॥

क्रीकल्यलिदलिस्फटिदूषिभ्य इकः ॥ ३८ ॥

एभ्य इकः प्रत्ययो भवति ॥ डुक्रींग्श् द्रव्यविनिमये । क्रयिकः क्रेता ॥ कलि शब्दसंख्यानयोः । कलिका कोरकम् । उत्कलिकोर्मिः ॥ अली भूषणादौ । अलिकं ललाटम् ॥ दल विशरणे । दलिकं दारु ॥ स्फट स्फुट्ट विसरणे । स्फटिको मणिः ॥ दुषंच् वैकृत्ये । दूषिका नेत्रमलः ॥ ३८ ॥

आङः पणिपनिपदिपतिभ्यः ॥ ३९ ॥

आङ्परेभ्य एभ्य इकः प्रत्ययो भवति ॥ पणि व्यवहारस्तुत्योः । आपणिकः पत्तनवासी व्यवहारज्ञो वा ॥ पनि स्तुतौ । आपनिकः स्तावक इन्द्रनील इन्द्रकीलो वा ॥ पदिंच् गतौ । आपदिक इन्द्रनील इन्द्रकीलो वा ॥ पत्लृ गतौ । आपतिकः पथि वर्तमानो मयूरः श्येनः कालो वा ॥ आपणिकादयश्चत्वारो वणिजोपि ॥ ३९ ॥

नसिवसिकसिभ्यो णित् ॥ ४० ॥

एभ्यो णिदिकः प्रत्ययो भवति ॥ णसि कौटिल्ये । नासिका घ्राणम् ॥ वसं निवासे । वासिका माल्यदामविशेषश्छेदनद्रव्यं च ॥ कस गतौ । कासिका वनस्पतिः ॥ ४० ॥

पापुलिकृषिक्रुशिव्रश्चिभ्यः कित् ॥ ४१ ॥

एभ्य इकः प्रत्ययो भवति स च कित् [भवति ॥] पां पाने । पिकः कोकिलः ॥ पुल महत्त्वे । पुलिको मणिः ॥ कृषींत् विलेखने । कृषिकः पामरस्तृणजातिश्च ॥ क्रुशं आह्वानरोदनयोः । क्रुशिकः क्रोष्टुक उलूकश्च ॥ ओव्रश्चौत् छेदने । वृश्चिकः सविषकीटो राशिश्च नक्षत्रपादनवकरूपः ॥ ४१ ॥

प्राङः पणिपनिकषिभ्यः ॥ ४२ ॥

प्राङित्यस्मादुपसर्गसमुदायात्परेभ्य एभ्य किदिकः प्रत्ययो भवति ॥ पणि व्यवहारस्तुत्योः । प्रापणिको वणिक् ॥ पनि स्तुतौ । प्रापनिकः पथिकः ॥ कष हिंसायाम् । प्राकषिको वायुः खलो नर्तको मालाकारश्च ॥ प्रपूर्वात् पणेराङ्पूर्वाच्च कषेरिच्छन्त्यन्ये । प्रपणिको गन्धविक्रयी ॥ आकषिको न कर्तव्यः ॥ ४२ ॥

मुषेर्दीर्घश्च ॥ ४३ ॥

मुषेरिकः प्रत्ययो भवति दीर्घश्च स्वरस्य [भवति ॥] मूषिक आखुः॥ ४३ ॥

स्यमेः सीम् च ॥ ४४ ॥

स्यमेरिकः प्रत्ययो भवत्यस्य च सीमित्यादेशो भवति ॥ स्यमू शब्दे । सीमिको वृक्ष उदककृमिश्च । सीमिकोपजिह्विका ॥ सीमिकं वल्मीकम् ॥ केचित्सिमिति ह्रस्वोपान्त्यमादेशं प्रत्ययस्य च दीर्घत्वमिच्छन्ति । सिमीकः सूक्ष्मकृमिः ॥ ४४ ॥

कुशिकहृदिकमक्षिकेतिकपिपीलिकादयः ॥ ४५ ॥

एते किदिकप्रत्ययान्ता निपात्यन्ते । कुषेः श च । कुशिको मुनिः ॥ हृगो दोन्तश्च । हृदिको यादवः ॥ मषेः सोन्तश्च । मक्षिका क्षुद्रजातिः ॥ एतेस्तोन्तश्च । इतिको मुनिः ॥ पीलेर्द्वे च । पिपीलिका मध्यक्षामा कीटजातिः ॥ आदिग्रहणात् ग[ि][न्द]क[भु]रिकभुलिकादयो भवन्ति ॥ ४५ ॥

स्यमिकषिदूष्यनिमनिमलिवल्यलिपालिकाणिभ्य ईकः ॥ ४६ ॥

एभ्य ईकः प्रत्ययो भवति ॥ स्यमू शब्दे । स्यमीको वृक्षो वल्मीको नृपगोत्रं च । स्यमीकं जलम् । स्यमीका कृमिजातिः ॥ कष हिंसायाम् । कषीका कुद्दालिका ॥ दुषंच् वैकृत्ये । ण्यन्तः । दूषीका नेत्रमलो वीरणजातिर्वर्तिर्लता च ॥ अनक् प्राणने । अनीकं सेनासमूहः संग्रामश्च ॥ मनिंच् ज्ञाने । मनीकः सूक्ष्मः ॥ मलि धारणे । मलीकमञ्जनमरिश्च ॥ वलि संवरणे । वलीको बलवान्पटलान्तश्च । वलीकं वेश्मदारु ॥ अली भूषणादौ । अलीकमसत्यम् । अलीका । पण्यस्त्री । व्यलीकमपराधः । व्यलीका लज्जा ॥ पलण् रक्षणे । पालीकं तेजः ॥ कण शब्दे । कणीकः पटवासः । कणीका भिन्नतण्डुलावयवो वनस्पतिबीजं च ॥ ४६ ॥

जॄपॄदॄगॄवॄमॄभ्यो द्वे रश्चादौ ॥ ४७ ॥

एभ्य ईकः प्रत्ययो भवति द्वे च रूपे भवत एषां चादौ रो भवति ॥ जॄष्च् जरसि । जर्जरीका शतपत्री ॥ पॄश् पालनपूरणयोः । पर्परीका जलाशयः सूर्यश्च ।

पर्परीकोऽग्निः कुररो भक्ष्यः कुर्कुरश्च ॥ दॄश् विदारणे। दर्दरीको दाडिम इन्द्रो वादित्रविशेषो वादित्रभाण्डं च ॥ शॄश् हिंसायाम्। शर्शरीकः कृमिर्विकलेन्द्रियो दुष्टाश्वो लावकश्च। शर्शरीका मङ्गल्याभरणम् ॥ वृग्ट् वरणे। वर्वरीकः संवरणमुरणः पतत्री केशसंघातश्च। वर्वरीका सरस्वती ॥ मृत् प्राणत्यागे। मर्मरीकोऽग्निः सूरः श्येनश्च ॥ ४७ ॥

ऋच्यृजिहृषीषिदृशिमृडिशिलिनिलीभ्यः कित् ॥ ४८ ॥

एभ्यः किदीकः प्रत्ययो भवति ॥ ऋचत् स्तुतौ। ऋचीक ऋषिः ॥ ऋजि गतिस्थानार्जनोर्जनेषु। ऋजीकं वज्रं बलं स्थानं च ॥ हृषू अलीके। हृषच् तुष्टौ वा। हृषीकमिन्द्रियम् ॥ इषत् इच्छायाम्। ईष उञ्छे। ईषि गतिहिंसादर्शनेषु वा। इषीका। ईषीका च तृणशलाका ॥ दृशूं प्रेक्षणे। दृशीकं मनोज्ञम्। दृशीका रजस्वला ॥ मृडत् सुखने। मृडीकं सुखकृत्सुखं च ॥ शिलत् उञ्छे। शिलीकः सस्यविशेषः ॥ लीङ्च् श्लेषणे। निपूर्वः। निलीकं वृत्तम्। बाहुलकादीलुक् ॥ ४८ ॥

मृदेर्वोन्तश्च वा ॥ ४९ ॥

मृदेः किदीकः प्रत्ययो भवति वकारश्चान्तो वा भवति ॥ मृदश् क्षोदे। मृद्वीका मृदीका च द्राक्षा ॥ ४९ ॥

सृणीकास्तीकप्रतीकपूतीकसमीकवाहीकवाल्हीकवल्मीकक-
ल्मलीकतिन्तिडीककङ्कणीककिङ्किणीकपुण्डरीकच-
ञ्चरीकफर्फरीकझर्झरीकघर्घरीकादयः ॥५०॥

एते किदीकप्रत्ययान्ता निपात्यन्ते ॥ सर्तेर्णोन्तश्च। सृणीको वायुरग्निरशनिरुन्मत्तश्च। सृणीका लाला ॥ अस्तेस्तोन्तश्च। अस्तीको जरत्कारुसुतः ॥ प्रांक् पूरणे। प्रातेस्तोन्तो ह्रस्वश्च। प्राति शरीरमिति प्रतीको वायुरवयवः सुखं च। सुप्रतीको दिग्गजः ॥ पुवस्तोन्तश्च। पूतीकं तृणजातिः ॥ सम्पूर्वस्य एतेर्लुक् च। संयन्त्यस्मिन्निति समीकं संग्रामः ॥ वहिवल्ह्योर्दीर्घश्च। वाहीकः। वाल्हीकः। एतौ देशौ ॥ वलेर्मोन्तश्च। वल्मीको नाकुः ॥ कलेर्मलश्चान्तः। कल्मलीकं ज्वाला ॥ तिमेस्तिड् चान्तः। तिन्तिडीकः पक्षी वृक्षाम्लश्च। तन्तिडीक इति पूर्वस्येत्वं नेच्छन्त्येके ॥ चङ्क्षण्यतेः कङ्कण् च। कङ्कणीको घण्टाजालम् ॥ किमः परात् कणेः किण् च। किङ्किणीका घण्टिका ॥ पुणेर्डर् चान्तः पुण्डतेर्वा अर्। पुण्डरीकं पद्मं छत्त्रं व्याघ्रश्च ॥ चञ्चेरर् चान्तः। चञ्चरीको भ्रमरः ॥ पिपर्तेर्गुणो

इत्वं पकारयोः फत्वं रश्चान्तः पूर्वस्य । फर्फरीकं पल्लवं पादुका मर्दलिका च ॥ झीर्यतेर्ह्रस्वं तृतीयाभावः पूर्वस्य रश्चान्तः । झर्झरीकं देहः । झर्झरीका वादित्रभाण्डम् ॥ एवं घरतेः । घर्घरीका घण्टिका ॥ आदिग्रहणादन्येपि ॥ ५० ॥

मिवमिकटिभल्लिकुहेरुकः ॥ ५१ ॥

एभ्य उकः प्रत्ययो भवति ॥ डुमिंग्ट् प्रक्षेपणे । मयुक आतपः । बाहुलकात् मिग्मीग इति नात्वम् ॥ टुवमू उद्गिरणे । वमुको जलदः ॥ कटे वर्षावरणयोः । कटुको रसविशेषः ॥ भल्लि परिभाषणहिंसादानेषु । भल्लुक ऋक्षः ॥ कुहणि विस्मापने । कुहुकमाश्चर्यम् ॥ ५१ ॥

संविभ्यां कसेः ॥ ५२ ॥

आभ्यां परस्मात् कसेरुकः प्रत्ययो भवति ॥ कस गतौ । संकसुकः सुकुमारः परापवादशीलः श्राद्धाग्निश्च । संकसुकं व्यक्ताव्यक्तं संकीर्णं च ॥ विकसुको गुणवादी परिश्रान्तश्च ॥ ५२ ॥

क्रमेः कृम् च वा ॥ ५३ ॥

क्रमेरुकः प्रत्ययो भवत्यस्य च कृमित्यादेशो वा भवति ॥ क्रमू पादविक्षेपे । कृमुको बन्धनः । आदेशविधानबलाच्च न गुणः । क्रमुकः पूगतरुः ॥ ५३ ॥

कमितिमेर्दोन्तश्च ॥ ५४ ॥

आभ्यामुकः प्रत्ययो भवति दश्चान्तो भवति ॥ कमूङ् कान्तौ । कन्दुकः क्रीडनकम् ॥ तिमच् आर्द्रभावे । तिन्दुको वृक्षः ॥ ५४ ॥

मण्डेर्मड्डु च ॥ ५५ ॥

मण्डेरुकः प्रत्ययो भवति मड्डश्चादेशो भवति ॥ मडु भूषायाम् । मड्डुको वाद्यविशेषः ॥ ५५ ॥

कण्यणेर्णित् ॥ ५६ ॥

आभ्यां णिदुकः प्रत्ययो भवति ॥ कण अण शब्दे । काणुकः काको हिंस्रश्च । काणुकमाणुकं चाक्षिमलम् ॥ ५६ ॥

कञ्चुकांशुकनंशुकपाकुकहिंशुकचिबुकजम्बुकचुलुकचूचुकोल्मुकभावुकपृथुकमधुकादयः ॥ ५७ ॥

एते किदुकप्रत्ययान्ता निपात्यन्ते ॥ कचि बन्धने । अशौटि व्याप्तौ । नशौच् अदर्शने । एषां स्वरान्नोन्तश्च । कञ्चुकः कूर्पासः । अंशुकं वस्त्रम् । नंशुको

रणरेणुः प्रवासशीलश्चन्द्रः प्रावरणं च ॥ पचेः पाक् च। पाकुको लघुपाची सूपः सूपकारोऽध्वर्युश्च ॥ हिनोतिचिनोतिजमतीनां बोऽन्तश्च। हिवुकं लग्नाच्चतुर्थस्थानं रसातलं च ॥ चिवुकं मुखाधोभागः ॥ जम्बुकः सृगालः ॥ चुलुम्पः सौत्रः। अन्त्यस्वरादिलोपश्च। चुलुम्पतीति चुलुकः करकोशः ॥ चतेश्चूच। चूचुकः स्तनाग्रभागः। ज्वलेरुल्म् च। उल्मुकमलातम् ॥ भातेर्वोऽन्तश्च। भावुको भगिनीपतिः॥ प्रथिष् प्रख्याने। पृथुकः शिशुर्व्रीह्याद्यभ्यूषश्च ॥ मचि कल्कने। धश्चान्तादेशः। मधुकं यष्टीमधुः ॥ आदिग्रहणात् वालुकीवालुकादयो भवन्ति ॥ ५७ ॥

मृमन्यञ्जिजलिवलितलिमलिमल्लिभालिमण्डिबन्धिभ्य ऊकः ॥ ५८ ॥

एभ्य ऊकः प्रत्ययो भवति ॥ मृंत् प्राणत्यागे। मरूको मयूरो मृगो निर्दश-नेभस्तृणं च ॥ मनिंच् ज्ञाने। मनूकः कृमिजातिः ॥ अञ्जौप् व्यक्तिम्रक्षणगतिषु। अञ्जूको हिंस्रः॥ जल घात्ये। जलूका जलजन्तुः ॥ वल प्राणनधान्यावरोधनयोः। वलूक उत्पलमूलं मत्स्यश्च ॥ तलण् प्रतिष्ठायाम्। तलूकस्त्वक्कृमिः ॥ मलि धारणे। मलूकः सरोजशकुनिः ॥ मल्लि धारणे। मल्लूकः कृमिजातिः ॥ भलिण् आभण्डने। भालूक ऋक्षः ॥ मडु भूषायाम्। मण्डूको दर्दुरः ॥ बन्धंश् बन्धने। बन्धूको बन्धुजीवः ॥ ५८ ॥

शल्यणेर्णित् ॥ ५९ ॥

आभ्यां णिदूकः प्रत्ययो भवति ॥ पल फल शल गतौ। शालूकं जलकन्दो वलवांश्च ॥ अण शब्दे। आणूकमक्षिमलम् ॥ ५९ ॥

कणिभल्लेर्दीर्घश्च वा ॥ ६० ॥

आभ्यामूकः प्रत्ययो [भवति] दीर्घश्चानयोर्वा भवति ॥ कण शब्दे। कणूको धान्यस्तोकः। काणूकः पक्षी। काणूकमक्षिमलं तमो वा ॥ भल्लि परि-भाषणहिंसादानेषु। भल्लूको भाल्लूकश्च ऋक्षः ॥ ६१ ॥

शम्बूकशाम्बूकवृधूकमधूकोलूकोरुवूकवरूकादयः ॥ ६१ ॥

एत ऊकप्रत्ययान्ता निपात्यन्ते ॥ शमेर्बोऽन्तो दीर्घश्च वा। शम्बूकः शङ्खः। शाम्बूकः स एव ॥ वृञ् भरणे। अस्य वृधभावश्च। वृधूको मातृवाहकः। वृधूकं जलम् ॥ मदेर्धश्च। मदयतीति मधूको वृक्षः ॥ अलेरुच्चोपान्त्यस्य। उलूकः काकारिः ॥ उरुपूर्वात् वातेः किच्च। उरु वाति। उरुवूक एरण्डः ॥ वृधेर्लोपश्च। वर्धत इति वरूकस्तृणजातिः ॥ आदिग्रहणात् अनूकवावदूकादयो भवन्ति ॥ ६१ ॥

किरोङ्को रो लश्च वा ॥ ६२॥

किरतेरङ्कः प्रत्ययो भवति रेफस्य च लकारादेशो वा भवति॥ करङ्कः समुद्रः। कलङ्को लाञ्छनम्॥ ६२॥

शलापाकाभ्यः कित्॥ ६३॥

एभ्यः किदङ्कः प्रत्ययो भवति॥ रांक् दाने। रङ्कोवलीयान्॥ लांक् आदाने। लङ्का पुरी॥ पांक् रक्षणे। पङ्कः कर्दमः॥ कैं शब्दे। कङ्कः पक्षी॥ ६३॥

कुलिचिरिभ्यामिङ्कक्॥ ६४॥

आभ्यामिङ्कक् प्रत्ययो भवति॥ कुल बन्धुसंस्त्यानयोः। कुलिङ्कश्चटका॥ चिर हिंसायां सौत्रः। चिरिङ्कं जलयन्त्रम्॥ ६४॥

कलेरविङ्कः॥ ६५॥

कलेरविङ्कः प्रत्ययो भवति॥ कलि शब्दसंख्यानयोः। कलविङ्को गृहचटकः॥ ६५॥

क्रमेरेलकः॥ ६६॥

क्रमू पादविक्षेपे। इत्यस्मादेलकः प्रत्ययो भवति। क्रमेलकः करभः॥ ६६॥

जीवेरातृको जैव् च॥ ६७॥

जीव प्राणधारणे। इत्यस्मादातृकः प्रत्ययो भवति जैवित्यादेशश्च [भवति]॥ जैवातृक आयुष्माञ्चन्द्र आम्रो वैद्यो मेघश्च। जैवातृका जीवद्वत्सा स्त्री॥ ६७॥

हृभूलाभ्य आणकः॥ ६८॥

एभ्य आणकः प्रत्ययो भवति॥ हृंग् हरणे। हराणकश्चौरः॥ भू सत्तायाम्। भवाणको गृहपतिः॥ लांक् आदाने। लाणको हस्ती॥ ६८॥

प्रियः कित्॥ ६९॥

प्रींग्श् तृप्तिकान्त्योः। इत्यस्मादाणकः प्रत्ययो भवति स च कित् [भवति]॥ प्रियाणकः पुत्रः॥ ६९॥

धालूशिङ्घिभ्यः॥ ७०॥

योगविभाग उत्तरार्थः। एभ्य आणकः प्रत्ययो भवति॥ डुधांग्क् धारणे च। धाणको दीनारद्वादशभागो हविषां महच्छिद्रपिधानं च॥ लूग्श् छेदने। लवाणकः कालस्तृणजातिर्दात्रं च॥ शिघु आघ्राणे। शिङ्घाणको नासिकामलः॥ ७०॥

शीभीराजेश्चानकः ॥ ७१ ॥

शीभीराजिभ्यो धालूशिङ्घिभ्यश्च आनकः प्रत्ययो भवति ॥ शीङ्क् स्वप्ने। शयानकोजगरः शैलश्च ॥ ञिभींक् भये। बिभेत्यस्मादिति भयानको भीमो व्याघ्रो वराहो राहुश्च ॥ राजृग् दीप्तौ। राजानकः क्षत्रियः ॥ डुधांग्क् धारणे च। धानका हेमादिपरिमाणम् ॥ लूग्श् छेदने। लवानको देशविशेषो दात्रं च ॥ शिङ्घन्त्यनेनेति शिङ्घानकः श्लेष्मायुः पुरीषं च ॥ ७१ ॥

अर्णोर्डित् ॥ ७२ ॥

अर्णेर्डिदानकः प्रत्ययो भवति ॥ अण शब्दे। आनकः पटहः ॥ ७२ ॥

कनेरीनकः ॥ ७३ ॥

कनै दीप्तिकान्तिगतिषु। इत्यस्मादीनकः प्रत्ययो भवति ॥ कनीनकः कनीनका वाक्षितारका ॥ ७३ ॥

गुड ईधुकएधुकौ ॥ ७४ ॥

गुंड् शब्दे। इत्यस्मादीधुक एधुक इत्येतौ प्रत्ययौ भवतः ॥ गवीधुकं नगरं धान्यजातिश्च ॥ गवेधुका तृणजातिः ॥ ७४ ॥

वृतेस्तिकः ॥ ७५ ॥

वृतूङ् वर्तने। इत्यस्मात्तिकः प्रत्ययो भवति ॥ वर्त्तिका चित्रकरोपकरणं शकुनिर्द्रव्यगुटिका च ॥ ७५ ॥

कृतिपुतिलतिभिदिभ्यः कित् ॥ ७६ ॥

एभ्यः कित्तिकः प्रत्ययो भवति ॥ कृतैत् छेदने। कृत्तिका नक्षत्रम्। पुतिलती सौत्रौ। पुत्तिका मधुमक्षिका ॥ लत्तिका वाद्यविशेषो गौर्गोधा च। गोपूर्वात्। गोलत्तिका गृहगोलिका। अवपूर्वात्। अवलत्तिका गोधा। आलत्तिका गानप्रारम्भः ॥ भिदृंपी विदारणे। भित्तिका कुड्यं माषादिचूर्णं शरावती च नदी ॥ ७६ ॥

इष्यशिमासिभ्यस्तकक् ॥ ७७ ॥

एभ्यस्तकक् प्रत्ययो भवति ॥ इषत् इच्छायाम्। इष्टका मृद्विकारः ॥ अशौटि व्याप्तौ। अष्टका श्राद्धतिथयस्तिस्रोष्टम्यः पितृदैवत्यं च ॥ मसैच् परिणामे। मस्तकं शिरः ॥ ७७ ॥

भियो द्वे च ॥ ७८ ॥

ञिभींक् भये। इत्यस्मात्तकक् प्रत्ययो भवति द्वे च रूपे भवतः ॥ बिभीतकोऽक्षः ॥ ७८ ॥

हृरुहिपिण्डिभ्य ईतकः ॥ ७९ ॥

एभ्य ईतकः प्रत्ययो भवति ॥ हृंग् हरणे। हरीतकी पथ्या ॥ रुहं जन्मनि। रोहीतको वृक्षविशेषः ॥ पिडुङ् संघाते। पिण्डीतकः करहाटः ॥ ७९ ॥

कुपेः कित् ॥ ८० ॥

कुपश् निष्कर्षे। इत्यस्मात्किदीकः प्रत्ययो भवति ॥ कुपीतक ऋषिः ॥८०॥

बलिविलिशलिदमिभ्य आहकः ॥ ८१ ॥

एभ्य आहकः प्रत्ययो भवति ॥ बल प्राणनधान्यावरोधयोः ॥ बलाहको मेघो वातश्च ॥ बिलत् भेदने। बिलाहको वज्रः। बाहुलकान्न गुणः ॥ शल गतौ। शलाहको वायुः ॥ दमूच् उपशमे। दमाहकः शिष्यः ॥ ८१ ॥

चण्डिभल्लिभ्यामातकः ॥ ८२ ॥

आभ्यामातकः प्रत्ययो भवति ॥ चडुङ् कोपे। चण्डातकं नर्तक्यादिवासः ॥ भल्लि परिभाषणहिंसादानेषु। भल्लातको वृक्षः ॥ ८२ ॥

श्लेष्मातकाम्रातकामिलातकपिष्टातकादयः ॥ ८३ ॥

एत आतकप्रत्ययान्ता निपात्यन्ते ॥ श्लिषेर्मश्च परादिः। श्लेष्मातकः कफेलुः ॥ अमेर्वृद्धौ रश्चान्तः। आम्रातको वृक्षः ॥ नञः परस्य म्लायतेर्मिल् च। अमिलातकं वर्णपुष्पम् ॥ पिषेस्तोन्तश्च। पिष्टातकं वर्णचूर्णम् ॥ आदिग्रहणात् कोशातक्यादयो भवन्ति ॥ ८३ ॥

शमिमनिभ्यां खः ॥ ८४ ॥

आभ्यां खः प्रत्ययो भवति ॥ शमूच् उपशमे। शङ्खः कम्बुर्निधिश्च ॥ मनिंच् ज्ञाने। मङ्खो मागधः कृपणश्चित्रपटश्च। मङ्खा मङ्गलम् ॥ ८४ ॥

श्यतेरिच्च वा ॥ ८५ ॥

शोंच् तक्षणे। इत्यस्मात्खः प्रत्ययो [भवति] इश्चास्यान्तादेशो वा भवति ॥ शिखा चूडा ज्वाला च। विशिखापणः। विशिखो बाणः। शाखा विटपः। विशाखा नक्षत्रम्। विशाखः स्कन्दः ॥ ८५ ॥

पूमुहोः पुन्मूरौ च ॥ ८६ ॥

पूङ् पवने । मुहौच् वैचित्त्ये । इत्येताभ्यां खः प्रत्ययो [भव]त्यनयोश्च यथा-संख्यं पुन्मूरित्यादेशौ भवतः ॥ पुङ्खो बाणबुध्नभागो मङ्गलाचारश्च ॥ मूर्खोऽज्ञः ॥८६॥

अशेर्डित् ॥ ८७ ॥

अशौटि व्याप्तौ । इत्यस्माड्डित्खः प्रत्ययो भवति ॥ अश्नुत इति खमाकाश-मिन्द्रियं च । नास्य खमस्तीति नखः । शोभनानि खान्यस्मिन् सुखम् । दुष्टानि खा-न्यस्मिन् दुःखम् ॥ ८७ ॥

उषेः किल्लुक् च ॥ ८८ ॥

उषू दाहे । इत्यस्मात्कित्खः [प्रत्ययो] भवति लुक् चान्त्यस्य भवति ॥ उषन्त्यस्यामित्युखा स्थाल्यूर्ध्वक्रिया वा ॥ ८८ ॥

महेरुच्चास्य वा ॥ ८९ ॥

मह पूजायाम् । इत्यस्मात्खः प्रत्ययोन्तलुगकारस्य च उकारादेशो वा भवति ॥ मुखमाननम् । मखो यज्ञोऽध्वर्युरीश्वरश्च ॥ ८९ ॥

न्युङ्खादयः ॥ ९० ॥

न्युङ्खादयः शब्दाः खप्रत्ययान्ता निपात्यन्ते ॥ नयतेः ख उन् चान्तः । न्युङ्खाः षडोंकाराः ॥ आदिग्रहणादन्येऽपि ॥ ९० ॥

मयेधिभ्यामूखेखौ ॥ ९१ ॥

मयि गतौ । एधि वृद्धौ । इत्याभ्यां यथासंख्यमूख इख इत्येतौ प्रत्ययौ भवतः ॥ मयूखो रश्मिः ॥ एधिखो वराहः ॥ ९१ ॥

गम्यमिरम्यजिगद्यदिछागाडिखडिगॄभृवृस्वृभ्यो गः ॥ ९२ ॥

एभ्यो गः प्रत्ययो भवति ॥ गमॢ गतौ । गङ्गा देवनदी ॥ अम गतौ । अङ्गं शरीरावयवः । अङ्गः समुद्रो वह्नी राजा च । अङ्गा जनपदः ॥ रमिं क्रीडायाम् । रङ्गो नाट्यस्थानम् ॥ अज क्षेपणे च । वेगस्त्वरा रेतश्च ॥ गद व्यक्तायां वाचि । गद्गो वाग्विकलः ॥ अदंक् भक्षणे । अद्गः समुद्रोऽग्निः पुरोडाशश्च ॥ छोंच् छेदने । छागो वस्तः ॥ गड सेचने । गड्गो मृगजातिः ॥ खडण् भेदे । खड्गो मृगविशेषोऽसिश्च ॥ गॄत् निगरणे । गर्गे ऋषिः ॥ डुडुभृंग्क् पोषणे च । भर्गो रुद्रः सूर्यश्च ॥ वृग्ट् वरणे । वर्गः संघातः ॥ औस्वृ शब्दोपतापयोः । स्वर्गो नाकः ॥ ९२ ॥

पूमुदिभ्यां कित् ॥ ९३ ॥

आभ्यां किद्गः प्रत्ययो भवति ॥ पूग्श् पवने। पूगः संघातः क्रमुकश्च ॥ मुदि हर्षे। मुद्गो धान्यविशेषः ॥ ९३ ॥

भृवृभ्यां नोन्तश्च ॥ ९४ ॥

आभ्यां किद्गः प्रत्ययो [भवति] नकारश्चान्तो भवति ॥ डुडुभृंग्क् पोषणे च। भृङ्गः पक्षी भ्रमरो वर्णविशेषो लवङ्गश्च ॥ वृग्ट् वरणे। वृङ्ग उपपतिः ॥ ९४ ॥

द्रमो णिद्वा ॥ ९५ ॥

द्रम गतौ। इत्यस्माद्गः प्रत्ययो भवति स च णिद्वा भवति ॥ द्राङ्गं शीघ्रम्। द्राङ्गः पांशुः। द्रङ्गो नगरम्। द्रङ्गा शुल्कशाला ॥ ९५ ॥

शृङ्गशार्ङ्गादयः ॥ ९६ ॥

शृङ्गादयः शब्दा गप्रत्ययान्ता निपात्यन्ते ॥ शृश् हिंसायाम्। इत्यस्य नोन्तो ह्रस्वश्च। शृङ्गं विषाणं शिखरं च। तस्यैव नोन्तो वृद्धिश्च। शार्ङ्गः पक्षी। आदिग्रहणात् हृंग् हरणे। हार्गः परितोषः ॥ मृत् प्राणत्यागे। मार्गः पन्थाः ॥ ९६ ॥

तडेरागः ॥ ९७ ॥

तडण् आघाते। इत्यस्मादागः प्रत्ययो भवति ॥ तडागं सरः ॥ ९७ ॥

पतितमितॄपॄकॄशॄल्वादेरङ्गः ॥ ९८ ॥

एभ्योङ्गः प्रत्ययो भवति ॥ पत्लृ गतौ। पतङ्गः पक्षी शलभः सूर्यः शालिविशेषश्च ॥ तमूच् काङ्क्षायाम्। तमङ्गो हर्म्यनिर्यूहः ॥ तॄ प्लवनतरणयोः। तरङ्ग ऊर्मिः ॥ पॄश् पालनपूरणयोः। परङ्गः खगो वेगश्च ॥ कॄत् विक्षेपे। करङ्गः कर्मशीलः ॥ शॄश् हिंसायाम्। शरङ्गः पक्षिविशेषः ॥ लूग्श् छेदने। लवङ्गः सुगन्धिवृक्षः ॥ आदिग्रहणादन्येभ्योपि ॥ ९८ ॥

सृवॄनॄभ्यो णित् ॥ ९९ ॥

एभ्यो णिदङ्गः प्रत्ययो भवति ॥ सृं गतौ। सारङ्गो हरिणश्चातको शबलवर्णश्च ॥ वृग्ट् वरणे। वारङ्गः काण्डखड्गयोः शल्यं शकुनिश्च ॥ नॄश् नये। नारङ्गो वृक्षजातिः ॥ ९९ ॥

मनेर्मत्मातौ च ॥ १०० ॥

मनिंच् ज्ञाने। इत्यस्मादङ्गः प्रत्ययो [भवति] मत्मातौ चास्यादेशौ भवतः ॥ मतङ्ग ऋषिर्हस्ती च ॥ मातङ्गो हस्त्यन्त्यजातिश्च ॥ १०० ॥

विडिविलिकुरिमृदिपिशिभ्यः कित् ॥ १०१ ॥

एभ्यः किदङ्गः प्रत्ययो भवति ॥ विड आक्रोशे । विडङ्गो वृक्षजातिर्गृहावयवश्च ॥ विलत् वरणे । बिलत् भेदने वा । विलङ्ग औषधम् ॥ कुरत् शब्दे । कुरङ्गो हरिणः । कुरङ्गी भोजकन्या ॥ मृदश् क्षोदे । मृदङ्गो मुरजः ॥ पिशत् अवयवे । पिशङ्गो वर्णः ॥ १०१ ॥

स्फुलिकलिपल्याद्भ्य इङ्गक् ॥ १०२ ॥

स्फुल्यादिभ्य आदन्तेभ्यश्च इङ्गक् प्रत्ययो भवति ॥ स्फुलत् संचये च । स्फुलिङ्गः स्फुलिङ्गा चाग्निकणः ॥ कलि शब्दसंख्यानयोः । कलिङ्गो राजा । कलिङ्गा जनपदः ॥ पल गतौ । पलिङ्ग ऋषिः शिला च ॥ पातेः । पिङ्गः ॥ भातेः । भिङ्गः । द्वावपि वर्णविशेषौ ॥ ददातेः । दिङ्गोऽध्यक्षः ॥ दधातेः । धिङ्गः श्रेष्ठी ॥ लातेः । लिङ्गं स्त्रीत्वादि हेतुश्च । आलिङ्गो वाद्यविशेषः ॥ श्यतेः शिङ्गो वनस्पतिः किशोरश्च ॥ १०२ ॥

भलेरिदुतौ चातः ॥ १०३ ॥

भलिण् आभण्डने । इत्यस्मादिङ्गक् प्रत्ययो भवत्यकारस्य च इकार-उकारौ भवतः ॥ भिलिङ्गः कर्मारोपकरणम् । भुलिङ्ग ऋषिः पक्षी [च] । भुलिङ्गाः साल्वावयवाः ॥ १०३ ॥

अदेर्णित् ॥ १०४ ॥

अदंक् भक्षणे । इत्यस्मादिङ्गक् प्रत्ययो भवति स च णित् [भवति] ॥ आदिङ्गो वाद्यजातिः ॥ १०४ ॥

उच्चिलिङ्गादयः ॥ १०५ ॥

उच्चिलिङ्गादयः शब्दा इङ्गक्प्रत्ययान्ता निपात्यन्ते ॥ उत्पूर्वात् चलेरस्येत्वं च । उच्चिलिङ्गो दाडिमी ॥ आदिग्रहणादन्येपि ॥ १०५ ॥

माङस्तुलेरुङ्गक् च ॥ १०६ ॥

माङ्पूर्वात् तुलण् उन्माने । इत्यस्मादुङ्गक् इङ्गक् च प्रत्ययौ भवतः ॥ मातुलुङ्गो बीजपूरः । मातुलिङ्गः स एव ॥ १०६ ॥

कमितमिशमिभ्यो डित् ॥ १०७ ॥

एभ्यो डिदुङ्गः प्रत्ययो भवति ॥ कमूङ् कान्तौ । कुङ्गा जनपदः ॥ तमूच्

काङ्क्षायाम् । तुङ्गो महावर्ष्मा ।। शमूच् उपशमे । शुङ्गो मुनिः । शुङ्गाः कन्दल्यः । शुङ्गा विनता ।। १०७ ।।

सर्तेः सुर् च ।। १०८ ।।

सृं गतौ । इत्यस्मादुङ्गः प्रत्ययो [भवति] सुर् चास्यादेशो भवति ।। सु-[रु]ङ्गा गूढमार्गः ।। १०८ ।।

स्थार्तिजनिभ्यो घः ।। १०९ ।।

एभ्यो घः प्रत्ययो भवति ।। ष्ठां गतिनिवृत्तौ । स्थाघो गाधः ।। ऋं प्रापणे च । अर्घो मूल्यं मानप्रमाणं पादोदकादि च ।। जनैचि प्रादुर्भावे । जङ्घा शरीरावयवः ।। १०९ ।।

मघाघङ्घाघदीर्घादयः ।। ११० ।।

एते घप्रत्ययान्ता निपात्यन्ते ।। मङ्केर्नधलोपश्च । मघा नक्षत्रम् ।। हन्तेर्हस्य घश्च । घङ्घो घस्मरः । घङ्घा काङ्क्षा ।। अमेर्लुक् च । अघं पापम् ।। दृणातेर्दीर् च । दीर्घ आयत उच्चश्च ।। आदिशब्दादन्येपि ।। ११० ।।

सर्तेरघः ।। १११ ।।

सृं गतौ । इत्यस्मादघः प्रत्ययो भवति ।। सरघा मधुमक्षिका ।।१११।।

कुपूसमिण्भ्यश्चट् दीर्घश्च ।। ११२ ।।

कुपूभ्यां सम्पूर्वाच्च इणश्चट् प्रत्ययो [भवति] दीर्घश्च भवति । टो ङ्यर्थः ।। कुंङ् शब्दे । कूचो हस्ती । कूची प्रमदा चित्रभाण्डमुदश्चिद्विकारश्च ।। पूग्श् पवने । पूचः पूची मुनिः ।। इण्क् गतौ । समीच ऋत्विक् । समीचं मिथुनयोगः । समीची पृथिवी । उदीची च । दीर्घवचनाद्गुणो न भवति ।। ११२ ।।

कूर्चचूर्चादयः ।। ११३ ।।

कूर्च इत्यादयः शब्दाश्चट्प्रत्ययान्ता निपात्यन्ते ।। कवतेः किरतेः करोतेर्वा । ऊरादेशश्चान्तस्य । कूर्चं श्मश्र्वासनं तन्तुवायोपकरणं यतिपवित्रकं च । कूर्चमिव कूर्चकः कूर्चिकेति च भवति ।। चरतेश्चोरयतेर्वा चूरादेशश्च । चूर्चो बलवान् ।। आदिशब्दादन्येपि ।। ११३ ।।

कल्यविमदिमणिकुकणिकुटिकूभ्योचः ।। ११४ ।।

एभ्योचः प्रत्ययो भवति ।। कलि शब्दसंख्यानयोः । कलचो गणकः ।।

अव रक्षणादौ । अवच उच्चैस्तरः ॥ मदैच् हर्षे । मदचो मत्तः ॥ मण शब्दे । मणचः शकुनिः ॥ कुंङ् शब्दे । कवचं वर्म ॥ कण शब्दे । कणचः कणयः ॥ कुटत् कौटिल्ये । कुटचो वृक्षजातिः ॥ कॄत् विक्षेपे । करचो धान्यावपनम् ॥ ११४ ॥

क्रकचादयः ॥ ११५ ॥

क्रकच इत्यादयः शब्दा अचप्रत्ययान्ता निपात्यन्ते ॥ क्रमेः कश्च । क्रकचः करपत्त्रः ॥ आदिशब्दादन्येपि ॥ ११५ ॥

पिशेराचक् ॥ ११६ ॥

पिशत् अवयवे । इत्यस्मादाचक् प्रत्ययो भवति ॥ पिशाचो व्यन्तरजातिः ॥ ११६ ॥

मृत्रपिभ्यामिचः ॥ ११७ ॥

आभ्यामिचः प्रत्ययो भवति ॥ मृंत् प्राणत्यागे । मरिचमूषणम् ॥ त्रपौषि लज्जायाम् । त्रपिचा कुथा ॥ ११७ ॥

म्रियतेरीचण् ॥ ११८ ॥

मृंत् प्राणत्यागे । इत्यस्मादीचण् प्रत्ययो भवति ॥ मारीचो रावणमातुलः ॥ ११८ ॥

लषेरुचः कश्च ॥ ११९ ॥

लषी कान्तौ । इत्यस्मादुचः प्रत्ययो [भव] त्यन्त्यस्य च को भवति ॥ लकुचो वृक्षजातिः ॥ ११९ ॥

गुडेरूचट् ॥ १२० ॥

गुडत् रक्षायाम् । इत्यस्मादूचट् प्रत्ययो भवति ॥ गुडूची छिन्नरुहा ॥ कुडादित्वा[ड्डि]त्वम् ॥ १२० ॥

सिवेर्डित् ॥ १२१ ॥

षिवूच् उतौ । इत्यस्माड्डिदूचट् प्रत्ययो भवति ॥ सूचः पिशुनः स्त्रियश्च । सूची संधानकरणी ॥ १२१ ॥

चिमेर्डोचडञ्चौ ॥ १२२ ॥

चिमिभ्यां प्रत्येकं डोच डञ्च इति प्रत्ययौ भवतः । वचनभेदान्न यथासंख्यम् ॥

चिंगट् चयने । चोचो वृक्षविशेषः । चञ्चा तृणमयः पुरुषः ॥ डुमिंगट् प्रक्षेपणे । मोचा कदली । मञ्चः पर्यङ्कः ॥ १२२ ॥

कुटिकुलिकल्युदिभ्य इञ्चक् ॥ १२३ ॥

एभ्य इञ्चक् प्रत्ययो भवति ॥ कुटेः । कुटिञ्चः क्षुद्रकर्कटः ॥ कुलेः । कुलिञ्चो राशिः ॥ कलेः । कलिञ्च उपशाखावयवः ॥ उद आघाते सौत्रः । उदिञ्चः कोणो येन तूर्यं वाद्यते परपुष्टश्च ॥ १२३ ॥

तुदिमदिपद्यदिगुगमिकचिभ्यश्छक् ॥ १२४ ॥

एभ्यश्छक् प्रत्ययो भवति ॥ तुदींत् व्यथने । तुच्छः स्तोकः ॥ मदैच् हर्षे । मच्छो मत्स्यः प्रमत्तपुरुषश्च । मच्छा स्त्री ॥ पदिंच् गतौ । पच्छः शिला ॥ अदंक् भक्षणे । अच्छो निर्मलः ॥ गुंङ् शब्दे ॥ गुच्छः स्तवकः ॥ गम्लृं गतौ । गच्छः क्षुद्रवृक्षः ॥ कचि बन्धने । कच्छः कूर्मपादः कुक्षिर्नद्यवकुटारश्च । कच्छा जनपदः ॥ बाहुलकात्कत्वाभावः ॥ १२४ ॥

पीपूङो ह्रस्वश्च ॥ १२५ ॥

आभ्यां छक् प्रत्ययो [भवति] ह्रस्वश्च भवति ॥ पींङ्च् पाने । पिच्छं शकुनिपत्त्रम् । पिच्छो गुणविशेषः । यद्वान् पिच्छिल उच्यते ॥ पूङ् पवने । पुच्छं वालधिः ॥ १२५ ॥

गुलुञ्छपिलिपिञ्छैधिच्छादयः ॥ १२६ ॥

एते छप्रत्ययान्ता निपात्यन्ते । गुडेर्ल उम् चान्तः । गुलुञ्छः स्तवकः ॥ पीलेरिपि नोन्तो ह्रस्वश्च । पिलिपिञ्छो रक्षोविशेषः ॥ एधेरिट् च । एधिच्छो नगः ॥ आदिग्रहणात् पिञ्छादयोपि भवन्ति ॥ १२६ ॥

वियो जक् ॥ १२७ ॥

वींक् प्रजननकान्त्यसनखादनेषु च । इत्यस्माज्जक् प्रत्ययो भवति ॥ बीजमुत्पत्तिहेतुः ॥ १२७ ॥

पुवः पुन् च ॥ १२८ ॥

पूङ् पवने । इत्यस्माज्जक् प्रत्ययो [भव]त्यस्य च पुनित्यादेशो भवति ॥ पुञ्जो राशिः ॥ १२८ ॥

कुवः कुब्कुनौ च ॥ १२९ ॥

कुङ् शब्दे । इत्यस्माज्जक् प्रत्ययो भवत्यस्य च कुब् कुन् इत्यादेशौ भवतः ॥ कुब्जो वक्रानताङ्गो गुच्छश्च ॥ कुञ्जो हनुः पर्वतैकदेशश्च । निकुञ्जो गहनम् ॥ १२९ ॥

कुटेरजः ॥ १३० ॥

कुटत् कौटिल्ये । इत्यस्मादजः प्रत्ययो भवति ॥ कुटजो वृक्षविशेषः ॥ कु[ड]ादित्वा[ङ्]त्त्वम् । कुटजी ॥ १३० ॥

भिषेर्भिषभिष्णौ च वा ॥ १३१ ॥

भिषेरजः प्रत्ययो [भवति] भिष भिष्ण इत्यादेशौ चास्य वा भवतः ॥ भिषिः सौत्रः । भिषजः । आदेशबलान्न गुणः । भिष्णजो वैद्यः । भेषजमौषधम् ॥ १३१ ॥

मुर्वेर्मुर् च ॥ १३२ ॥

मुर्वै बन्धने । इत्यस्मादजः प्रत्ययो [भव]त्यस्य च मुर् इत्यादेशो भवति ॥ मुरजो मृदङ्गः ॥ १३२ ॥

बलेर्वोन्तश्च वा ॥ १३३ ॥

बल प्राणनधान्यावरोधयोः । इत्यस्मादजः प्रत्ययो [भवति] वकारश्चान्तो वा भवति ॥ बल्वजो मुञ्जविशेषः । बलजा सबुसो धान्यपुञ्जः ॥ १३३ ॥

उटजादयः ॥ १३४ ॥

उटजादयः शब्दा अजप्रत्ययान्ता निपात्यन्ते ॥ वटेर्वस्य उत्वं च । उटजं मुनिकुटीरः ॥ आदिशब्दात् भूर्जभरुजादयो भवन्ति ॥ १३४ ॥

कुलेरिजक् ॥ १३५ ॥

कुल बन्धुसंस्त्यानयोः । इत्यस्मादिजक् प्रत्ययो भवति ॥ कुलिजं मानम् ॥ १३५ ॥

कृगोऽञ्जः ॥ १३६ ॥

करोतेरञ्जः प्रत्ययो भवति ॥ करञ्जो वृक्षजातिः ॥ १३६ ॥

झमेर्झः ॥ १३७ ॥

झमू अदने । इत्यस्माज्झः प्रत्ययो भवति ॥ झञ्झा सशीकरो मेघवातः ॥ १३७ ॥

लुपेष्टः ॥ १३८ ॥

लुप स्तेये । इत्यस्माट्टः प्रत्ययो भवति ॥ लोटो मृत्पिण्डः ॥ १३८ ॥

नमितनिजनिवनिसनो लुक् च ॥ १३९ ॥

एभ्यष्टः प्रत्ययो भवति लुक् चान्तस्य भवति ॥ णमं प्रह्वत्वे । नटो भरतपुत्रः ॥ तनूयी विस्तारे । तटं कूलम् ॥ जनैचि प्रादुर्भावे । जटा ग्रथितकेशसंघातः ॥ वन षन भक्तौ । वटो न्यग्रोधः ॥ सटाग्रथितः केशसंघातः ॥ १३९ ॥

जनिपणिकिज़ुभ्यो दीर्घश्च ॥ १४० ॥

एभ्यष्टः प्रत्ययो [भवति] दीर्घश्चैषां गुणापवादो भवति ॥ जनैचि प्रादुर्भावे । पणि व्यवहारस्तुत्योः । जाण्टः । पाण्टः । [वृ]क्षविशेषावेतौ ॥ किजू सौत्रौ । कीटः क्षुद्रजन्तुः ॥ जूटो मौलिः ॥ १४० ॥

घटाघाटाघण्टादयः ॥ १४१ ॥

एते टप्रत्ययान्ता निपात्यन्ते ॥ हन्तेर्घघाघनश्च । घटा वृन्दम् ॥ घाटा स्वाङ्गम् ॥ घण्टा वाद्यविशेषः ॥ आदिग्रहणात् छटादयो भवन्ति ॥ १४१ ॥

दिव्यविश्रुकुकर्विशकिकङ्किकृपिचपिचमिकम्येधिकर्किमर्किकाक्खितृकृसृभृवृभ्योटः ॥ १४२ ॥

एभ्योटः प्रत्ययो भवति ॥ दिवूच् क्रीडादौ । देवटो देवकुलविशेषः शिल्पी च ॥ अव रक्षणादौ । अवटः प्रपातः कूपश्च ॥ श्रुंट् श्रवणे । श्रवटश्छत्त्रम् ॥ कुंङ् शब्दे । कवट उच्छिष्टम् ॥ कर्व गतौ । कर्वटं क्षुद्रपत्तनम् ॥ शक्लंट् शक्तौ । शकटमनः ॥ ककुङ् गतौ । कङ्कटः संनाहः । कङ्कटं सीमा ॥ कृपौङ् सामर्थ्ये । कर्पटं वासः ॥ चप सान्त्वने । चपटो रसः ॥ चमू अदने । चमटो घस्मरः ॥ कमूङ् कान्तौ । कमटो वामनः ॥ एधि वृद्धौ । एधटो वल्मीकः ॥ कर्किमर्की सौत्रौ । कर्कटः कपिलः कुलीरश्च । कर्कटी त्रपुसी ॥ मर्कटः कपिः क्षुद्रजन्तुश्च ॥ कक्ख हसने । कक्खटः कर्कशः ॥ तॄ प्लवनतरणयोः । तरटः पीनः ॥ डुकृंग् करणे । करटः काकः करिकपोलश्च ॥ सृं गतौ । सरटः कृकलासः ॥ टुडुभृंग्क् पोषणे च । भरटः प्लवविशेषो भृत्यः कुलालश्च ॥ वृग्ट् वरणे । वरटः क्षुद्रधान्यं प्रहारश्च ॥ १४२ ॥

कुलिविलिभ्यां कित् ॥ १४३ ॥

आभ्यां किदटः प्रत्ययो भवति ॥ कुल बन्धुसंस्त्यानयोः । कुलटा बन्धकी ॥ विलत् वरणे । विलटा नदी ॥ १४३ ॥

कपटकीकटादयः ॥ १४४ ॥

कपटादयः शब्दा अटप्रत्ययान्ता निपात्यन्ते ॥ कम्पेर्नलोपश्च । कपटं माया॥ ककेरत ईच्च । कीकटः कृपणः॥ आदिग्रहणात् लघटपर्पटादयो भवन्ति ॥ १४४ ॥

अनिशॄपॄवॄललिभ्य आटः ॥ १४५ ॥

एभ्य आटः प्रत्ययो भवति ॥ अनक् प्राणने । अनाटः शिशुः ॥ शॄश् हिंसायाम् । शराटः शकुन्तः ॥ पॄश् पालनपूरणयोः । पराट आयुक्तकः॥ वॄङ्श् संभक्तौ । वराटः सेवकः ॥ ललिण् ईप्सायाम् । ललाटमलिकम् ॥ १४५ ॥

सृसृपेः कित् ॥ १४६ ॥

आभ्यां किदाटः प्रत्ययो भवति ॥ सृं गतौ । सृाटः पुरःसरः ॥ सृप्लृं गतौ । सृपाटोल्पः कुमुदादिपत्त्रं च । सृपाटचुपानत्कुप्यमल्पपुस्तकश्च ॥ १४६ ॥

किरो लश्च वा ॥ १४७ ॥

किरतेः किदाटः प्रत्ययो [भवति] लश्चान्तो वा भवति ॥ किलाटो भक्ष्यविशेषः । किराटो वणिग् म्लेच्छश्च ॥ १४७ ॥

कपाटविराटशृङ्गाटप्रपुनाटादयः ॥ १४८ ॥

एत आटप्रत्ययान्ता निपात्यन्ते ॥ कम्पेर्नलोपश्च । कपाटोररिः । जपादीनां पो व इति वत्वे । कवाटः ॥ वॄङ इत्वं च । विराटो राजा ॥ श्रयतेः शृङ् च । शृङ्गाटं जलजविशेषो विपणिमार्गश्च ॥ प्रपूर्वात् पुणेर्नश्च । प्रपुनाट एडगजः ॥ आदिशब्दात् खल्वाटादयो भवन्ति ॥ १४८ ॥

चिरेरिटो भ् च ॥ १४९ ॥

चिरेः सौत्रादिटः प्रत्ययो भवति भकारश्चान्तादेशो भवति ॥ चिर्भिटी वालुङ्की ॥ १४९ ॥

टिण्टश्चर् च वा ॥ १५० ॥

चिरेष्टिदिण्टः प्रत्ययो भवति चर इति चास्यादेशो वा भवति ॥ चरिण्टी चिरिण्टी च प्रथमवयाः स्त्री ॥ १५० ॥

तॄकॄकृपिकम्पिकृपिभ्यः कीटः ॥ १५१ ॥

एभ्यः किदिटः प्रत्ययो भवति ॥ तॄ प्लवनतरणयोः तिरीटं कूलवृक्षो मुकुटं वेष्टनं च ॥ कॄत् विक्षेपे । किरीटं मुकुटं हिरण्यं च ॥ कृपौङ् सामर्थ्ये । कृपीटं हिरण्यं जलं च ॥ कपुङ् चलने । कम्पीटं कम्पः कम्पं च ॥ कृपींत् विलेखने । कृपीटं जलम् ॥ १५१ ॥

खञ्जेररीटः ॥ १५२ ।

खजु गतिवैकल्ये । इत्यस्मादरीटः प्रत्ययो भवति ॥ खञ्जरीटः खञ्जनः ॥ १५२ ॥

गॄजॄदॄवॄभॄभ्य उट उडश्च ॥ १५३ ॥

एभ्य उट उडश्च प्रत्ययौ भवतः । भिन्नविभक्तिनिर्देश उटस्योत्तरत्रानुवृत्त्यर्थः । अप्रकृतस्याप्युडस्येह विधानं लाघवार्थम् ॥ गॄश् शब्दे । गरुटो गरुडश्च गरुत्मान् ॥ जॄष्च् जरसि । जरुटो जरुडश्च वनस्पतिः ॥ दॄश् विदारणे । दरुटो दरुडश्च विडालः ॥ वॄग्श् वरणे । वरुटो वरुडश्च मे[ष]ः ॥ भॄश् भर्जने च । भरुटो भरुडश्च मे[ष] एव ॥१५३॥

मङ्केर्मकमुकौ च ॥ १५४ ॥

मकुङ् मण्डने । इत्यस्मादुटः प्रत्ययो [भवति] मक मुक इत्यादेशौ चास्य भवतः ॥ मकुटो मुकुटश्च किरीटः ॥ १५४ ॥

नर्कुटकुक्कुटोत्कुरुटमुरुटपुरुटादयः ॥ १५५ ॥

एत उटप्रत्ययान्ता निपात्यन्ते ॥ नृतेः कश्च । नर्कुटो बन्दी ॥ कुके कोन्तश्च । कुक्कुटः कृकवाकः ॥ उत्पूर्वात्कृगः कुर् च । उत्कुरुटः कचवारपुञ्जः । मुरिपुर्योर्गुणाभावश्च । मुरुटो यद्वेण्वादिमूलमृजु कर्तुं न शक्यते ॥ पुरुटो जलजन्तुः । आदिशब्दात् स्फुटादयो भवन्ति ॥ १५५ ॥

दुरो द्रः कूटश्च दुर् च ॥ १५६ ॥

दुरपूर्वात् द्रुणातेः किदूट उटश्च प्रत्ययौ [भवतो] दुर् चास्यादेशो भवति ॥ दुर्दुरूटो दुर्मुखः । दुर्दुरुटो देशकालवादी ॥ १५६ ॥

वन्धेः ॥ १५७ ॥

वन्धंश् वन्धने । इत्यस्मात्किदूटः प्रत्ययो भवति ॥ वधूटी प्रथमवयाः स्त्री ॥ १५७ ॥

चपेरेटः॥ १५८॥

चप सान्त्वने। इत्यस्मादेटः प्रत्ययो भवति॥ चपेटश्चपेटा वा हस्ततलाहतिः॥ १५८॥

ग्रो णित्॥ १५९॥

गॄत् निगरणे। इत्यस्माण्णिदेटः प्रत्ययो भवति॥ गारेट ऋषिः॥ १५९॥

कृशकृशाखेरोटः॥ १६०॥

एभ्य ओटः प्रत्ययो भवति॥ डुकृंग् करणे। करोटो भृत्यः शिरः कपालं च। करोटं भाजनविशेषः॥ शक्लृंट् शक्तौ। शकोटो बाहुः॥ शाखृ श्लाखृ व्याप्तौ। शाखोटो वृक्षविशेषः॥ १६०॥

कपोटवकोटाक्षोटकर्कोटादयः॥ १६१॥

एत ओटप्रत्ययान्ता निपात्यन्ते॥ कबृङ् वर्णे। पश्च। कपोटो वर्णः कितवश्च॥ वचेः कश्च। वकोटो बकः॥ अश्नातेः सश्च परादिः। अक्षोटः फलवृक्षः॥ कृगः कोन्तश्च। कर्कोटो नागः॥ आदिशब्दादन्येपि॥ १६१॥

वनिकणिकाश्युषिभ्यष्ठः॥ १६२॥

एभ्यष्ठः प्रत्ययो भवति॥ वन भक्तौ। वण्ठोनिविष्टः॥ कण शब्दे। कण्ठः कंधरा॥ काशृङ् दीप्तौ। काष्ठं दारु। काष्ठा दिगवस्था च॥ उषू दाहे। ओष्ठो दन्तच्छदः॥ १६२॥

पीविशिकुणिपृषिभ्यः कित्॥ १६३॥

एभ्यः किट्ठः प्रत्ययो भवति॥ पींङ्च् पाने। पीठमासनम्॥ विशंत् प्रवेशने। विष्ठा पुरीषम्॥ कुणत् शब्दोपकरणयोः। कुण्ठोतीक्ष्णः॥ पृषू सेचने। पृष्ठोङ्कुशः शरीरैकदेशश्च॥ १६३॥

कुषेर्वा॥ १६४॥

कुषश् निष्कर्षे। इत्यस्माट्ठः प्रत्ययो भवति स च वा कित् [भवति]॥ कुष्ठं व्याधिर्गन्धद्रव्यं च। कोष्ठः कुसूल उदरं च॥ १६४॥

शमेर्लुक् च वा॥ १६५॥

शमूच् उपशमे। इत्यस्माट्ठः प्रत्ययो भवति लुक् चान्तस्य वा भवति॥ शठो धूर्तः। शण्ठः स एव। नपुंसकं च॥ १६५॥

पट्टेधिठादयः ॥ १६६ ॥

पट्टादयः शब्दाठप्रत्ययान्ता निपात्यन्ते ॥ पुषेः किद्वःपपादेशश्च । पटः प्रस्थः पर्वतश्च ॥ एधतेरिट् च । एधिठं वनम् । एधिठो गिरिसरिद्ध्रदः ॥ आदिशब्दादन्येपि ॥ १६६ ॥

मृजॄशॄकम्यमिरमिरपिभ्योठः ॥ १६७ ॥

एभ्योठः प्रत्ययो भवति ॥ मृंत् प्राणत्यागे । मरठो दध्यतिद्रवीभूतं कृमिजातिः कण्ठः प्राणश्च ॥ जॄष्‌च् जरसि । जरठः कठोरः ॥ शॄश् हिंसायाम् । शरठ आयुधं पापं क्रीडनशीलश्च ॥ कमूङ् कान्तौ । कमठो भिक्षाभाजनं कूर्मास्थि कच्छपो मयूरो वामनश्च ॥ अम गतौ । अमठः प्रकर्षगतिः ॥ रमिं क्रीडायाम् । रमठो देशः कृमिजातिः क्रीडनशीलो म्लेच्छो देवश्च विलातानाम् ॥ रप व्यक्ते वचने । रपठो विद्वान्मण्डूकश्च ॥१६७ ॥

पञ्चमाड्डः ॥ १६८ ॥

पञ्चमान्ताद्धातोर्डः प्रत्ययो भवति ॥ षन भक्तौ । षण्डो वनं वृषभश्च । वाहुलकात्सत्वाभावः ॥ भण शब्दे । भण्डः प्रहसनकरो वन्दी च ॥ चण शब्दे । चण्डः क्रूरः ॥ पणि व्यवहारस्तुत्योः । पण्डः शण्ठः ॥ गणण् संख्याने । गण्डः पौरुषयुक्तः पुरुषः ॥ मण शब्दे । मण्डो रश्मिरग्रमन्नविकारश्च ॥ वन भक्तौ । वण्डोलपशेफो निश्चर्माग्रशिश्नश्च ॥ शमू दमूच् उपशमे । शण्ड उत्सृष्टः पशुर्क्लिषिश्च ॥ दण्डो वनस्पतिप्रतानो राजशासनं नालं प्रहरणं च ॥ रमिं क्रीडायाम् । रण्डः पुरुषः । रण्डा स्त्री । रण्डमन्तःकरणम् । त्रयमपि स्वसंवन्धिशून्यमेवमुच्यते ॥ तमेस्तनेर्वा । तण्ड ऋषिः । वितण्डा तृतीयकथा ॥ गमेः । गण्डः कपोलः ॥ भामि क्रोधे । भाण्डमुपस्करः ॥ १६८ ॥

कण्यणिखनिभ्यो णिद्वा ॥ १६९ ॥

एभ्यो डः प्रत्ययो भवति स च णिद्वा [भवति] ॥ कण अण शब्दे । काण्डः शरः फलसंघातः पर्व च । कण्डं भूषणं पर्व च ॥ आण्डो मुष्कः । अण्डः स एव योनिविशेषश्च ॥ खनूग् अवदारणे । खाण्डः कालाश्रयो गुडः । खण्ड इक्षुविकारोन्यः । खण्डं शकलम् ॥ १६९ ॥

कुगुहुनीकुणितुणिपुणिमुणिशुन्यादिभ्यः कित् ॥ १७० ॥

एभ्यः किड्डः प्रत्ययो भवति ॥ कुंङ् शब्दे । कुडो घटो हलं च ॥ गुंङ् शब्दे । गुडो गोल इक्षुविकारश्च । गुडा संनाहः ॥ हुंकृ दानादनयोः । हुडो मूर्खो मेषश्च ॥ णींग् प्रापणे । नीडं कुलायः ॥ कुणत् शब्दोपकरणयोः । कुण्डं भाजनं जलाधारविशेषश्च । कुण्डो भर्तरि जीवति जारेण जातोपद्विन्द्रियश्च ॥ तुणत् कौटिल्ये । तुण्डं मुखम् ॥ पुणत् शुभे । पुण्डो भिन्नवर्णः ॥ मुणत् प्रतिज्ञाने । मुण्डः परिवापितकेशः ॥ शुनत् गतौ । शुण्डा सुरा हस्तिहस्तश्च ॥ आदिग्रहणादन्येभ्योपि भवति ॥ १७० ॥

ऋसृतॄव्यालिह्यविचमिवमियमिचुरिकुहेरडः ॥ १७१ ॥

एभ्योडः प्रत्ययो भवति ॥ ऋक् गतौ । अरडस्तरुः ॥ सृं गतौ । सरडो भुजपरिसर्पस्तरुश्च ॥ तॄ प्लवनतरणयोः । तरडो वृक्षजातिः ॥ व्येंग् संवरणे । व्याडो दुःशीलो हिंस्रः पशुर्भुजगश्च ॥ लिहींक् आस्वादने । लेहडः श्वा चौर्यग्रासी च ॥ अव रक्षणादौ । अवडः क्षेत्रविशेषः ॥ चमू अदने । चमडः पशुजातिः ॥ टुवमू उद्गिरणे । वमडो लूताजातिः ॥ यमू उपरमे । यमडो वनस्पतिर्युगलं च ॥ चुरण् स्तेये । चोरडश्चोरः ॥ कुहणि विस्मापने । कुहड उन्मत्तकः ॥ १७१ ॥

विहडकहोडकुरडकेरडक्रोडादयः ॥ १७२ ॥

एतेडप्रत्ययान्ता निपात्यन्ते ॥ विपूर्वात् हन्तेरनो लुक् च । विहडः शकुनिर्मूढचित्तश्च ॥ कषेर्हः प्रत्ययोकारस्य च ओकारः ॥ कहोड ऋषिः ॥ कुरेर्गुणाभावश्च । कुरडो मार्जारः ॥ किरतेः केर् च । केरडस्त्वैराज्ये राजा ॥ कृगः कित्प्रत्ययोकारस्य च ओकारः ॥ क्रोडः किरिरङ्कश्च ॥ आदिग्रहणात् लहोडादयो भवन्ति ॥ १७२ ॥

जॄकॄतॄशॄसृभृवृभ्योण्डः ॥ १७३ ॥

एभ्योण्डः प्रत्ययो भवति ॥ जॄष्च् जरसि । जरण्डोतीतवयस्कः ॥ कॄत् विक्षेपे । करण्डः समुद्गः कृमिजातिश्च ॥ तॄ प्लवनतरणयोः । तरण्डः प्लवो वायुश्च । शॄश् हिंसायाम् । शरण्डो हिंस्र आयुधं च ॥ सृं गतौ । सरण्डः कृमिजातिरिषीका वायुर्भूतसंघातस्तृणसमवायश्च ॥ टुडुभृंग्क् पोषणे च । भरण्डो भण्डजातिः पक्षी च ॥ वृग्ट् वरणे । वरण्डः कुड्यं तृणकाष्ठादिभारश्च ॥१७३॥

पूगो गादिः ॥१७४॥

पुगङ् पवने । इत्यस्माद्गकारादिरण्डः प्रत्ययो भवति ॥ पोगण्डो विकलाङ्गो युवा च ॥१७४॥

वनेस्त् च ॥१७५॥

वन भक्तौ । इत्यस्मादण्डः प्रत्ययो भवति तकारश्चान्तादेशो भवति ॥ वतण्ड ऋषिः ॥१७५॥

पिचण्डैरण्डखरण्डादयः ॥१७६॥

एतेण्डप्रत्ययान्ता निपात्यन्ते ॥ पिचेरगुणत्वं च । पिचण्डो लघुलगुडः ॥ ईरेर्गुणश्च । एरण्डः पञ्चाङ्गुलः ॥ खादृ भक्षणे । अन्त्यस्वरादेररादेशश्च । खरण्डः सर्वर्तुकम् ॥ आदिग्रहणात् कूष्माण्डशयण्डशयाण्डादयोपि भवन्ति ॥१७६॥

लगेरुडः ॥ १७७ ॥

लगे सङ्गे । इत्यस्मादुडः प्रत्ययो भवति ॥ लगुडो यष्टिः ॥ गृजृदृवृभृभ्यस्तु उडो विहित एव ॥ १७७ ॥

कुसेरुण्डक् ॥ १७८ ॥

कुसच् श्लेषे । इत्यस्मादुण्डक् प्रत्ययो भवति ॥ कुसुण्डो वपुष्मान् ॥१७८॥

शमिषणिभ्यां ढः ॥ १७९ ॥

आभ्यां ढः प्रत्ययो भवति ॥ शमूच् उपशमे । शण्ढः नपुंसकम् ॥ षन भक्तौ । षण्ढः स एव । बाहुलकात्सत्वाभावः ॥ १७९ ॥

कुणेः कित् ॥ १८० ॥

कुणत् शब्दोपकरणयोः । इत्यस्मात्किड्ढः प्रत्ययो भवति ॥ कुण्ढो धूर्तः बाहुलकान्न दीर्घः ॥ १८० ॥

नञः सहेः षा च ॥ १८१ ॥

नञ्पूर्वात् षहि मर्षणे । इत्यस्माड्ढः प्रत्ययो भवति षा चास्यादेशो भवति ॥ अषाढा नक्षत्रम् ॥ १८१ ॥

इणुर्विशाविणिपॄकॄवृतॄजॄदॄसृपिपणिभ्यो णः ॥ १८२ ॥

एभ्यो णः प्रत्ययो भवति ॥ इण्क् गतौ । एणः कुरङ्गः ॥ उर्वैं हिंसायाम् । ऊर्णा मेषादिलोम भ्रुवोरन्तरावर्तश्च ॥ शोंच् तक्षणे । शाणः परिमाणं

शस्त्रतेजनं च ॥ वेणृग् गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेण्णा कृष्णवेण्णा च नाम नदी ॥ पॄश् पालनपूरणयोः । पर्णं पत्त्रं शिरश्च ॥ कॄत् विक्षेपे । कर्णः श्रवणं कौन्तेयश्च ॥ वॄग्श् वरणे । वर्णः शुक्लादिर्ब्राह्मणादिरकारादिर्यशःस्तुतिः प्रकारश्च ॥ तॄ प्लवनतरणयोः । तर्णो वत्सः ॥ जॄष्च् जरसि । जर्णश्चन्द्रमा वृक्षः कर्कः क्षयधर्मा शकुनिश्च ॥ दृंङ्त् आदरे । दर्णः पर्णम् ॥ सृपृं गतौ । सर्प्णः सरीसृपजातिः ॥ पणि व्यवहारस्तुत्योः । पर्ण्णं व्यवहारः ॥ १८२ ॥

घृवीह्वाशुष्युषितृषिकृष्यर्तिभ्यः कित् ॥ १८३ ॥

एभ्यः कित्णः प्रत्ययो भवति ॥ घृं सेचने । घृणा कृपा ॥ वींक् प्रजननादिषु । वीणा वल्लकी ॥ ह्वेंग् स्पर्धाशब्दयोः । हूणो म्लेच्छजातिः ॥ शुषंच् शोषणे । शुष्णो निदाघः ॥ उषू दाहे । उष्णः स्पर्शविशेषः ॥ ञितृषच् पिपासायाम् । तृष्णा पिपासा । कृषींत् विलेखने । कृष्णो वर्णो विष्णुर्मृगश्च ॥ ऋंक् गतौ । ऋणं वृद्धिधनं जलदुर्गभूमिश्च ॥ १८३ ॥

द्रोर्वा ॥ १८४ ॥

द्रुं गतौ । इत्यस्माण्णः प्रत्ययो [भवति] स च किद्वा भवति ॥ द्रुणा ज्या । द्रोणश्चतुराढकं पाण्डवाचार्यश्च । द्रोणी । गौरादित्वाङ्ङीः । नौः ॥ १८४ ॥

स्थाक्षुतोरूच्च ॥ १८५ ॥

एभ्यो णः प्रत्ययो भवत्यूकारश्चान्तादेशो भवति ॥ ष्ठां गतिनिवृत्तौ । स्थूणा तन्तुधारिणी गृहधारिणी शरीरधारिणी लोहप्रतिमा व्याधिविशेषश्च ॥ टुक्षुक् शब्दे । क्षूणमपराधः ॥ तुंक् वृत्त्यादिषु । तूण इषुधिः ॥ १८५ ॥

भ्रूणतृणगुणकार्ष्णतीक्ष्णश्लक्ष्णाभीक्ष्णादयः ॥ १८६ ॥

एते णप्रत्ययान्ता निपात्यन्ते ॥ भृगो भ्रू च । भ्रूणो निहीनोऽर्भकः स्त्रैणगर्भश्च ॥ तरतेर्ह्रस्वश्च । तृणं शष्पादिः ॥ गायतेर्गमेर्गृणातेर्वा गुभावश्च । गुण उपकार आश्रितोऽप्रधानं ज्या च ॥ कृगो वृद्धिः कोन्तश्च । कार्ष्णः शिल्पी ॥ तिजेर्दीर्घः सश्च परादिः । तीक्ष्णं निशितम् ॥ श्लिषेः सोन्तोऽचेतः । श्लक्ष्णमकर्कशं सूक्ष्मं च ॥ अभिपूर्वात् इषेः किच्च सोन्तः । अभीक्ष्णमजस्रम् ॥ आदिग्रहणादन्येऽपि ॥ १८६ ॥

तॄकॄशॄपॄभॄवॄश्रुरुरुहिलक्षिविचक्षिचुकिबुकितङ्ग्यङ्गिमङ्गिकाङ्गिचरिसमीरेरणः ॥ १८७ ॥

एभ्योऽणः प्रत्ययो भवति ॥ तॄ प्लवनतरणयोः । तरणम् ॥ कॄत् विक्षेपे

करणम् ॥ शॄश् हिंसायाम् । शरणं गृहम् ॥ पॄश् पालनपूरणयोः । परणम् ॥ टुडुभृंग्क् पोषणे च । भरणम् ॥ वृग्ट् वरणे । वरणो वृक्षः सेतुबन्धश्च । वरणं कन्याप्रतिपादनम् ॥ श्रुंट् श्रवणे । श्रवणः कर्णो भिक्षुश्च ॥ रुक् शब्दे । रुङ् रेषणे च वा । रवणः करभोऽग्निर्द्रुमो वायुर्भृङ्गः शकुनिः सूर्यो घण्टा च ॥ रुहं जन्मनि । रोहणो गिरिः ॥ लक्षीण् दर्शनाङ्कनयोः । लक्षणं व्याकरणं शुभाशुभसूचकं मषीतिलकाद्यङ्कनं च ॥ चक्षिक् व्यक्तायां वाचि । विचक्षणो विद्वान् ॥ चुक्कण् व्यथने । चुक्कणो व्यायामशीलः ॥ बुक्क भाषणे । बुक्कणः श्वा वावदूकश्च ॥ तगु गतौ । तङ्गणा जनपदः ॥ अगु गतौ । अङ्गणमजिरम् ॥ मकुङ् मण्डने । मङ्कण ऋषिः ॥ ककुङ् गतौ । कङ्कणं प्रतिसरः ॥ चर भक्षणे च । चरणः पादः ॥ ईरिक् गतिकम्पनयोः । सम्पूर्वः । समीरणो वातः ॥ १८७ ॥

कॄगॄपॄकृपिवृषिभ्यः कित् ॥ १८८ ॥

एभ्यः किदणः प्रत्ययो भवति ॥ कॄत् विक्षेपे । किरणो रश्मिः ॥ गॄत् निगरणे । गिरणो मेघ आचार्यो ग्रामश्च ॥ पॄश् पालनपूरणयोः । पुरणः समग्रयिता समुद्रः पर्वतविशेषश्च ॥ कृपौङ् सामर्थ्ये । कृपणः कीनाशः ॥ वृषू सेचने ॥ वृषणो मुष्कः ॥ १८८ ॥

धृषिबर्हेरिश्चोपान्त्यस्य ॥ १८९ ॥

आभ्यां किदणः प्रत्ययो भवति इश्चोपान्त्यस्य भवति ॥ ञिधृषाट् प्रागल्भ्ये । धिषणो बृहस्पतिः । धिषणा बुद्धिः ॥ बर्हीं प्रापणे । विहण ऋषिः पाठश्च ॥ १८९ ॥

चिक्कणकुक्कणकृकणकुङ्कणत्रवणोल्वणोरणलवणवङ्क्षणादयः ॥ १९० ॥

एते किदणप्रत्ययान्ता निपात्यन्ते ॥ चिनोतेश्चिक्क् च । चिक्कणः पिच्छिलः ॥ कुकिकृगोः कोन्तश्च । कुक्कणः शकुनिः ॥ कृकण ऋषिः ॥ कुकेः स्वरान्नोन्तश्च । कुङ्कणा जनपदः ॥ त्रपेर्वश्च ॥ त्रवणो देशः ॥ वलेर्वस्य उत् । वोन्तश्च । उल्वणः स्फारः ॥ अर्तेरुर् च । उरणो मेषः ॥ लीयतेः क्लिद्यतेः स्वद्यतेर्वा लवादेशश्च । लवणं गुणो द्रव्यं च ॥ वञ्चेः सः परादिर्नलोपाभावश्च । वङ्क्षणमूरुमूलसंधिः ॥ आदिशब्दात् ज्योतिरिङ्गणतुरणभुरणादयो भवन्ति ॥ १९० ॥

कृपिविषिवृषिधृषिमृषियुषिद्रुहिग्रहेराणक् ॥ १९१ ॥

एभ्य आणक् प्रत्ययो भवति । कृपौङ् सामर्थ्ये । कृपाणः खड्गः ॥ विषू सेचने । विषाणं शृङ्गं करिदन्तश्च ॥ वृषू सेचने । वृषाणः ॥ ञिधृषाट् प्रागल्भ्ये ।

धृषाणो देवः ॥ मृषू सहने च । मृषाणः ॥ युषि सेवने सौत्रः । युषाणः ॥ द्रुहौच् जिघांसायाम् । द्रुहाणो मुखरः ॥ ग्रहीश् उपादाने । गृहाणः ॥ वृषाणादयः स्वप्रकृत्यर्थवाचिनः सर्वेपि कर्तरि कारके विज्ञेयाः ॥ १९१ ॥

पषो णित् ॥ १९२ ॥

पषी बाधनस्पर्शनयोः। इत्यस्मादाणक् प्रत्ययो भवति स च णित् [भवति]॥ पाषाणः प्रस्तरः ॥ १९२ ॥

कल्याणपर्याणादयः ॥ १९३ ॥

कल्याणादयः शब्दा आणक्प्रत्ययान्ता निपात्यन्ते ॥ कलेर्योन्तश्च । कल्याणं श्वोवसीयसम् ॥ परिपूर्वात् इणो लुक् च । पर्याणमश्वादीनां पृष्ठच्छदः ॥ आदिशब्दात् द्रेक्काणबोक्काणकेक्काणादयोपि भवन्ति ॥ १९३ ॥

द्रुहृबृंहिदक्षिभ्य इणः ॥ १९४ ॥

एभ्य इणः प्रत्ययो भवति ॥ द्रुं गतौ । द्रविणं द्रव्यम् ॥ हृंग् हरणे । हरिणो मृगः ॥ बृह वृद्धौ । बर्हिणो मयूरः ॥ दक्षि शैघ्र्ये च । दक्षिणः कुशलोनुकूलश्च । दक्षिणा दिग् ब्रह्मदेयं च ॥ १९४ ॥

ऋद्रुहेः कित् ॥ १९५ ॥

आभ्यां किदिणः प्रत्ययो भवति ॥ ऋश् गतौ । इरिणमूषरं कुञ्जो वनदुर्गं च ॥ द्रुहौच् जिघांसायाम् । द्रुहिणो ब्रह्मा क्षुद्रजन्तुश्च ॥ १९५ ॥

ऋकृवृधृदारिभ्य उणः ॥ १९६ ॥

एभ्य उणः प्रत्ययो भवति ॥ ऋंक् गतौ । अरुणः सूर्यसारथिरुषा वर्णश्च॥ कॄत् विक्षेपे । करुणा दया । करुणः करुणाविषयः । करुणं दैन्यम् ॥ वृश् भरणे । वरुणः प्रचेताः ॥ धृंग् धारणे । धरुणो धर्तायुक्तो लोकश्च ॥ दॄश् विदारणे । णौ । दारुण उग्रः ॥ १९६ ॥

क्षः कित् ॥ १९७ ॥

क्षैं क्षये । इत्यस्मात्किदुणः प्रत्ययो भवति ॥ क्षुणो व्याधिः क्षामः क्रोध उन्मत्तश्च ॥ १९७ ॥

भिक्षुणी ॥ १९८ ॥

भिक्षेरुणः प्रत्ययो भवति ङीश्च निपात्यते ॥ भिक्षुणी व्रतिनी ॥ १९८ ॥

गादाभ्यामेष्णक् ॥ १९९ ॥

आभ्यामेष्णक् प्रत्ययो भवति । गैं शब्दे । गेष्णो मेष उद्गाता रङ्गोपजीवी

च । गेष्णं साम मुखं च । रात्रिगेष्णो रङ्गोपजीवी । सुगेष्णा किंनरी ॥ डुदांग्क् दाने । देष्णो बाहुर्दानशीलश्च । चारुदेष्णः सात्यभामेयः । सुदेष्णा विराटपत्नी ॥ १९९ ॥

दम्यमितमिमावापूधूगॄजॄहसिवस्यसिवितसिमसीण्भ्यस्तः ॥ २०० ॥

एभ्यस्तः प्रत्ययो भवति ॥ दमूच् उपशमे । दन्तो दशनो हस्तिदंष्ट्रा च ॥ अम गतौ । अन्तोऽवसानं धर्मः समीपं च ॥ तमूच् काङ्क्षायाम् । तन्तः खिन्नः ॥ मांक् माने । मातमन्तःप्रविष्टम् ॥ वांक् गतिगन्धनयोः । वातो वायुः ॥ पूग्श् पवने । पोतो नौरभिर्बालश्च ॥ धूग्श् कम्पने । धोतो धूमः शा [ठ]ो वातश्च ॥ गॄत् निगरणे । गर्तः श्वभ्रम् ॥ जॄष्च् जरसि । जर्तः प्रजननं राजा च ॥ हसे हसने । हस्तः करो नक्षत्रं च ॥ वसूच् स्तम्भे । वस्तश्छागः ॥ असूच् क्षेपणे । अस्तो गिरिः ॥ तसूच् उपक्षये । वितस्ता नदी ॥ मसैच् परिणामे । मस्तो मूर्धा ॥ इणक् गतौ । एतो हरिणो वर्णो वायुः पथिकश्च ॥ २०० ॥

शीरीभूदूमूघृपाधागृचित्यर्त्यञ्जिपुसिमुसिवुसिविसिरमिधुर्विपूर्विभ्यः कित् ॥ २०१ ॥

एभ्यः कित्तः प्रत्ययो भवति ॥ शीङ्क् स्वप्ने । शीतं स्पर्शविशेषः ॥ रींश् गतिरेषणयोः । रीतं सुवर्णम् ॥ भू सत्तायाम् । भूतो ग्रहः । भूतं पृथिव्यादि ॥ दूङ्च् परितापे । दूतो वचोहरः ॥ मूङ् बन्धने । मूतो दध्यर्थं क्षीरे तक्रसेको वस्त्रावेष्टनबन्धनमाचमन्यालानपाशो बन्धनमात्रं धान्यादिपुटश्च ॥ घृं सेचने । घृतं सर्पिः ॥ पां पाने । पीतं वर्णविशेषः ॥ डुधांग्क् धारणे च । धाग इति हिः। हितमुपकारि ॥ चितै संज्ञाने । चित्तं मनः ॥ ऋक् गतौ । ऋतं सत्यम् ॥ अञ्जौप् व्यक्तिम्रक्षणगतिषु । अक्तो म्रक्षितो व्यक्तीकृतः परिमितः प्रेतश्च ॥ पुसच् विभागे । पुस्तो लेख्यपत्त्रसंचयो लेप्यादिकर्म च ॥ मुसच् खण्डने । मुस्ता गन्धद्रव्यम् ॥ वुसच् उत्सर्गे । वुस्तः प्रहसनम् ॥ विसच् प्रेरणे । विस्तं सुवर्णमानम् ॥ रमिं क्रीडायाम् । सुरतं मैथुनम् ॥ धुर्वै हिंसायाम् । धूर्तः शठः॥ पूर्व पूरणे । पूर्तः पुण्यम् ॥ २०१ ॥

लूम्रो वा ॥ २०२ ॥

आभ्यां तः प्रत्ययो [भवति] स च किद्वा भवति ॥ लूग्श् छेदने । लूता क्षुद्रजन्तुः । लोतो वाष्पं लवनं वस्तः कीटजातिश्च ॥ मृंत् प्राणत्यागे । मृतो गतप्राणः । मर्त ऋषिः प्राणी पुरुषश्च ॥ २०२ ॥

सुसितनितुसेर्दीर्घश्च वा ॥ २०३ ॥

एभ्यः कित्तः प्रत्ययो [भवति] दीर्घश्च वा भवति ॥ षुंग्ट् अभिषवे । सूतः सारथिः । सुतः पुत्रः॥ षिंग्ट् बन्धने । सीता जनकात्मजा सस्यं हलमार्गश्च । सितो वर्णः॥ तनूयी विस्तारे । तातः पिता पुत्रेष्टनाम च । ततं विस्तीर्णं वाद्यविशेषश्च । तुस शब्दे । तूस्तानि वस्त्रदशाः । तुस्ता जटा प्रदीपनं च ॥ २०३ ॥

पुतपित्तनिमित्तोतशुक्ततिक्तलिप्तसूरतमुहूर्तादयः॥ २०४ ॥

एते कित्तप्रत्ययान्ता निपात्यन्ते ॥ पूडो ह्रस्वश्च । पुतः स्फिक् ॥ पीडस्तोन्तश्च । पित्तं मायुः ॥ निपूर्वात् मिनोतेर्मित् च । निमित्तं हेतुर्दिव्यज्ञानं च ॥ उभेर्लुक् च । उताशङ्काद्यर्थमव्ययम् ॥ शकेः शुचेर्वा शुक्भावश्च । शुक्तं कल्कजातिः ॥ ताडयतेस्तकतेस्तिजेर्वा तिक् च । तिक्तो रसविशेषः ॥ लीयतेः पोन्तो ह्रस्वश्च । लिप्तं श्लेषोंशदेशश्च ॥ सुपूर्वात् रमेः सोर्दीर्घश्च । सूरतो दमितो हस्त्यन्यो वा दान्तः ॥ हुर्छेर्मुश्च धात्वादिः। मुहूर्तः कालविशेषः॥ आदिग्रहणात् अयुतनियुतादयो भवन्ति ॥ २०४ ॥

कृगो यङः ॥ २०५ ॥

करोतेर्यङन्तात्कित्तः प्रत्ययो भवति ॥ चेक्रीयितः पूर्वाचार्याणां यङ्प्रत्ययसंज्ञा ॥ २०५ ॥

इवर्णादिर्लुपि ॥ २०६ ॥

करोतेर्यङो लुपि। इवर्णादिस्तः प्रत्ययो भवति ॥ चर्करितं चर्करीतं यङ्लुबन्तस्याख्ये ॥ २०६ ॥

दृपृभृमृशीयजिखलिवलिपर्विपच्यमिनमितमिदृशिहर्यिकङ्किभ्योतः ॥ २०७ ॥

एभ्योतः प्रत्ययो भवति ॥ दृंङ्त् आदरे । दरत आदरः ॥ पृंक् पालनपूरणयोः । परतः कालः ॥ डुडुभृंग्क् पोषणे च । भरतः प्रथमचक्रवर्ती हिमवत्समुद्रमध्यक्षेत्रं च । मृंत् प्राणत्यागे । मरतो मत्युरग्निः प्राणी च ॥ शीङ्क् स्वप्ने । शयतो निद्रालुश्चन्द्रः स्वप्नोजगरश्च ॥ यजीं देवपूजासंगतिकरणदानेषु । यजतो यज्वाग्निश्च ॥ खल संचये च । खलतः शीर्णकेशशिराः ॥ वलि संवरणे । वलतः कुसूलः ॥ पर्व पूरणे । पर्वतो गिरिः ॥ डुपचींष् पाके । पचतोग्निरादित्यः पाल इन्द्रश्च ॥ अम गतौ ।अमतो मृत्युर्जीव आतङ्कश्च ॥ णमं प्रह्वत्वे । नमतो

नटो देव ऊर्णास्तरणं हूस्वश्च ॥ तमूच् काङ्क्षायाम्। तमतो निर्वेद्याकाङ्क्षी धूमश्च। दृशृं प्रेक्षणे। दर्शतो द्रष्टाग्निश्च ॥ हर्य क्रान्तौ। हर्यतो वायुरश्वः कान्तो रश्मिर्यज्ञश्च ॥ ककुङ् गतौ। कक्कुतः केशमार्जनम् ॥ २०७ ॥

पृपिरञ्जिसिकिकालावृभ्यः कित् ॥२०८॥

एभ्यः किदतः प्रत्ययो भवति ॥ पृषू सेचने। पृषतो मृगः॥ रञ्जीं रागे। रजतं रूप्यम् ॥ सिकिः सौत्रः। सिकता वालुका ॥ कैं शब्दे। कतो गोत्रकृत् ॥ लांक् आदाने। लता वल्ली। वृगट् वरणे। व्रतं शास्त्रतो नियमः ॥ २०८ ॥

कॄवृकल्यलिचिलिविलीलिलानाथिभ्य आतक् ॥ २०९ ॥

एभ्य आतक् प्रत्ययो भवति ॥ कॄत् विक्षेपे। किरातः शबरः ॥ वृगट् वरणे। व्रातः समूह उत्सेधजीविसंघश्च ॥ कलि शब्दसंख्यानयोः। कलातो ब्रह्मा ॥ अली भूषणादौ। अलातमुल्मुकम् ॥ चिलत् वसने। चिलाता म्लेच्छाः ॥ विलत् वरणे। विलातः शवाच्छादनवस्त्रम् ॥ इलत् गत्यादौ। इलातो नगः ॥ लांक् आदाने। लातो मृत्तिकादानभाजनम् ॥ नाथृङ् उपतापैश्वर्याशीःषु च। नाथात आहारः प्रजापतिश्च ॥ २०९ ॥

हृश्यारुहिशोणिपलिभ्य इतः ॥ २१० ॥

एभ्य इतः प्रत्ययो भवति ॥ हृंग् हरणे। हरितो वर्णः ॥ श्यैङ् गतौ। श्येतो वर्णो मृगो मत्स्यः श्येनश्च ॥ रुहं जन्मनि। रोहितो वर्णो मत्स्यो मृगजातिश्च। लत्वे। लोहितो वर्णः। लोहितमसृक् ॥ शोणृ वर्णगत्योः। शोणितं रुधिरम् ॥ पल गतौ। पलितः श्वेतकेशः ॥ २१० ॥

नञ आपेः ॥ २११ ॥

नञ् पूर्वात् आप्लृंट् व्याप्तौ। इत्यस्मादितः प्रत्ययो भवति ॥ नापितः कारुविशेषः॥ २११ ॥

क्रुशिपिशिपृषिकुषिकुस्युचिभ्यः कित् ॥२१२॥

एभ्यः किदितः प्रत्ययो भवति ॥ क्रुशं आह्वानरोदनयोः। क्रुशितं पापम् ॥ पिशत् अवयवे। पिशितं मांसम् ॥ पृषू सेचने। पृषितं वारिबिन्दुः॥ कुषश् निष्कर्षे। कुषितं पापम् ॥ कुसच् श्लेषे। कुसित ऋषिः। कुसितमृणं श्लिष्टं च ॥ उचच् समवाये। उचितं स्वभावो योग्यं चिरानुयातं श्रेष्ठं च ॥ २१२ ॥

हृग ईतण् ॥ २१३ ॥

हृंग् हरणे। इत्यस्मादीतण् प्रत्ययो भवति ॥ हारीतः पक्ष्यृषिश्च ॥२१३॥

अदो भुवो डुतः ॥ २१४ ॥

अद्पूर्वात् भुवो डुतः प्रत्ययो भवति ॥ अद् विस्मितं भवति तेन तस्मिन्वा मनः। अद्भुतमाश्चर्यम् ॥ २१४ ॥

कुलिमयिभ्यामूतक् ॥ २१५ ॥

आभ्यामूतक् प्रत्ययो भवति ॥ कुल बन्धुसंस्त्यानयोः। कुलूता जनपदः ॥ मयि गतौ। मयूता वसतिः ॥ २१५ ॥

जीवेर्म च ॥ २१६ ॥

जीव प्राणधारणे। इत्यस्मादूतक् प्रत्ययो भवति मश्चान्तादेशो भवति ॥ जीमूतो मेघो गिरिश्च ॥ २१६ ॥

कब्रेरोतः प् च ॥ २१७ ॥

कबृङ् वर्णे। इत्यस्मादोतः प्रत्ययो [भवति] पश्चान्तादेशो भवति ॥ कपोतः पक्षी वर्णश्च ॥ २१७ ॥

आस्फायेर्डित् ॥ २१८ ॥

आङ्पूर्वात् स्फायैङ् वृद्धौ। इत्यस्माड्डिदोतः प्रत्ययो भवति ॥ आस्फोता नामौषधिः ॥ २१८ ॥

जृविशिभ्यामन्तः ॥ २१९ ॥

आभ्यामन्तः प्रत्ययो भवति ॥ जॄष्च् जरसि। जरन्तो भूतग्रामो वृद्धो महिषश्च ॥ विशंत् प्रवेशने। वेशन्तः पल्वलं वल्लभोप्राप्तापवर्ग आकाशं च ॥ २१९ ॥

रुहिनन्दिजीविप्राणिभ्यष्टिदाशिषि ॥ २२० ॥

एभ्य आशिषि टिदन्तः प्रत्ययो भवति ॥ रुहं जन्मनि। रोहतात्। रोहन्तो वृक्षः। रोहन्त्योषधिः ॥ टुनदु समृद्धौ। नन्दतात्। नन्दन्तः सखानन्दश्च। नन्दन्ती सखी ॥ जीव प्राणधारणे। जीवतात्। जीवन्त आयुष्मान्। जीवन्ती शाकः ॥ अनक् प्राणने। प्राण्यात्। प्राणन्तो वायू रसायनं च। प्राणन्ती स्त्री ॥ २२० ॥

तॄजिभूवदिवहिवसिभास्यदिसाधिमदिगडिगण्डिमण्डिनन्दिरेविभ्यः ॥ २२१ ॥

एभ्यष्टिदन्तः प्रत्ययो भवति। आशिषीत्येके ॥ तॄ प्लवनतरणयोः। तरन्त आदित्यो भेकश्च। तरन्ती स्त्री ॥ जिं अभिभवे। जयन्तो रथरेणुर्ध्वज इन्द्रपुत्रो

जम्बूद्वीपपाश्चिमद्वारं पाश्चिमानुत्तरविमानं च । जयन्त्युदयनपितृष्वसा ॥ भू सत्तायाम् । भवन्तः कालः । भवन्ती ॥ वद व्यक्तायां वाचि । वदन्तः । वदन्ती ॥ वहीं प्रापणे । वहन्तो रथोनड्वान्नथरेणुर्वायुश्च । वहन्ती ॥ वसं निवासे । वसन्त ऋतुः ॥ भासि दीप्तौ । भासन्तः सूर्यः । भासन्ती । ण्यन्तोपि । भासयन्तः सूर्यः ॥ अदंक् भक्षणे । अदन्तः । अदन्ती ॥ साधंट् संसिद्धौ । साधन्तो भिक्षुः । ण्यन्तोपि । साधयन्तो भिक्षुः । साधयन्ती ॥ मदैच् हर्षे । णौ । मदयन्तः । मदयन्ती पुष्पगुल्मजातिः ॥ गड सेचने । गडन्तो जलदः । ण्यन्तोपि । गडयन्तः । गडयन्ती ॥ गडु वदनैकदेशे । ण्यन्तः । गण्डयन्तो मेघः ॥ मडु भूषायाम् । ण्यन्तः । मण्डयन्तः प्रसाधकोलंकार आदर्शश्च ॥ टुनदु समृद्धौ । ण्यन्तः । नन्दयन्तः सुखकृद्राजा हिरण्यं सुखं च । नन्दयन्ती ॥ रेवृङ् पवि गतौ । रेवन्तः सूर्यपुत्रः ॥ अनुक्तार्था धात्वर्थकर्त्रर्थाः ॥ २२१ ॥

सीमन्तहेमन्तभदन्तदुष्वन्तादयः ॥ २२२ ॥

एतेन्तप्रत्ययान्ता निपात्यन्ते ॥ सिनोतेः सीम् च । सीमन्तः केशमार्गो ग्रामक्षेत्रान्तश्च ॥ हन्तेर्हिनोतेर्वा हेम् च । हेमन्त ऋतुः ॥ भन्दतेर्नलुक् च । भदन्तो निर्ग्रन्थेषु शाक्येषु च पूज्यः ॥ दुषेर्वोन्तश्च । दुष्वन्तो राजा । आदिग्रहणादन्येपि ॥ २२२ ॥

शकेरुन्तः ॥ २२३ ॥

शकृंट् शक्तौ । इत्यस्मादुन्तः प्रत्ययो भवति ॥ शकुन्तः पक्षी ॥ २२३ ॥

कषेर्डित् ॥ २२४ ॥

कष हिंसायाम् । इत्यस्माड्डिदुन्तः प्रत्ययो भवति ॥ कुन्त आयुधम् ॥ २२४ ॥

कमिप्रुगा[illegible]थः ॥ २२५ ॥

एभ्यस्थः प्रत्ययो भवति ॥ क[illegible]ङ् कान्तौ । कन्था प्रावरणं नगरं च ॥ प्रुंङ् गतौ । प्रोथः प्रियो युवा [illegible] घोणा च ॥ गैं शब्दे । गाथा श्लोक आर्या वा ॥ ऋंक् गतौ । अर्थो जीवाजीवादिपदार्थः प्रयोजनमभिधेयं धनं याच्ञा निवृत्तिश्च ॥ २२५ ॥

अवाद्गोच वा ॥ २२६ ॥

अवपूर्वात् गायतेस्थः प्रत्ययो [भव]त्यच्चान्तादेशो वा भवति ॥ अवगथः । अवगाथोक्षसंघातः प्रातःसवनं रथयानं साम पन्थाश्च ॥ २२६ ॥

नीनूरमितृतुदिवचिरिचिसिचिश्विहनिपागोपावोद्गाभ्यः क्थित् ॥ २२७ ॥

एभ्यः क्थित्थः प्रत्ययो भवति ॥ णींग् प्रापणे । नीथं जलम् । सुनीथो नाम राजा नीतिमान्धर्मशीलो ब्राह्मणश्च ॥ णूत् स्तवने । नूथं तीर्थम् ॥ रमिं क्रीडायाम् । रथः स्यन्दनः ॥ तॄ प्लवनतरणयोः । तीर्थं जलाशयावगाहनमार्गः पुण्यक्षेत्रमाचार्यश्च ॥ तुदींत् व्यथने । तुत्थं चक्षुष्यो धातुविशेषः ॥ वचंक् भाषणे । उक्थं शास्त्रं सामवेदश्च । उक्थानि सामानि ॥ रिचूंपी विरेचने । रिक्थं धनम् ॥ षिचींत् क्षरणे । सिक्थं मदनं पुलाकश्च ॥ ट्वोश्वि गतिवृद्ध्योः । शूथो यज्ञप्रदेशः ॥ हनंक् हिंसागत्योः । हथः पन्थाः कालश्च ॥ पां पाने । पीथं बालघृतपानमम्भो नवनीतं च । पीथो मकरो रविश्च ॥ गोपूर्वात् । गोपीथस्तीर्थविशेषो गोनिपानं जलद्रोणी कालविशेषश्च ॥ गैं शब्दे । अवगीथं यज्ञकर्मणि प्रातःशंसनम् । उद्गीथः शुनामूर्ध्वमुखानां विरावः सामगानं प्रथमोच्चारणं च ॥ २२७ ॥

न्युद्भ्यां शीङः ॥ २२८ ॥

नि-उद्पूर्वात् शीङ्क् स्वप्ने । इत्यस्मात्क्थित्थः प्रत्ययो भवति ॥ निशीथोऽर्धरात्रो रात्रिः प्रदोषश्च ॥ उच्छीथः स्वप्नः टिट्टिभश्च ॥ २२८ ॥

अवभृनिर्ऋसमिण्भ्यः ॥ २२९ ॥

अवपूर्वात् बिभर्तेः । निस्पूर्वात् अर्तेः । सम्पूर्वात् एतेश्च क्थित्थः प्रत्ययो भवति॥ अवभृथो यज्ञावसानं यज्ञस्नानं च॥ निर्ऋथो निकायः । निर्ऋथं स्थानम् । समिथः संगमो गोधूमपिष्टं च । समिथं समूहः ॥ २२९ ॥

सर्तेर्णित् ॥ २३० ॥

सृं गतौ । इत्यस्माण्णित्थः प्रत्ययो भवति॥ सार्थः समूहः ॥२३० ॥

पथयूथगूथकुथतिथनिथसूरथादयः ॥ २३१ ॥

एते थप्रत्ययान्ता निपात्यन्ते ॥ पलतेर्लो लुक् च । पथः पन्थाः ॥ यौतेर्गुवतेश्च दीर्घश्च । यूथः समूहः गूथममेध्यं विष्ठा च । किरतेः करोतेर्वा कुश्च । कुथः कुथा वास्तरणम् ॥ तनोतेस्तिष्ठतेर्वा तिश्च । तिथः कालः । तिम्यतेः । तिथः प्रावृट्कालः ॥ नयतेर्ह्रस्वश्च । निथः पूर्वक्षत्रियः कालश्च॥ सुपूर्वात् रमेः सोर्दीर्घश्च किच्च । सूरथो दान्तः ॥ आदिग्रहणात् निपूर्वात् रौतेर्दीर्घत्वं च । निरूथो दिक् । निरूथं पुण्यक्रमनियतम् ॥ एवं संगीथप्रगाथादयोपि भवन्ति ॥ २३१ ॥

भृशीशपिशमिगमिरमिवन्दिवञ्चिजीविप्राणिभ्योथः ॥ २३२ ॥

एभ्योथः प्रत्ययो भवति ॥ डुडुभृंग्क् पोषणे च । भरथः कैकेयीसुतोभि-र्लोकपालश्च ॥ शीङ्क् स्वप्ने । शयथोजगरः प्रदोषो मत्स्यो वराहश्च ॥ शपीं आ-क्रोशे । शपथः प्रत्ययकरणमाक्रोशश्च ॥ शमूच् उपशमे । शमथः समाधिराश्र-मपदं च ॥ गम्लृं गतौ । गमथः पन्थाः पथिकश्च ॥ रमिं क्रीडायाम् । रमथः प्रहर्षः ॥ वदुङ् स्तुत्याभिवादनयोः । वन्दथः स्तोता स्तुत्यश्च ॥ वञ्चू गतौ । वञ्चथोध्वा कोकिलः काकदम्भश्च ॥ जीव प्राणधारणे । जीवथोर्थवाञ्जलमन्नं वायु-र्मयूरः कूर्मो धार्मिकश्च ॥ अनक् प्राणने । प्राणथो बलवानीश्वरः प्रजापतिश्च ॥२३२॥

उपसर्गाद्वसः ॥ २३३ ॥

उपसर्गात्परस्मात् वसं निवासे । इत्यस्मादथः प्रत्ययो भवति ॥ आव-सथो गृहम् ॥ उपवसथ उपवासः ॥ संवसथः संवासः ॥ सुवसथः सुवासः ॥ निवसथो निवासः ॥ २३३ ॥

विदिभिदिरुदिद्रुहिभ्यः कित् ॥ २३४ ॥

एभ्यः किदथः प्रत्ययो भवति ॥ विदक् ज्ञाने । विदथो ज्ञानी यज्ञोध्वर्युः संग्रामश्च ॥ भिदूंपी विदारणे । भिदथः शरः ॥ रुदृक् अश्रुविमोचने । रुदथो बालोसत्त्वः श्वा च ॥ द्रुहौच् जिघांसायाम् । द्रुहथः शत्रुः ॥ २३४ ॥

रोर्वा ॥ २३५ ॥

रुक् शब्दे । इत्यस्मादथः प्रत्ययो [भवति] स च किद्वा भवति ॥ रुवथः शकुनिः शिशुश्च ॥ रवथ आक्रन्दः शब्दकारश्च ॥ २३५ ॥

जॄवॄभ्यामूथः ॥ २३६ ॥

आभ्यामूथः प्रत्ययो भवति ॥ जॄष्च् जरसि । जरूथः शरीरमग्रमांस-मग्निः संवत्सरो मार्गः कल्मषं च ॥ वॄग्श् वरणे । वरूथो वर्म सेनाङ्गं बलसं-घातश्च ॥ २३६ ॥

शाशपिमनिकनिभ्यो दः ॥ २३७ ॥

एभ्यो दः प्रत्ययो भवति ॥ शोंच् तक्षणे । शादः कर्दमस्तरुणतृणं मृदु-र्बन्धः सुवर्णं च ॥ शपीं आक्रोशे । शब्दः श्रोत्रग्राह्योर्थः ॥ मनिच् ज्ञाने । म-न्दोलसो बुद्धिहीनश्च ॥ कनै दीप्त्यादिषु । कन्दो मूलम् ॥ २३७ ॥

आपोप् च ॥ २३८ ॥

आप्लृंट् व्याप्तौ । इत्यस्मादिः प्रत्ययो भवत्यस्य च अप् इत्यादेशो भवति ॥ अब्दं वर्षम् ॥ २३८ ॥

गोः कित् ॥ २३९ ॥

गंन् पुरीषोत्सर्गे। इत्यस्मात्किदः प्रत्ययो भवति ॥ गुदमपानम् ॥२३९॥

वृतुकुसुभ्यो नोन्तश्च ॥ २४० ॥

एभ्यः किदः प्रत्ययो [भवति] नकारश्चान्तो भवति ॥ वृग्ट् वरणे । वृन्दं समूहः ॥ तुंक् वृत्त्यादिषु । तुन्दं जठरम् ॥ कुंङ् शब्दे । कुन्दः पुष्पजातिः ॥ षुंग्ट् अभिषवे । सुन्दो दानवः ॥ २४० ॥

कुसेरिदेदौ ॥ २४१ ॥

कुसच् श्लेषे । इत्यस्मादिद ईद इत्येतौ कितौ प्रत्ययौ भवतः ॥ कुसिद-मृणम् ॥ कुसीदं वृद्धिजीविका ॥ २४१ ॥

इङ्ग्यर्बिभ्यामुदः ॥ २४२ ॥

आभ्यामुदः प्रत्ययो भवति ॥ इगु गतौ । इङ्गुदो वृक्षजातिः ॥ अर्ब गतौ । अर्बुदः पर्वतोक्षिव्याधिः संख्याविशेषश्च । निपूर्वात् । न्यर्बुदं संख्या-विशेषः ॥ २४२ ॥

ककेर्णिद्वा ॥ २४३ ॥

ककि लौल्ये। इत्यस्मादुदः प्रत्ययो [भवति] स च णिद्वा भवति ॥ काकुदं तालु ॥ ककुदं स्कन्धः ॥ २४३ ॥

कुमुदबुद्बुदादयः ॥ २४४ ॥

एत उदप्रत्ययान्ता निपात्यन्ते ॥ कमेः कुम् च । कुमुदं कैरवम् ॥ बुन्देः किद्बोन्तश्च । बुद्बुदो जलस्फोटः । बुद्बुदं नेत्रजो व्याधिः ॥ आदिग्रहणात् दुहींक् क्षर-णे । प्रत्ययादेरत्वे । दोहदोभिलाषविशेषः ॥ एवमन्येपि ॥ २४४ ॥

ककिमकिभ्यामन्दः ॥ २४५ ॥

आभ्यामन्दः प्रत्ययो भवति ॥ ककि लौल्ये ॥ मकिः सौत्रः । ककन्दो मकन्दश्च राजानौ । यकाभ्यां निर्वृत्ता काकन्दी माकन्दी च नगरी ॥ २४५ ॥

कल्यलिपुल्किकुरिकुणिमणिभ्य इन्दक् ॥ २४६ ॥

एभ्य इन्दक् प्रत्ययो भवति ॥ कलि शब्दसंख्यानयोः । कलिन्दः पर्वतो

यतो यमुना प्रभवति ॥ अली भूषणादौ । अलिन्दः प्रघाणो भाजनस्थानं च ॥ पुल महत्त्वे । पुलिन्दः शबरः ॥ कुरत् शब्दे । कुरिन्दः सस्यमलहरणोपकरणं तेजनोपकरणं च ॥ कुणत् शब्दोपकरणयोः । कुणिन्दो म्लेच्छः शब्द उपकरणं च ॥ मण शब्दे । मणिन्दोश्ववल्लवः ॥ २४६ ॥

कुपेर्व च वा ॥ २४७ ॥

कुपच् क्रोधे । इत्यस्मादिन्दक् प्रत्ययो भवति वश्चान्तादेशो वा भवति ॥ कुपिन्दः । कुविन्दस्तन्तुवायः ॥ २४७ ॥

पॄपलिभ्यां णित् ॥ २४८ ॥

आभ्यां णिदिन्दक् प्रत्ययो भवति ॥ पॄश् पालनपूरणयोः ॥ पल गतौ । पारिन्दः । पालिन्दः । द्वावपि वृक्षगाथकौ ॥ पारिन्दो मुख्यः पूज्यश्च ॥ पालिन्दो नृपतिः । रक्षकश्चेत्येके ॥ २४८ ॥

यमेरुन्दः ॥ २४९ ॥

यमूं उपरमे । इत्यस्मादुन्दः प्रत्ययो भवति ॥ यमुन्दः क्षत्रियविशेषः ॥ २४९ ॥

मुचेर्डुकुन्दकुकुन्दौ ॥ २५० ॥

मुच्लृंती मोक्षणे । इत्यस्माड्डिदुकुन्दः किदुकुन्दश्च प्रत्ययौ भवतः ॥ मुकुन्दो विष्णुः । मुचुकुन्दो राजा वृक्षविशेषश्च ॥ २५० ॥

स्कन्द्यमिभ्यां धः ॥ २५१ ॥

आभ्यां धः प्रत्ययो भवति ॥ स्कन्दृं गतिशोषणयोः । स्कन्धो बाहुमूर्धा ककुदं त्रिभागश्च । बाहुलकाद्दस्य लुक् ॥ अम गतौ । अन्धश्चक्षुर्विकलः॥२५१॥

नेः स्यतेरधक् ॥ २५२ ॥

निपूर्वात् षोंच् अन्तकर्मणि । इत्यस्मादधक् प्रत्ययो भवति ॥ निषधः पर्वतः । निषधा जनपदः ॥ २५२ ॥

मङ्गेर्नलुक् च ॥ २५३ ॥

मगु गतौ । इत्यस्मादधक् प्रत्ययो [भवति] नकारस्य च लुग्भवति ॥ मगधा जनपदः ॥ २५३ ॥

आरगेर्वधः ॥ २५४ ॥

आङ्पूर्वात् रगे शङ्कायाम् । इत्यस्माद्वधः प्रत्ययो भवति ॥ आरग्वधो वृक्षजातिः ॥ २५४ ॥

परात् श्रो डित् ॥ २५५ ॥

परपूर्वात् शॄश् हिंसायाम् । इत्यस्माड्डिद्धः प्रत्ययो भवति ॥ परश्वध आयुधजातिः ॥ २५५ ॥

इषेरुधक् ॥ २५६ ॥

इषत् इच्छायाम् । इत्यस्मादुधक् प्रत्ययो भवति ॥ इषुधो यज्ञ [?]॥२५६॥

कौरन्धः ॥ २५७ ॥

कुंङ् शब्दे । इत्यस्मादन्धः प्रत्ययो भवति ॥ कवन्धश्छिन्नमूर्धा देहः ॥ २५७ ॥

प्याधापन्यनिस्वदिस्वपिवस्यज्यतिसिविभ्यो नः ॥ २५८ ॥

एभ्यो नः प्रत्ययो भवति ॥ प्यैङ् वृद्धौ ॥ प्यानः समुद्रश्चन्द्रश्च॥ डुधांग्क् धारणे च । धाना भृष्टो यवोङ्कुरश्च ॥ पनि स्तुतौ । पन्नं नीचैःकरणं सन्नं जिह्वा च ॥ अनक् प्राणने । अन्नं भक्तमाचारश्च ॥ ष्वदि आस्वादने । स्वन्नं रुचितम् ॥ ञिष्वपंक् शये । स्वप्नो मनोविकारो निद्रा च ॥ वसं निवासे । वस्नं वासो मूल्यं मेढ्रमागमश्च ॥ अज क्षेपणे च । वेनः प्रजापतिर्ध्यानी राजावायुर्यज्ञः प्राज्ञो मूर्खश्च ॥ अत सातत्यगमने । अत्न आत्मा वायुर्मेघः प्रजापतिश्च ॥ षिवूञ् उतौ । स्योनं सुखं तन्तुवायसूत्रसंतानः समुद्रः सूर्यो रश्मिरास्तरणं च ॥ २५८॥

षसेर्णित् ॥ २५९ ॥

षसक् स्वप्ने । इत्यस्माण्णिन्नः प्रत्ययो भवति ॥ सास्ना गोकण्ठावलम्बि चर्म निद्रा च ॥ २५९ ॥

रसेर्वा ॥ २६० ॥

रस शब्दे । इत्यस्मान्नः प्रत्ययो [भवति] स च णिद्वा भवति ॥ रास्ना धेनुरोषधिजातिश्च ॥ रस्नं द्रव्यजातिः । रस्ना जिह्वा । रस्नस्तुरङ्गो दण्डश्च ॥२६०॥

जीण्शीदीबुध्यविमीभ्यः कित् ॥ २६१ ॥

एभ्यः किन्नः प्रत्ययो भवति ॥ जिं अभिभवे । जिनोर्हन्बुद्धश्च ॥ इण्क् गतौ । इनः स्वामी संनिपात ईश्वरो राजा सूर्यश्च ॥ शीङ्क् स्वप्ने । शीनः पीलुः ॥ दींङ्च् क्षये । दीनः कृपणः खिन्नश्च ॥ बुधिंच् ज्ञाने । बुध्नो मूलं पृष्ठान्तो रुद्रश्च ॥ अव रक्षणादौ । ऊनमपरिपूर्णम् ॥ मींङ्च् हिंसायाम् । मीनो मत्स्यो राशिश्च ॥ २६१ ॥

सेर्वा ॥ २६२ ॥

षिंग्ट् बन्धने । इत्यस्मान्नः प्रत्ययो [भवति] स च किद्वा भवति ॥ सिनः कायो वस्त्रं बन्धश्च ॥ सेना चमूः ॥ २६२ ॥

सोरू च ॥ २६३ ॥

षुंग्ट् अभिषवे । इत्यस्मान्नः प्रत्ययो [भव] त्यूकारश्चान्तादेशो भवति ॥ सूना घातस्थानं दुहिता पुत्रः प्रकृतिराघाटस्थानं च ॥ २६३ ॥

रमेस्त् च ॥ २६४ ॥

रमिं क्रीडायाम् । इत्यस्मान्नः प्रत्ययो [भवति] तश्चान्तादेशो भवति ॥ रत्नं वज्रादिः ॥ २६४ ॥

क्रुशेर्वृद्धिश्च ॥ २६५ ॥

क्रुशं आह्वानरोदनयोः । इत्यस्मान्नः प्रत्ययो [भव] त्यस्य च वृद्धिर्भवति ॥ क्रौश्नः श्वापदः ॥ २६५ ॥

द्युसुनिभ्यो माङो ङित् ॥ २६६ ॥

द्युसुनिपूर्वात् मांङ्क् मानशब्दयोः । इत्यस्माड्डिन्नः प्रत्ययो [भवति ॥] द्युम्नं द्रविणम् ॥ सुम्नं सुखम् ॥ निम्नं नतम् ॥ २६६ ॥

शीङः सन्वत् ॥ २६७ ॥

शीङ्क् स्वप्ने । इत्यस्माड्डिन्नः प्रत्ययो [भवति] स च सन्वद्भवति ॥ शिश्नं शेपः ॥ २६७ ॥

दिननग्नफेनचिह्नब्रध्नधेनस्तेनच्यौक्नादयः ॥ २६८ ॥

एते नप्रत्ययान्ता निपात्यन्ते ॥ दीव्यतेः किल्लुक् च । दिनमहः ॥ नञ्पूर्वात् वसेर्गोन्तो धातोर्लुक् च । न वस्ते । नग्नोवसनः ॥ फणेः फलेः स्फायेर्वा फेभावश्च । फेनो बुद्बुदसंघातः ॥ चहेरिच्चोपान्त्यस्य । चिह्नमभिज्ञानम् ॥ बन्धेर्ब्रध् च । ब्रध्नो रविः प्रजापतिर्ब्रह्मा स्वर्गः पृष्ठान्तश्च ॥ धयतेरेत्वं च । धेना सरस्वती माता च । धेनः समुद्रः । ईत्वं चेत्येके । धीना ॥ स्त्यायेस्ते च । स्तेनश्चौरः ॥ च्यवतेर्वृद्धिः कोन्तश्च । च्यौक्नमक्षस्थानमनुजः क्षीणपुण्यश्च । च्यौक्नी कांस्यादिपात्री ॥ आदिशब्दादन्येपि ॥ २६८ ॥

य्वसिरसिरुचिजिमस्जिदेविस्यन्दिचन्दिमन्दिमण्डिमदिदहिवह्यादेरनः ॥ २६९ ॥

एभ्यो नः प्रत्ययो भवति ॥ युक् मिश्रणे । यवना जनपदः । यवनं मिश्र-

णम् ॥ असूच् क्षेपणे । असनो बीजकः ॥ रसण् आस्वादनस्नेहनयोः । रसना जिह्वा ॥ रुचि अभिप्रीत्यां च । रोचना गोपित्तम् । रोचनश्चन्द्रः । विपूर्वात् । विरोचनोऽग्निः सूर्य इन्दुर्दानवश्च ॥ जि अभिभवे । जयनमूर्णापटः ॥ टुमस्जोंत् शुद्धौ । मज्जनं स्नानं तोयं च ॥ देवृङ् देवने । देवनोऽक्षः कितवश्च ॥ स्यन्दौङ् स्रवणे । स्यन्दनो रथः ॥ चदु दीप्त्याह्लादयोः । चन्दनं गन्धद्रव्यम् ॥ मदुङ् स्तुत्यादौ । मन्दनं स्तोत्रम् ॥ मडु भूषायाम् । मण्डनमलंकारः ॥ मदैच् हर्षे । मदनो वृक्षः कामो मधूच्छिष्टं च ॥ दहं भस्मीकरणे । दहनोऽग्निः ॥ वहीं प्रापणे । वहनं नौः ॥ आदिग्रहणात् पचेः । पचनोऽग्निः ॥ पुनातेः । पवनो वायुः ॥ बिभर्तेः । भरणं साधनम् ॥ नयतेः । नयनं नेत्रम् ॥ द्युतेः । द्योतनः सूर्यः ॥ रचेः । रचना वैचित्र्यम् ॥ गृञ्जेः । गृञ्जनमभक्ष्यद्रव्यविशेषः ॥ प्रस्कन्दनः ॥ प्रपतनः ॥ इत्यादयोऽपि भवन्ति ॥ २६९ ॥

अशो रश्चादौ ॥ २७० ॥

अशौटि व्याप्तौ । इत्यस्मादनः प्रत्ययो [भवति] रेफश्चादौ भवति ॥ रशना मेखला ॥ रशिमेके प्रकृतिमुपदिशन्ति सा च राशि रशना रश्मि इत्यत्र प्रयुज्यत इत्याहुः ॥ २७० ॥

उन्देर्नलुक् च ॥ २७१ ॥

उन्दैप् क्लेदने । इत्यस्मादनः प्रत्ययो [भवति] नलोपश्च भवति ॥ ओदनो भक्तम् ॥ २७१ ॥

हनेर्घतजघौ च ॥ २७२ ॥

हनंक् हिंसागत्योः । इत्यस्मादनः प्रत्ययो [भवति] घतजघावित्यादेशौ चास्य भवतः । घतनो रङ्गोपजीवी पापकर्मा निर्लज्जश्च ॥ जघनं श्रोणिः ॥ २७२ ॥

तुदादिवृजिरञ्जिनिधाभ्यः कित् ॥ २७३ ॥

एभ्यः किदनः प्रत्ययो भवति ॥ तुदींत् व्यथने । तुदनः ॥ क्षिपींत् प्रेरणे । क्षिपणः ॥ सुरत् ऐश्वर्यदीप्त्योः । सुरणः ॥ बुधिंच् ज्ञाने । बुधनः ॥ षिवूच् उतौ । सिवनः ॥ एषां यथासंभवं कारकमुच्यते । लबुङ् अवस्रंसने । लम्बनः शकुनिः ॥ वृजैकि वर्जने । वृजनमन्तरिक्षं निवारणं मण्डनं च ॥ रञ्जीं रागे । रजनं हरिद्रा । महारजनं कुसुम्भम् । रजनो रङ्गविशेषः ॥ डुधांग्क् धारणे च । निधनमवसानम् ॥ २७३ ॥

सूधूभूभ्रस्जिभ्यो वा ॥ २७४ ॥

एभ्योनः प्रत्ययो भवति स च किद्वा [भवति]॥ षूत् प्रेरणे। सुवनोङ्कुर आदित्यः प्रादुर्भावश्च। सुवनं चन्द्रप्रभा। सवनं यज्ञः पूर्वाह्णापराह्णमध्याह्नकालश्च। त्रिषवणम् ॥ धूत् विधूनने। धुवनो धूमो वायुरग्निश्च। धुवनमेधः। धवनम् ॥ भू सत्तायाम्। भुवनं जगत्। भवनं गृहम् ॥ भ्रस्जींत् पाके। भृज्जनमन्तरिक्षमम्बरीषः पाकश्च। भ्रज्जनः पावकः ॥ २७४ ॥

विदनगगनगहनादयः ॥ २७५ ॥

एते किदनप्रत्ययान्ता निपात्यन्ते ॥ विदु अवयवे। नलोपश्च। विदनो गोत्रकृत् ॥ गमेर्ग् च। गगनमाकाशम् ॥ गाहौङ् विलोडने। ह्रस्वश्च। गहनं दुर्गमम् ॥ आदिग्रहणात् काञ्चनकाननादयो भवन्ति ॥ २७५ ॥

संस्तुस्पृशिमन्थेरानः ॥ २७६ ॥

सम्पूर्वात् स्तोः स्पृशेश्च सम्पूर्वाभ्यां वा स्तुस्पृशिभ्यां मन्थेश्च आनः प्रत्ययो भवति ॥ टुंग्क् स्तुतौ। संस्तवानः सोमो होता महर्षिर्वाग्मी च ॥ [स्पृशंत् संस्पर्शे] स्पर्शानो मनः। संस्पर्शानोमनोग्निश्च ॥ मन्थश् विलोडने। मन्थानः खजकः॥२७६॥

युयुजियुधिबुधिमृशिदृशीशिभ्यः कित् ॥ २७७ ॥

एभ्यः किदानः प्रत्ययो भवति ॥ युक् मिश्रणे। युवानस्तरुणः ॥ युजूंपी योगे। युजानः सारथिः ॥ युधिंच् संप्रहारे। युधानो रिपुः ॥ बुधिंच् ज्ञाने। बुधान आचार्यः पण्डितो वा ॥ मृशंत् आमर्शने। मृशानो विमर्शकः ॥ दृशूं प्रेक्षणे। दृशानो लोकपालः ॥ युजादिप्रसिद्धकर्त्रर्था एते ॥ ईशिक् ऐश्वर्ये। ईशान ईश्वरः ॥ २७७ ॥

मुमुचानयुयुधानशिश्विदानजुहुराणजिह्रियाणाः ॥ २७८ ॥

एते किदानप्रत्ययान्ता निपात्यन्ते ॥ मुचेर्द्वित्वं च। मुमुचानो मेघः ॥ एवं युधिंच् संप्रहारे। युयुधानः साहसिको राजा च कश्चित् ॥ श्विताङ् वर्णे। अस्य दश्च। शिश्विदानो दुराचारो द्विजः ॥ हुर्छा कौटिल्ये। अस्यान्तलुक् च। जुहुराणः कठिनहृदयः कुटिलोग्निरध्वर्युरनड्वांश्च ॥ ह्रींक् लज्जायाम्। जिह्रियाणो नीतिमान् ॥ सर्व एवैते मुच्यादिप्रसिद्धक्रियाकर्तृवचना इत्येके। अन्ये तु मुमुक्षादिसन्नन्तप्रकृतीनामेतन्निपातनं तेन सन्नन्तक्रियाकर्तृवचना इत्याहुः ॥२७८॥

ऋञ्जिरञ्जिमन्दिसह्यर्हिभ्योसानः ॥ २७९ ॥

एभ्योसानः प्रत्ययो भवति ॥ ऋजुङ् भर्जने । ऋञ्जसानो महेन्द्रो मेघः श्मशानं च ॥ रञ्जीं रागे । रञ्जसानो धर्मो मेघश्च ॥ मदुङ् स्तुत्यादिषु । मन्दसानो हंसश्चन्द्रः सूर्यो जीवः स्वर्गोग्निश्च ॥ षहि मर्षणे । सहसानो वृद्धो मयूरो यजमानः क्षमावांश्च ॥ अर्ह पूजायाम् । अर्हसानश्चन्द्रस्तुरंगमश्च ॥ २७९ ॥

रुहियजेः कित् ॥ २८० ॥

आभ्यां किदसानः प्रत्ययो भवति ॥ रुहं जन्मनि । रुहसानो विटपः ॥ यजीं देवपूजासंगतिकरणदानेषु । इजसानो धर्मः ॥ २८० ॥

वृधेर्वा ॥ २८१ ॥

वृधेरसानः प्रत्ययो [भवति] स च किद्वा भवति ॥ वृधूङ् वृद्धौ । वृधसानो गर्भः । वर्धसानो गिरिर्मृत्युर्गर्भः पुरुषश्च ॥ २८१ ॥

श्याकठिखलिनल्यविकुण्डिभ्य इनः ॥ २८२ ॥

एभ्य इनः प्रत्ययो भवति ॥ श्यैंङ् गतौ । श्येनः पक्ष्यभिचारयज्ञश्च ॥ कठ कृच्छ्रजीवने । कठिनममृदु ॥ खल संचये च । खलिनमश्वमुखसंयमनम् ॥ णल गन्धे । नलिनं पद्मम् ॥ अव रक्षणादौ । अविनं जलं मृगो नाशोग्नी राजाध्वर्युविधानं गुग्निश्च ॥ कुडुङ् दाहे । कुण्डिन ऋषिः । कुण्डिनं नगरम् ॥ २८२ ॥

वृजितुहिपुलिपुटिभ्यः कित् ॥ २८३ ॥

एभ्यः किदिनः प्रत्ययो भवति ॥ वृजैकि वर्जने । वृजिनं कुटिलं पापं च ॥ तुहृ अर्दने । तुहिनं हिममन्धकारश्च ॥ पुल महत्त्वे ॥ पुटत् संश्लेषणे । पुलिनं पुटिनं च नदीतीरवालुकासंघातः ॥ २८३ ॥

विपिनाजिनादयः ॥ २८४ ॥

विपिनादयः शब्दाः किदिनप्रत्ययान्ता निपात्यन्ते ॥ डुवपीं बीजसंताने । टुवेपृङ् चलने । इत्यस्य वा । इश्चोपान्त्यस्य । विपिनं गहनमब्जं जलदुर्गं च ॥ अज क्षेपणे च । अस्य वीभावाभावश्च । अजिनं चर्म ॥ आदिग्रहणादन्येपि ॥ २८४ ॥

महेर्णिद्वा ॥ २८५ ॥

मह पूजायाम् । इत्यस्मादिनः प्रत्ययो [भवति] स च णिद्वा भवति ॥ माहिनं राज्यं बलं च ॥ महिनं राज्यं शयनं च । महिनो माहात्म्यवान् ॥ २८५ ॥

खलिहिंसिभ्यामीनः ॥ २८६ ॥

आभ्यामीनः प्रत्ययो भवति ॥ खल संचये च । खलीनं कवियम् ॥ हिंसुप् हिंसायाम् । हिंसीनः श्वापदः ॥ २८६ ॥

पटेर्णित् ॥ २८७ ॥

पट व्यक्तायां वाचि । इत्यस्माण्णिदीनः प्रत्ययो भवति ॥ पाटीनो मत्स्यः ॥ २८७ ॥

यम्यजिशक्यर्जिशीयजितॄभ्य उनः ॥ २८८ ॥

एभ्य उनः प्रत्ययो भवति ॥ यमूं उपरमे । यमुना नदी ॥ अज क्षेपणे च । वयुनं विज्ञानमङ्गं च । वयुनो विद्वाञ्चन्द्रो यज्ञश्च ॥ शक्लृट् शक्तौ । शकुनः पक्षी ॥ अर्ज अर्जने । अर्जुनः ककुभो वृक्षः पार्थः श्वेतवर्णः श्वेताश्वः कार्तवीर्यश्च । अर्जुनी गौः । अर्जुनं तृणं श्वेतसुवर्णं च ॥ शीङ्क् स्वप्ने । शयुनोजगरः। यजीं देवपूजादौ । यजुना क्रतुद्रव्यम् ॥ तॄ प्लवनतरणयोः । तरुणः समर्थो युवा वायुश्च । ऋफिडादित्वाल्लत्वे । तलुनः ॥ २८८ ॥

लषेः श् च ॥ २८९ ॥

लषी कान्तौ । इत्यस्मादुनः प्रत्ययो [भवति] तालव्यशकारश्चान्तादेशो भवति ॥ लशुनं कन्दजातिः ॥ २८९ ॥

पिशिमिथिक्षुधिभ्यः कित् ॥ २९० ॥

एभ्यः किदुनः प्रत्ययो भवति ॥ पिशत् अवयवे । पिशुनः खलः । पिशुनं मैत्रीभेदकं वचनम् । मिथृग् मेधाहिंसयोः । मिथुनं स्त्रीपुंसद्वन्द्वं राशिश्च ॥ क्षुधंच् बुभुक्षायाम् । क्षुधुनः कीटकः ॥ २९० ॥

फलेर्गोन्तश्च ॥ २९१ ॥

फल निष्पत्तौ । इत्यस्मादुनः प्रत्ययो [भवति] गश्चान्तो भवति ॥ फल्गुनोर्जुनः । फल्गुनी नक्षत्रम् ॥ २९१ ॥

वीपतिपटिभ्यस्तनः ॥ २९२ ॥

एभ्यस्तनः प्रत्ययो भवति ॥ वींक् प्रजननादौ । वेतनं भृतिः ॥ पतॢ गतौ । पत्तनम् ॥ पट गतौ । पट्टनम् ॥ द्वावपि नगरविशेषौ ॥ पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च । नौभिरेव तु यद्गम्यं पत्तनं तत्प्रचक्षते ॥ २९२ ॥

पॄपूभ्यां कित् ॥ २९३ ॥

आभ्यां कित्तनः प्रत्ययो भवति ॥ पॄङ्त् व्यायामे । पृतना सेना ॥ पूग्श् पवने । पूतना राक्षसी ॥ २९३ ॥

कृत्यशौभ्यां स्नक् ॥ २९४ ॥

आभ्यां स्नक् प्रत्ययो भवति ॥ कृतैत् छेदने । कृत्स्नं सर्वम् ॥ अशौटि व्याप्तौ । अक्ष्णं नयनं व्याधी रज्जुस्तेजनमखण्डं च ॥ २९४ ॥

अतेः शसानः ॥२९५ ॥

ऋक् गतौ । इत्यस्मात्तालव्यादिः शसानः प्रत्ययो भवति ॥ अर्शसानः पन्था इषुरग्निश्च ॥ २९५ ॥

भापाचणिचमिविषिसृपॄतॄशीतल्यलिशमिरमिवपिभ्यः पः ॥ २९६ ॥

एभ्यः पः प्रत्ययो भवति ॥ भांक् दीप्तौ । भाप आदित्यो ज्येष्ठश्च भ्राता ॥ पांक् रक्षणे । पापं कल्मषम् । पापो घोरः ॥ चण हिंसादानयोश्च । चण्पा नगरी । चण्पो वृक्षः ॥ चमू अदने । चम्पा नगरी ॥ विष्लृंकी व्याप्तौ । वेष्पः परमात्मा स्वर्ग आकाशश्च । निपूर्वात् । निवेष्पोपां गर्भः कूपो वृक्षजातिरन्तरीक्षं च ॥ सृं गतौ । सर्पोहिः ॥ पॄश् पालनपूरणयोः । पर्पः प्लवः शङ्कुः समुद्रः शस्त्रं च ॥ तॄ प्लवनतरणयोः । तर्प उडुपो नौश्च । शीङ्क् स्वप्ने । शेपः पुच्छम् ॥ तलण् प्रतिष्ठायाम् । तल्पं शयनीयमङ्कः दारा युद्धं च ॥ अली भूषणादौ । अल्पं स्तोकम् ॥ शमूच् उपशमे । शम्पा विद्युत्काञ्ची च । विपूर्वात् । विशम्पो दानवः ॥ रमिं क्रीडायाम् । रम्पा चर्मकारोपकरणम् ॥ डुवपीं बीजसंताने ॥ वप्पः पिता ॥ २९६ ॥

युसुकुरुतुच्युस्त्वादेरूच्च ॥ २९७ ॥

एभ्यः पः प्रत्ययो भवत्यूकारश्चान्तादेशो भवति ॥ युक् मिश्रणे । यूपो यज्ञपशुबन्धनकाष्ठम् ॥ षुंग्ट् अभिषवे । सूपो मुद्गादिभिन्नकृतः ॥ कुंक् शब्दे । कूपः प्रहिः ॥ रुक् शब्दे । रूपं श्वेतादि लावण्यं स्वभावश्च ॥ तुंक् वृत्त्यादौ । तूप आयतनविशेषः ॥ च्युंङ् गतौ । च्यूप आदित्यो वायुः संग्रामश्च ॥ ष्टुंग्क् स्तुतौ । स्तूपो बोधिसत्त्वभवनमुपायतनं च ॥ आदिशब्दादन्येपि ॥ २९७ ॥

कॄशॄसृभ्य ऊर् चान्तस्य ॥ २९८ ॥

एभ्यः पः प्रत्ययो [भव]त्यन्तस्य च ऊर् भवति ॥ कॄत् विक्षेपे । कूर्पं भ्रूमध्यम् ॥ शॄश् हिंसायाम् । शूर्पो धान्यादिनिष्पवनभाण्डं संख्या च ॥ सृं गतौ । सूर्पो भुजंगमो मत्स्यजातिश्च ॥ २९८ ॥

शदिबाधिखनिहनेः ष् च ॥ २९९ ॥

एभ्यः पः प्रत्ययो [भवति] षश्चान्तादेशो भवति ॥ शद्लृं शातने । शष्पं

बालतृणम् । शप हिंसायाम् । इत्यस्य वा रूपम् ॥ बाधृङ् रोटने । बाष्पोऽश्रु धूमाभासं च मुखपानीयादौ ॥ खनूग् अवदारणे । खष्पो बलात्कारो दुर्मेधाः कूपश्च । खष्पं खलीनं जनपदविशेषोद्गारश्च ॥ हनंक् हिंसागत्योः । हष्पः प्रावरणजातिः ॥ २९९ ॥

पम्पाशिल्पादयः ॥ ३०० ॥

पम्पादयः शब्दाः पप्रत्ययान्ता निपात्यन्ते ॥ पांक् रक्षणे । मोऽन्तो ह्रस्वश्च । पम्पा पुष्करिणी ॥ शीलयतेः शलतेः शेतेर्वा शिलादेशश्च । शिल्पं विज्ञानम् ॥ आदिशब्दादन्येऽपि ॥ ३०० ॥

क्षुचुपिपूभ्यः कित् ॥ ३०१ ॥

एभ्यः कित्पः प्रत्ययो भवति ॥ टुक्षुरु शब्दे । क्षुपो गुच्छः ॥ चुप मन्दायाम् । चुप्पं मन्दगमनम् ॥ पूग्श् पवने । पूपः पिष्टमयः ॥ ३०१ ॥

नियो वा ॥ ३०२ ॥

णींग् प्रापणे । इत्यस्मात्पः प्रत्ययो [भवति] स च किद्वा भवति ॥ नीपो वृक्षविशेषः ॥ नेपो नयः पुरोहितो वृक्षो भृतकश्च । नेपमुदकं यानं च ॥ ३०२ ॥

उभ्यवेर्लुक् च ॥ ३०३ ॥

आभ्यां कित्पः प्रत्ययो भवति लुक् चान्तस्य भवति । उभत् पूरणे । अव रक्षणादौ । उप । अप चाव्यये ॥ ३०३ ॥

दलिवलितलिखजिध्वजिकचिभ्योऽपः ॥ ३०४ ॥

एभ्योऽपः प्रत्ययो भवति ॥ दल विशरणे । दलपः प्रहरणं रणमुखं छिदलं दलविशेषश्च । दलपं व्रणमुखत्राणम् ॥ वलि संवरणे । वलपः कर्णिका ॥ तलण् प्रतिष्ठायाम् । तलपो हस्तप्रहारः ॥ खज मन्थे । खजपो मन्थः । खजपं दधिघृतमुदकं च ॥ ध्वज गतौ । ध्वजपो ध्वजः ॥ कचि बन्धने । कचपः शाकपर्णं बन्धश्च ॥ ३०४ ॥

भुजिकुतिकुटिविटिकुणिकुष्युषिभ्यः कित् ॥ ३०५ ॥

एभ्यः किदपः प्रत्ययो भवति ॥ भुजंप् पालनाभ्यवहारयोः । भुजपो राजा यजमानपालनादग्निश्च ॥ कुतिः सौत्रः । कुतपश्छागलोम्नां कम्बल आस्तरणं श्राद्धकालश्च । कुटत् कौटिल्ये । कुटपः प्रस्थचतुर्भागो नीडं च शकुनीनाम् ॥

विट शब्दे। विटपः शाखा॥ कुणत् शब्दोपकरणयोः। कुणपो मृतकं कुथितं शब्दार्थसारूप्यं च॥ कुषश् निष्कर्षे। कुषपो विन्ध्यः संदंशश्च॥ उषू दाहे। उषपो दाहः सूर्यो वह्निश्च॥ ३०५॥

शंसेः श इच्चातः॥ ३०६॥

शंसु स्तुतौ च। इत्यस्मादपः प्रत्ययो [भवति] तालव्यशकारान्तादेशोकारस्य च इकारो भवति॥ शिंशपा वृक्षविशेषः॥ ३०६॥

विष्टपोलपवातपादयः॥ ३०७॥

विष्टपादयः शब्दाः किदपप्रत्ययान्ता निपात्यन्ते॥ विषेस्तोन्तश्च। विष्टपं जगत्सुकृतिनां स्थानं च॥ वलेरुल् च। उलपं पर्वततृणं पङ्कजं जलं च। उलप ऋषिः॥ वातेस्तोन्तश्च। वातप ऋषिः॥ आदिग्रहणात् खरपादयोपि भवन्ति॥ ३०७॥

कलेरापः॥ ३०८॥

कलि शब्दसंख्यानयोः। इत्यस्मादापः प्रत्ययो भवति॥ कलापः काञ्ची समूहः शिखण्डश्च॥ ३०८॥

विशेरीपक्॥ ३०९॥

विशंत् प्रवेशने। इत्यस्मादिपक् प्रत्ययो भवति॥ विशिपो राशिः। विशिपं तृणं वेश्मासनं पद्मं च॥ ३०९॥

दलेरीपो दिल् च॥ ३१०॥

दल विशरणे। इत्यस्मादीपः प्रत्ययो भवति दिल् चास्यादेशो भवति॥ दिलीपो राजा॥ ३१०॥

उडेरुपक्॥ ३११॥

उड्‌ संघाते। इति सौत्रादुपक् प्रत्ययो भवति॥ उडुपः प्लवः। जपादित्वाद्वत्वे। उडुवः॥ ३११॥

अशः ऊपः पश्च॥ ३१२॥

अशौटि व्याप्तौ। इत्यस्मादूपः प्रत्ययो [भवति] पश्चान्तादेशो भवति॥ अपूपः पक्वान्नविशेषः॥ ३१२॥

सर्तेः षपः॥ ३१३॥

सृं गतौ। इत्यस्मात् षपः प्रत्ययो भवति॥ सर्षपो रक्षोघ्नं द्रव्यं शाकं च॥ ३१३॥

रीशीभ्यां फः ॥ ३१४ ॥

आभ्यां फः प्रत्ययो भवति ॥ रीङ्च् स्रवणे । रेफः कुत्सितः ॥ शीङ्क् स्वप्ने । शेफो मेण्ढ्रः ॥ ३१४ ॥

कलिगलेरस्योच्च ॥ ३१५ ॥

आभ्यां फः प्रत्ययो [भव]त्यस्य च उकारो भवति ॥ कलि शब्दसंख्यानयोः । गल अदने । कुल्फो गुल्फश्च जङ्घांह्रिसंधिः । गुल्फः पादोपरिग्रन्थिः ॥ ३१५ ॥

शफकफशिफाशोफादयः ॥ ३१६ ॥

शफादयः शब्दाः फप्रत्ययान्ता निपात्यन्ते ॥ श्यतेः कायतेश्च ह्रस्वश्च । शफः खुरः प्रियंवदश्च ॥ कफः श्लेष्मा ॥ श्यतेरित्वमोत्वं च । शिफा वृक्षजटा । शोफः श्वयथुः खुरश्च ॥ आदिशब्दात् रिफानफाल्गुनफादयो भवन्ति ॥ ३१६ ॥

वलिनितनिभ्यां वः ॥ ३१७ ॥

वलि संवरणे । निपूर्वाच्च तनूयी विस्तारे । इत्याभ्यां वः प्रत्ययो भवति ॥ वल्वो वृक्षः ॥ नितम्बः श्रोणिः पर्वतैकदेशो नटश्च ॥ ३१७ ॥

शम्यमेर्णिद्वा ॥ ३१८ ॥

आभ्यां वः प्रत्ययो [भवति] स च णिद्वा भवति ॥ शमूच् उपशमे । शम्बो वज्रः कर्षणविशेषो वेणुदण्डस्तोत्रमरित्रं च ॥ शम्बशाम्बौ जाम्बवतेयौ ॥ अम गतौ । अम्बा माता । आम्बोपह्लवः ॥ ३१८ ॥

शल्यलेरुच्चातः॥३१९॥

आभ्यां वः प्रत्ययो [भव]त्यकारस्य च उकारो भवति ॥ पल फल शल गतौ । शुल्वं ताम्रम् ॥ अली भूषणादौ । उल्वं रजतं गर्भवेष्टनम् ॥ शुल्वं बभ्रुस्तरक्षुश्च ॥ ३१९ ॥

तुम्बस्तम्बादयः ॥ ३२० ॥

तुम्बादयः शब्दा बप्रत्ययान्ता निपात्यन्ते ॥ ताम्यतेरत उत्वं च । तुम्बमलाबु चक्राङ्गं च ॥ स्तम्भेर्लुक् च । स्तम्बस्तृणं विटपः संघातोङ्कुरसमुदायः स्तबकः पुष्पापीडश्च ॥ आदिशब्दात् कुशाम्बादयो भवन्ति ॥ ३२० ॥

कृकडिकटिवटेरम्बः ॥ ३२१ ॥

एभ्योम्बः प्रत्ययो भवति ॥ डुकृंग् करणे । करम्बो दध्योदनो दधिसक्तवः पुष्पं च । कडत् मदे । कडम्बो जातिविशेषो जनपदविशेषश्च ॥ कटे वर्षा-

वरणयोः । कटम्बः पक्वान्नविशेषो वादित्रं च ॥ कडम्बकटम्बौ वृक्षौ च ॥ वट वेष्टने । वटम्बः शैलस्तृणपुञ्जश्च ॥ ३२१ ॥

कदेर्णिद्वा ॥ ३२२ ॥

कद वैक्लव्ये । इति सौत्रादम्बः प्रत्ययो [भवति] स च णिद्वा भवति ॥ कादम्बो हंसः ॥ कदम्बो वृक्षजातिः ॥ ३२२ ॥

शिलविलादेः कित् ॥ ३२३ ॥

शिलादिभ्यः किदम्बः प्रत्ययो भवति ॥ शिलत् उञ्छे । शिलम्ब ऋषिस्तन्तुवायश्च ॥ विलत् वरणे । विलम्बो वेषविशेषो रङ्गावसरश्च ॥ आदिग्रहणादन्येपि ॥ ३२३ ॥

हिण्डिविलेः किम्बो नलुक् च ॥ ३२४ ॥

आभ्यां किदिम्बः प्रत्ययो [भवति] नस्य च लुग्भवति ॥ हिडुङ् गतौ च । विलत् वरणे । हिडिम्बो विलिम्बश्च राक्षसौ ॥ ३२४ ॥

डीनीबन्धिशृधिचलिभ्यो डिम्बः ॥ ३२५ ॥

एभ्यो डिदिम्बः प्रत्ययो भवति ॥ डीङ् विहायसां गतौ । डिम्बो राजोपद्रवः ॥ णींग् प्रापणे । निम्बो वृक्षविशेषः ॥ बन्धंश् बन्धने । बिम्बं प्रतिच्छन्दको देहश्च । बिम्बी वल्लिजातिः ॥ शृधूङ् शब्दकुत्सायाम् । शिम्बो मृगजातिः । शिम्बी निष्पाववल्ली च ॥ चल कम्पने । चिम्बा यवागूजातिः ॥ ३२५ ॥

कुटयुन्दिचुरितुरिपुरिमुरिकुरिभ्यः कुम्बः ॥ ३२६ ॥

एभ्यः किदुम्बः प्रत्ययो भवति ॥ कुटत् कौटिल्ये । कुटुम्बं दारादयः ॥ उदैप् क्लेदने । उदुम्बः समुद्रः ॥ चुरण् स्तेये । तुर त्वरणे सौत्रः । चुरुम्बस्तुरुम्बश्च गहनम् ॥ पुरत् अग्रगमने । पुरुम्ब आहारः ॥ मुरत् संवेष्टने । मुरुम्बो मृद्यमानपाषाणचूर्णम् ॥ कुरत् शब्दे । कुरुम्बोऽङ्कुरः । निपूर्वात् । निकुरुम्बो राशिः ॥ ३२६ ॥

गृदृरमिहनिजन्यर्तिदलिभ्यो भः ॥ ३२७ ॥

एभ्यो भः प्रत्ययो भवति ॥ गॄत् निगरणे । गर्भो जठरस्थप्राणी ॥ दॄश् विदारणे । दर्भः कुशः ॥ रमिं क्रीडायाम् । रम्भाप्सराः कदली च ॥ हनंक् हिंसागत्योः । हम्भा गोधेनुनादः ॥ जनैचि प्रादुर्भावे । जम्भो दानवो दन्तश्च । जम्भा मुखविदारणम् ॥ ऋंक् गतौ । अर्भः शिशुः ॥ दलण् विदारणे । दल्भ ऋषिर्वल्कलं विदारणं च ॥ ३२७ ॥

इणः कित् ॥ ३२८ ॥

इणक् गतौ । इत्यस्मात्किद्भः प्रत्ययो भवति ॥ इभो हस्ती ॥ ३२८ ॥

कृशृगृशलिकलिकडिगर्दिरासिरमिवडिवल्लेरभः ॥ ३२९ ॥

एभ्योऽभः प्रत्ययो भवति ॥ कृत् विक्षेपे । करभस्त्रिवर्ष उष्ट्रः ॥ शॄश् हिंसायाम् । शरभः श्वापदविशेषः ॥ गॄत् निगरणे । गरभ उदरस्थो जन्तुः ॥ पल फल शल गतौ । शलभः पतंगः ॥ कलि शब्दसंख्यानयोः । कलभो हस्ती यौवनाभिमुखः ॥ कडत् मदे । कडभो हस्तिपोतकः ॥ गर्द शब्दे । गर्दभः खरः ॥ रासृङ् शब्दे । रासभः स एव ॥ रमिं क्रीडायाम् । रमभः प्रहर्षः ॥ वडः सौत्रः । वडभी वेश्माग्रभूमिका । ऋफिडादित्वाल्लत्वे । वलभी ॥ वल्लि संवरणे । वल्लभः स्वामी दयितश्च ॥ ३२९ ॥

सनेर्डित् ॥ ३३० ॥

षन भक्तौ । इत्यस्माड्डिदभः प्रत्ययो भवति ॥ सभा परिषच्छाला च ॥ ३३० ॥

ऋषिवृषिलुसिभ्यः कित् ॥ ३३१ ॥

एभ्यः किदभः प्रत्ययो भवति ॥ ऋषैत् गतौ । वृषू सेचने । ऋषभो वृषभश्च पुङ्गवो भगवांश्चादितीर्थकरः । ऋषभो वायुः ॥ लुसिः सौत्रः । लुसभो हिंस्रो मत्तहस्ती वनं च ॥ ३३१ ॥

सिटिकिभ्यामिभः सैरटिट्टौ च ॥ ३३२ ॥

आभ्यामिभः प्रत्ययो [भवति] दन्त्यादिः सैरः टिट्टश्चादेशौ यथासंख्यं भवतः ॥ षिंग्ट् बन्धने । सैरिभो महिषः ॥ टिकि गतौ । टिट्टिभः पक्षी ॥ ३३२ ॥

ककेरुभः ॥ ३३३ ॥

ककि लौल्ये । इत्यस्मादुभः प्रत्ययो भवति ॥ ककुभोऽर्जुनः ॥ ३३३ ॥

कुकेः कोन्तश्च ॥ ३३४ ॥

कुकि आदाने । इत्यस्मादुभः प्रत्ययो [भवति] ककारश्चान्तो भवति ॥ कुक्कुभः पक्षिविशेषः ॥ ३३४ ॥

दमो दुण्ड् च ॥ ३३५ ॥

दमूच् उपशमे । इत्यस्मादुभः प्रत्ययो [भव]त्यस्य च दन्त्यादिटवर्गतृतीयान्तो दुण्ड् इत्यादेशो भवति ॥ दुण्डुभो निर्विषाहिः ॥ ३३५ ॥

कृकलेरम्भः ॥ ३३६ ॥

आभ्यामम्भः प्रत्ययो भवति ॥ डुकृंग् करणे। करम्भो दधिसक्तवः ॥ कलि शब्दसंख्यानयोः। कलम्भ ऋषिः ॥ ३३६ ॥

काकुसिभ्यां कुम्भः ॥ ३३७ ॥

आभ्यां किदुम्भः प्रत्ययो भवति ॥ कैं शब्दे। कुम्भो घटो राशिश्च ॥ कुसच् श्लेषणे। कुसुम्भो महारजनम् ॥ ३३७ ॥

अर्त्तीरिस्तुसुहुसृघृधृशृक्षियक्षिभावाव्याधापाया-वल्पिदिनीभ्यो मः ॥ ३३८ ॥

एभ्यो मः प्रत्ययो भवति ॥ ऋंक् गतौ। अर्मोक्षिरोगो ग्रामः स्थलं च ॥ ईरिक् गतिकम्पनयोः। ईर्मं व्रणः ॥ ष्टुंग्क् स्तुतौ। स्तोमः समूहो यज्ञः स्तोत्रं च ॥ षुंग्ट् अभिषवे। सोमश्चन्द्रो वल्ली च ॥ हुंक् दानादनयोः। होम आहुतिः ॥ सृं गतौ। सर्मो नदः कालश्च। सर्मं स्नानं सुखं च ॥ घृं सेचने। घर्मो ग्रीष्मः ॥ धृंङ्त् स्थाने। धर्म उत्तमक्षमादिर्न्यायश्च ॥ शृृश् हिंसायाम्। शर्म सुखम् ॥ क्षित् निवासगत्योः। क्षेमं कल्याणम् ॥ यक्षिग् पूजायाम्। यक्ष्मो व्याधिः ॥ भांक् दीप्तौ। भामः क्रोधः। भामा स्त्री ॥ वांक् गतिगन्धनयोः। वामः प्रतिकूलः सव्यश्च ॥ व्येंग् संवरणे। व्यामो वक्षो भुजायतिः ॥ डुधांग्क् धारणे च। धामं निलयस्तेजश्च ॥ पां पाने। पामा कच्छूः ॥ यांक् प्रापणे। यामः प्रहरः ॥ वलि संवरणे। वल्मो ग्रन्थिः ॥ पदिंच् गतौ। पद्मं कमलम् ॥ णींग् प्रापणे। नेमोर्धः समीपश्च ॥ ३३८ ॥

ग्रसिहाग्भ्यां ग्राजिह्मौ च ॥ ३३९ ॥

आभ्यां मः प्रत्ययो [भव]त्यनयोश्च ग्राजिह्मावित्यादेशौ यथासंख्यं भवतः ॥ ग्रामः समूहादिः ॥ जिह्मः कुटिलः ॥ ३३९ ॥

विलिभिलिसिधीन्धिधूसूश्याभ्यारुसिविशुषिमुषीषिसुहियु-धिदसिभ्यः कित् ॥ ३४० ॥

एभ्यः किन्मः प्रत्ययो भवति ॥ विलत् वरणे। विल्मं प्रकाशम् ॥ भिलिः सौत्रः। भिल्मं भास्वरम् ॥ षिधू गत्याम्। सिध्मं त्वग्रोगः ॥ ञिइन्धैपि दीप्तौ। इध्ममिन्धनम् ॥ धूग्श् कम्पने। धूमोग्निकेतुः ॥ षूङौच् प्राणिप्रसवे। सूमः कालः श्वयथू रविश्च। सूममन्तरीक्षम् ॥ श्यैंङ् गतौ। श्यामो वर्णः। श्यामं

नभः। श्यामा रात्रिरोषधिश्च ॥ ध्यैं चिन्तायाम्। ध्यामोऽव्यक्तवर्णः ॥ रुक् शब्दे। रुमा लवणभूमिः ॥ षिवूच् उतौ। स्यूमो रश्मिर्दीर्घः सूत्रतन्तुश्च। स्यूमं जलम् ॥ शुषंच् शोषणे। शुष्मं वलं जलं संयोगश्च ॥ मुषश् स्तेये। मुष्मो मूषिकः ॥ ईष उञ्छे। ईष्मो वसन्तो बाणो वातश्च ॥ पुहच् शक्तौ। सुह्मा जनपदः। सुह्मो राजा ॥ युधिंच् संप्रहारे। युध्मः शरत्कालः शूरः शत्रुः संग्रामश्च ॥ दसूच् उपक्षये। दस्मो हीनो वह्निर्यज्ञश्च ॥ ३४० ॥

क्षुहिभ्यां वा ॥ ३४१ ॥

आभ्यां मः प्रत्ययो [भवति] स च किद्वा भवति ॥ टुक्षुक् शब्दे। क्षुमातसी। क्षौमं वस्त्रम् ॥ हिंट् गतिवृद्ध्योः। हिमं तुषारः। हेमं सुवर्णम् ॥ ३४१ ॥

अवेर्हृस्वश्च वा ॥ ३४२ ॥

अव रक्षणादौ। इत्यस्मात्किन्मः प्रत्ययो [भव] त्यूटो हृस्वश्च वा भवति ॥ उमा गौर्यतसी कीर्तिश्च ॥ ऊममूनमाकाशं नगरं च ॥ ३४२ ॥

सेरी च वा ॥ ३४३ ॥

षिंग्ट् बन्धने। इत्यस्मात्किन्मः प्रत्ययो [भवति] ईकारश्चान्तादेशो वा भवति ॥ सीमो ग्रामगोचरभूमिः क्षेत्रमर्यादा हयश्च। सिमः स एव सर्वार्थश्च ॥ ३४३ ॥

भियः षोन्तश्च वा ॥ ३४४ ॥

ञिभींक् भये। इत्यस्मात्किन्मः प्रत्ययो [भवति] षश्चान्तादेशो वा भवति ॥ बिभेत्यस्मादिति भीष्मो भयानकः। भीमः स एव ॥ ३४४ ॥

तिजियुजेर्ग् च ॥ ३४५ ॥

आभ्यां किन्मः प्रत्ययो [भवति] गश्चान्तादेशो भवति ॥ तिजि क्षमानिशानयोः। तिग्मं तीक्ष्णं दीप्तं तेजश्च ॥ युजूंपी योगे। युग्मं युगलम् ॥ ३४५ ॥

रुक्मग्रीष्मकूर्मसूर्मजाल्मगुल्मग्रोष्मपरिस्तोमसूक्ष्मादयः ॥ ३४६ ॥

एते किन्मप्रत्ययान्ता निपात्यन्ते ॥ रोचतेः क् च। रुक्मं सुवर्णं रूप्यं च ॥ ग्रसेर्ग्रीप् च। ग्रीष्म ऋतुः ॥ कुरुतेर्दीर्घश्च। कूर्मः कच्छपः ॥ पूत् प्रेरणे। इत्यस्य रोन्तश्च। सूर्मी लोहप्रतिमा चुल्लिश्च ॥ जल घात्ये। दीर्घश्च। जाल्मो निकृष्टः ॥ गुपच् व्याकुलत्वे। लश्च। गुल्मो व्याधिस्तरुसमूहो वनस्पतिः सेनाङ्गं च।

गुल्ममायस्थानम् ॥ जिघ्रतेरोत्वं च। घ्रोमो यज्ञाङ्गलक्षणः सोमः ॥ परिपूर्वात् स्तौतेः षत्वाभावो गुणश्च। परिस्तोमो यज्ञविशेषः ॥ सूचण् पैशून्ये। कत्वं षोन्तश्च। सूक्ष्मो निपुणः। सूक्ष्ममणु ॥ आदिग्रहणात् क्ष्मादयो भवन्ति ॥ ३४६ ॥

सृपृप्रथिचरिकडिकर्देरमः ॥ ३४७ ॥

एभ्योमः प्रत्ययो भवति ॥ सृं गतौ। सरमा देवशुनी ॥ पृश् पालनपूरणयोः। परम उत्कृष्टः ॥ प्रथिष् प्रख्याने। प्रथम आद्यः ॥ चर भक्षणे। चरमः पश्चिमः ॥ कडत् मदे। कडमः शालिः। ऋफिडादित्वाल्लत्वे। कलमः स एव ॥ कर्द कुत्सिते शब्दे। कर्दमः पङ्कः ॥ ३४७ ॥

अवेर्ध् च वा ॥ ३४८ ॥

अव रक्षणादौ। इत्यस्मादमः प्रत्ययो[भवति] धश्चान्तादेशो वा भवति। अधमोवमश्च हीनः ॥ ३४८ ॥

कुट्टिवेष्टिपूरिपिषिसिचिगण्यर्पिवृमहिभ्य इमः ॥ ३४९ ॥

एभ्य इमः प्रत्ययो भवति ॥ कुट्टण् कुत्सने च। कुट्टिमं संस्कृतभूमितलम् ॥ वेष्टि वेष्टने। वेष्टिमं पुष्पबन्धविशेषो भक्ष्यविशेषश्च ॥ पूरैचि आप्यायने। पूरिमं मालाबन्धविशेषो भक्ष्यविशेषश्च ॥ पिष्लृंप् संचूर्णने। पेषिमं भक्ष्यविशेषः ॥ षिचींत् क्षरणे। सेचिमं मालाविशेषः ॥ गणण् संख्याने। गणिमं गणितम् ॥ ऋंक् गतौ। णौ पौ। अर्पिमं बालवत्साया दुग्धम् ॥ वृग्ट् वरणे। वरिमं तुलोन्मेयम् ॥ मह पूजायाम्। महिमं पूजनीयम् ॥ ३४९ ॥

वयिमखचिमादयः ॥ ३५० ॥

वयिमादयः शब्दा इमप्रत्ययान्ता निपात्यन्ते ॥ वेंग् तन्तुसंताने। वयादेशश्च। वयिमं माल्यं कन्दुकस्तन्तुवायदण्डश्च ॥ खनूग् अवदारणे। चश्च। खचिमं मणिलोहविद्धं घृतविहीनं च ॥ आदिशब्दादन्येपि ॥ ३५० ॥

उद्वटिकुल्यलिकुथिकुरिकुटिकुडिकुसिभ्यः कुमः ॥ ३५१ ॥

उत्पूर्वात् वटेः कुल्यादिभ्यश्च किदुमः प्रत्ययो भवति ॥ वट वेष्टने। उद्वटुमः परिक्षेपः ॥ कुल बन्धुसंस्त्यानयोः ॥ कुलुम उत्सवः ॥ अली भूषणादौ। अलुमः प्रसाधनं नापितोग्निश्च ॥ कुथच् पूतिभावे। कुथुम ऋषिः। कुथुमं मृगाजिनम् ॥ कुरत् शब्दे। कुरुमः कारुर्भाजनं च ॥ कुटत् कौटिल्ये। कुटुमः प्रेष्यः ॥ कुडत् बाल्ये च। कुडुमा भूमिः ॥ कुसच् श्लेषे। कुसुमं पुष्पम् ॥ ३५१ ॥

कुन्दुमलिन्दुमकुङ्कुमविद्रुमपट्टुमादयः ॥ ३५२ ॥

एते कुमप्रत्ययान्ता निपात्यन्ते ॥ कुकि आदाने । स्वरान्नो दश्च । कुन्दुमो निचयो गन्धद्रव्यं च ॥ लींङ्च् श्लेषणे । लिन्दभावश्च । लिन्दुमो गन्धद्रव्यम् ॥ कुकेः स्वरान्नोन्तश्च । कुङ्कुमं घुसृणम् ॥ विदॢंती लाभे । रोन्तश्च । विद्रुमः प्रवालः ॥ पटेटोन्तश्च । पट्टुमं नगरम् ॥ आदेरन्येपि ॥ ३५२ ॥

कुथिगुधेरूमः ॥ ३५३ ॥

आभ्यामूमः प्रत्ययो भवति ॥ कुथच् पूतिभावे । कोथूमश्चरणकृदृषिः ॥ गुधच् परिवेष्टने । गोधूमो धान्यविशेषः ॥ ३५३ ॥

विहाविशापचिभिद्यादेः केलिमः ॥ ३५४ ॥

विपूर्वाभ्याम् ओहांक् त्यागे । शोंच् तक्षणे । इत्येताभ्यां पच्यादिभ्यश्च किदेलिमः प्रत्ययो भवति ॥ विहीयते त्यज्यतेशुचि शरीरमस्मिन्निति विहेलिमः स्वर्गः ॥ विश्यति तनूभवति मासि मासि कलाभिर्हीयमान इति विशेलिमश्चन्द्रः स्वर्गश्च ॥ डुपचींष् पाके । पचत्यसावन्नमिति पचेलिमोग्निरादित्योश्वश्च ॥ भिदृंपी विदारणे । भिदेलिमस्तस्करः ॥ आदिशब्दात् दृशूं प्रेक्षणे । दृशेलिमम् ॥ अदं प्सांक् भक्षणे । अदेलिमम् ॥ हनंक् हिंसागत्योः । घ्नेलिमम् ॥ डुयाचृग् याञ्चायाम् । याचेलिमम् ॥ पांक् रक्षणे । पेलिमम् ॥ डुकृंग् करणे । क्रेलिमम् ॥ इत्यादयोपि भवन्ति ॥ ३५४ ॥

दो डिमः ॥ ३५५ ॥

दाम् दाने । इत्यस्माड्डिमः प्रत्ययो भवति ॥ दाडिमो दाडिमी वा वृक्षजातिः ॥ ३५५ ॥

डिमेः कित् ॥ ३५६ ॥

डिमिः सौत्रः । तस्मात्किड्डिमः प्रत्ययो भवति ॥ डिण्डिमो वाद्यविशेषः ॥ ३५६ ॥

स्थाछामासासूमन्यनिकनिपसिपलिकलिशलिशकीर्ष्यसहिबन्धिभ्यो यः ॥ ३५७ ॥

एभ्यो यः प्रत्ययो भवति ॥ ष्ठां गतिनिवृत्तौ । स्थायः स्थानम् । स्थाया भूमिः ॥ दों छोंच् छेदने । छाया तमः प्रतिरूपं कान्तिश्च ॥ मांक् माने । माया छद्म दिव्यानुभावदर्शनं च ॥ षोंच् अन्तकर्मणि । सायं दिनावसानम् । षूत् प्रेरणे ।

सव्यो वामो दक्षिणश्च ॥ मनिंच् ज्ञाने । मन्या धमनिः ॥ अनक् प्राणने । अन्यः परः ॥ कनै दीप्त्यादिषु । कन्या कुमारी ॥ षसक् स्वप्ने । सस्यं क्षेत्रस्थं गोधूमादि ॥ पल गतौ । पल्यं कटकुसूलः ॥ कलि शब्दसंख्यानयोः । कल्यो नीरोगः ॥ पल फल शल गतौ । शल्यमन्तर्गतं लोहादि ॥ शक्लृट् शक्तौ । शक्यमसारम् ॥ ईर्ष्य ईर्ष्यार्थः । ईर्ष्यति ईर्ष्यणं वा । ईर्ष्या मात्सर्यम् ॥ षहि मर्षणे । सह्यः पश्चादर्णवपार्श्वशैलः ॥ बन्धंश् बन्धने । बन्ध्याप्रसूतिः ॥ ३५७ ॥

नञो हलिपत्तेः ॥ ३५८ ॥

नञ्पूर्वाभ्यामाभ्यां यः प्रत्ययो भवति ॥ हल विलेखने । अहल्या गौतमपत्नी ॥ पत्लृ गतौ । अपत्यं पुत्रसंतानः ॥ ३५८ ॥

सञ्जेर्ध् च ॥ ३५९ ॥

षञ्जं सङ्गे । इत्यस्माद्यः प्रत्ययो भवति धश्चान्तादेशो भवति ॥ संध्या दिननिशान्तरम् ॥ ३५९ ॥

मृशीपसिवस्यनिभ्यस्तादिः ॥ ३६० ॥

एभ्यस्तकारादिर्यः प्रत्ययो भवति ॥ मृंत् प्राणत्यागे । मर्त्यो मनुष्यः ॥ शीङ्क् स्वप्ने । शेत्यः शकुनिः संवत्सरोजगरश्च ॥ पसिर्निवासे सौत्रः । दन्त्यान्तः । पस्त्यं गृहम् ॥ वसं निवासे । वस्त्यो गुरुः ॥ अनक् प्राणने । अन्त्यो निरवसितश्चण्डालादिश्च ॥ ३६० ॥

ऋशिजनिपुणिकृतिभ्यः कित् ॥ ३६१ ॥

एभ्यः किद्यः प्रत्ययो भवति ॥ ऋश गतौ स्तुतौ वा । स्वरादिस्तालव्यान्तः। ऋश्यो मृगजातिः ॥ जनैचि प्रादुर्भावे । जन्यं संग्रामः । जाया पत्नी । ये न वेत्यात्वम् ॥ पुणत् शुभे । पुण्यं सत्कर्म ॥ कृतैत् छेदने । कृन्तति । कृत्या दुर्गा ॥ ३६१ ॥

कुलेर्ड् च वा ॥ ३६२ ॥

कुल बन्धुसंस्त्यानयोः । इत्यस्मात्किद्यः प्रत्ययो [भवति] डकारश्चान्तो वा भवति ॥ कुड्यं भित्तिः ॥ कुल्या सारणी ॥ ३६२ ॥

अगपुलाभ्यां स्तम्भेर्डित् ॥ ३६३ ॥

अग पुल इत्येताभ्यां परस्मात् स्तम्भेः सौत्राड्डिद्यः प्रत्ययो भवति ॥ अगस्त्यः पुलस्त्यश्चर्षिः ॥ ३६३ ॥

शिक्यास्याढ्यमध्यविन्ध्यधिष्ण्याघ्न्यहर्म्यसत्यनित्यादयः ॥ ३६४ ॥

एते यप्रत्ययान्ता निपात्यन्ते ॥ शोंच् तक्षणे । इकश्चान्तः । शिक्यं लम्बमानः पिटर्याद्याधारः परिव्राड्भिक्षाभाजनस्थानमसारं च ॥ असूच् क्षेपणे । दीर्घत्वं च । आस्यं मुखम् ॥ आङ्पूर्वात् ढौकतेर्डिच्च । आढ्यो धनवान् ॥ मव बन्धने । ध् च । मध्यं गर्भः ॥ विधत् विधाने । स्वरान्नोन्तश्च । विन्ध्यः पर्वतः ॥ ञिधृषाट् प्रागल्भ्ये । नोन्तो धिष् च । धिष्ण्यं भवनमासनं च । धिष्ण्योल्का ॥ नञ्पूर्वात् हन्तेरुपान्त्यलोपश्च । अघ्न्यो धर्मो गोपतिश्च । अघ्न्या गौः ॥ हरतेर्मोन्तश्च । हर्म्यं सौधम् ॥ अस्तेः सत् च । सत्यममृषा ॥ निपूर्वात् यमेस्तोन्तो धातुलुक् च । नित्यं ध्रुवम् ॥ आदिग्रहणात् लह्यङ्गुह्यादयो भवन्ति ॥ ३६४ ॥

कुगुवलिमलिकणितन्याम्यक्षेरयः ॥ ३६५ ॥

एभ्योयः प्रत्ययो भवति ॥ कुंङ् शब्दे । कवय ऋषिः पुरोडाशश्च ॥ गुंङ् शब्दे । गवयो गवाकृतिपशुविशेषः ॥ वलि संवरणे । वलयः कटकः ॥ मलि धारणे । मलयः पर्वतः ॥ कण शब्दे । कणय आयुधविशेषः ॥ तनूयी विस्तारे । तनयः पुत्रः ॥ अमण् रोगे । णिचि च । आमयो व्याधिः॥ अक्षौ व्याप्तौ च ।अक्षयो विष्णुः ॥ ३६५ ॥

चायेः केक् च ॥ ३६६ ॥

चायृग् पूजानिशामनयोः । इत्यस्मादयः प्रत्ययो[भव]त्यस्य च केक् इत्यादेशो भवति ॥ केकयः क्षत्रियः ॥ ३६६ ॥

लादिभ्यः कित् ॥ ३६७ ॥

लादिभ्यः किदयः प्रत्ययो भवति ॥ लांक् आदाने । लयः ॥ पां पाने । पयः ॥ ष्णांक् शौचे । स्नयः ॥ देंङ् पालने । दयः ॥ ट्धें पाने । धयः ॥ मेंङ् प्रतिदाने । मयः ॥ कैं शब्दे । कयः । खैं खदने । खयः ॥ श्रांक् पाके । श्रयः ॥ क्षें जैं सैं क्षये । क्षयः । जयः । सयः ॥ त्रैंङ् पालने । त्रयः ॥ ओवैं शोषणे । वयः ॥ इत्यादि ॥ ३६७ ॥

कसेरलादिरिच्चास्य ॥ ३६८ ॥

कस गतौ । इत्यस्मादलादिरयः प्रत्ययो [भव] त्यकारस्य च इकारो भवति ॥ किसलयं प्रवालम् ॥ ३६८ ॥

वृङः शषौ चान्तौ ॥ ३६९ ॥

वृङ्श् संभक्तौ । इत्यस्मात्किदयः प्रत्ययो[भवति]शकारषकारौ चान्तौ भवतः ॥ वृशयं देशनामाकाशमासनं शयनं च ॥ वृषय आशयः ॥३६९॥

गयहृदयादयः ॥ ३७० ॥

गयादयः शब्दाः किदयप्रत्ययान्ता निपात्यन्ते ॥ गमेर्डिच्च । गयः प्राणः । गया तीर्थम् ॥ हरतेर्दोन्तश्च । हृदयं मनः स्तनमध्यं च ॥ आदिशब्दात् गणेरेयः । गणेयं गणनीयम् ॥ इत्यादि ॥ ३७० ॥

मुचेर्घयघुयौ ॥ ३७१ ॥

मुच्लृंती मोक्षणे । इत्यस्मात् घितावय उय इत्येतौ प्रत्ययौ कितौ भवतः ॥ मुकयो मुकुयश्चाश्वतरादश्वायां जातः ॥ घित्करणं कत्वार्थम् ॥ ३७१ ॥

कुलिलुलिकलिकषिभ्यः कायः ॥ ३७२ ॥

एभ्यः किदायः प्रत्ययो भवति ॥ कुल बन्धुसंस्त्यानयोः । कुलायो नीडम् ॥ लुलिः सौत्रः । लुलायो महिषः ॥ कलि शब्दसंख्यानयोः । कलायस्त्रिपुटः ॥ कष हिंसायाम् । कषायः कल्कादिः ॥ ३७२ ॥

श्रुदक्षिगृहिस्पृहिमहेराय्यः ॥ ३७३ ॥

एभ्य आय्यः प्रत्ययो भवति ॥ श्रुंट् श्रवणे । श्रवाय्यो यज्ञपशुर्ग्रहणसमर्थश्च श्रोता ॥ दक्षि हिंसागत्योः । दक्षाय्योग्निर्गृध्रो वैनतेयो दक्षतमश्च ॥ गृहणि ग्रहणे । गृहयाय्यो वैनतेयो गृहकर्मकुशलः[च] ॥ स्पृहण् ईप्सायाम् । स्पृहयाय्यः स्पृहयालुर्वृतं च । स्पृहयाय्यानि तृणान्यहानि च ॥ महण् पूजायाम् । महयाय्योश्वमेधः ॥ ३७३ ॥

दधिषाय्यदीधीषाय्यौ ॥ ३७४ ॥

एतावाय्यप्रत्ययान्तौ निपात्येते ॥ दधिपूर्वात् स्यतेः षत्वं च । दधिषाय्यं पृषदाज्यं मृषावादी च ॥ दीव्यतेर्दीधीष् च । दीधीषाय्यं तदेव ॥ ३७४ ॥

कौतेरियः ॥ ३७५ ॥

कुंक् शब्दे । इत्यस्मादियः प्रत्ययो भवति ॥ कवियं खलीनम् ॥३७५॥

कृगः कित् ॥ ३७६ ॥

डुकृंग् करणे । इत्यस्मात्किदियः प्रत्ययो भवति ॥ क्रियो मेषः ॥ ३७६ ॥

मृजेर्णालीयः ॥ ३७७ ॥

मृजौक् शुद्धौ । इत्यस्माण्णिदालीयः प्रत्ययो भवति ॥ मार्जालीयं पापशोधनम् । मार्जालीयोग्निः ॥ मृजोस्य वृद्धिरिति वृद्धिः । णकार उत्तरार्थः ॥ ३७७ ॥

वेतेस्तादिः ॥ ३७८ ॥

वींक् प्रजननादौ । इत्यस्मात्तकारादिर्णिदालीयः प्रत्ययो भवति ॥ वैतालीयं छन्दोजातिः ॥ ३७८ ॥

धाग्राजिशॄरमियाज्यर्तेरन्यः ॥ ३७९ ॥

एभ्योन्यः प्रत्ययो भवति ॥ डुधांग्क् धारणे च । धान्यं सस्यजातिः ॥ राजृग् दीप्तौ । राजन्यो ज्योतिरग्निः क्षत्रियश्च ॥ शॄश् हिंसायाम् । शरण्यस्त्राता ॥ रमिं क्रीडायाम् । रमण्यं शोभनम् ॥ यजीं देवपूजादौ । णौ । याजन्यः क्षत्रियो यज्ञश्च ॥ ऋंक् गतौ । अरण्यं वनम् ॥ ३७९ ॥

हिरण्यपर्जन्यादयः ॥ ३८० ॥

हिरण्यादयः शब्दा अन्यप्रत्ययान्ता निपात्यन्ते ॥ हरतेरिच्चातः । हिरण्यं सुवर्णादिद्रव्यम् ॥ परिपूर्वस्य पृषू सेचने । इत्यस्योपसर्गान्तलोपो धातोश्च जः समस्तादेशः । गर्जतेर्वा गकारस्य पकारः । पर्जन्य इन्द्रो मेघः शक्रः पुण्यं कुशलं च कर्म ॥ आदिशब्दादन्येपि ॥ ३८० ॥

वदिसहिभ्यामान्यः ॥ ३८१ ॥

आभ्यामान्यः प्रत्ययो भवति ॥ वद व्यक्तायां वाचि । वदान्यो दाता गुणवांश्चारुभाषी च ॥ षहि मर्षणे । सहान्यः शैलः ॥ ३८१ ॥

वृङ एण्यः ॥ ३८२ ॥

वृङ्श् संभक्तौ । इत्यस्मादेण्यः प्रत्ययो भवति ॥ वरेण्यः परं ब्रह्म धाम श्रेष्ठः प्रजापतिरन्नं च ॥ ३८२ ॥

मदेः स्यः ॥ ३८३ ॥

मदैच् हर्षे । इत्यस्मात्स्यः प्रत्ययो भवति ॥ मत्स्यो मीनो धूर्तश्च॥३८३॥

रुचिभुजिभ्यां किष्यः ॥ ३८४ ॥

आभ्यां किदिष्यः प्रत्ययो भवति ॥ रुचि अभिप्रीत्यां च । रुचिष्यो वल्लभः सुवर्णं च ॥ भुजंप् पालनाभ्यवहारयोः । भुजिष्य आचार्यो भोक्तान्नं मृष्टोदनो दासश्च । भुजिष्यं धनम् ॥ ३८४ ॥

वच्यर्थिभ्यामुष्यः ॥ ३८५ ॥

आभ्यामुष्यः प्रत्ययो भवति ॥ वचंक् भाषणे । वचुष्यो वक्ता ॥ अर्थणि उपयाचने । अर्थुष्योर्थी ॥ ३८५ ॥

वचोथ्य उत् च ॥ ३८६ ॥

वचंक् भाषणे । इत्यस्मादथ्यः प्रत्ययो[भव]त्यस्य च उत् इत्यादेशो भवति ॥ उतथ्य ऋषिः ॥ ३८६ ॥

भीवृधिरुधिवज्यगिरमिवमिवपिजपिशाकिस्फायिवन्दीन्दिपदिमदिमन्दिचन्दिदसिघसिनसिहस्यसिवाशिदहिसहिभ्यो रः ॥ ३८७ ॥

एभ्यो रः प्रत्ययो भवति ॥ ञिभींक् भये । भेरो भेदः करभः शरो मण्डूको दुन्दुभिः कातरश्च । ऋफिडादित्वाल्लत्वे । भेलश्चिकित्साग्रन्थकारः शरो मण्डूकः प्रहीणोप्राज्ञश्च ॥ वृधूङ् वृद्धौ । वर्ध्रश्चर्मविकारश्चन्द्रो मेघश्च ॥ रुधूंपी आवरणे । रोध्रो वृक्षविशेषः ॥ वज गतौ । वज्रं कुलिशं रत्नविशेषश्च ॥ अग कुटिलायां गतौ । अग्रः प्राग्भागः श्रेष्ठश्च ॥ रमिं क्रीडायाम् । रम्रः कामुकः ॥ टुवमू उद्गिरणे । वम्रो धर्मविशेषो धूमश्च । वम्र्युपदेहिका ॥ डुवपीं बीजसंताने । वप्रः केदारः प्राकारो वास्तुभूमिश्च ॥ जप मानसे च । जप्रो ब्राह्मणो मण्डूकश्च ॥ शक्लृंट् शक्तौ । शक्र इन्द्रः ॥ स्फायैङ् वृद्धौ । स्फारमुल्वणं प्रभूतं च ॥ वदुङ् स्तुत्यभिवादनयोः । वन्द्रो बन्दी केतुः कामश्च । वन्द्रं समूहः ॥ इदु परमैश्वर्ये । इन्द्रः शक्रः ॥ पदिंच् गतौ । पद्रं ग्रामादिनिवेशः शून्यं च ॥ मदैच् हर्षे । मद्रा जनपदः क्षत्रियश्च । मद्रं सुखम् ॥ मदुङ् स्तुत्यादिषु । मन्द्रो मधुरस्वरः । मन्द्रं गम्भीरम् ॥ चदु दीप्त्याह्लादयोः । चन्द्रः शशी सुवर्णं च ॥ दसूच् उपक्षये । दस्रः शिशिरं चन्द्रमा अश्विनोर्ज्येष्ठश्च । दस्रावश्विनौ ॥ घस्लृं अदने । घस्रो दिवसः ॥ णसि कौटिल्ये । नस्रो नासिकापुट ऋषिश्च ॥ हसे हसने । हस्रो दिनं घातको दुर्बलश्च । हस्रं बलाधानं संनिपातश्च । सहस्रं दश शतानि ॥ असूच् क्षेपणे । अस्रमश्रु ॥ वाशिच् शब्दे । वाश्रः पुरुषः शब्दः संघातः शरभो रासभः पक्षी च । वाश्रा धेनुः ॥ दहं भस्मीकरणे । दह्रोग्निः शिशुः सूर्यश्च ॥ षहि मर्षणे । सह्रः शैलः ॥ ३८७ ॥

ऋज्यजितञ्चिवञ्चिरिपिसृपितृपिदृपिचुपिक्षिपिक्षुपिक्षुदिमुदिरुदिछिदिभिदिखिद्युन्दिदम्भिशुभ्युम्भिदंशिचिसिवहिविसिवसिशुचिसिधिगृधिवीन्धिश्विितिवृतिनीशीसुसूभ्यः कित् ॥३८८॥

एभ्यः किद्रः प्रत्ययो भवति ॥ ऋजि गतिस्थानार्जनोर्जनेषु । ऋज्रो नाय-

क इन्द्रोर्थश्च ॥ अज क्षेपणे च । अज्रो वीरो विक्रान्तः ॥ तञ्चू वञ्चू गतौ । तक्रमुदश्वित् । वक्रः कुटिलोङ्गारको विष्णुश्च । उभयत्र न्यङ्क्वादित्वात्कत्वम् ॥ रिपिः सौत्रः । रिप्रं कुत्सितम् ॥ सृपॢं गतौ । सृप्रश्चन्द्रः । सृप्रं मधु । सृप्रा नाम नदी ॥ तृपौच् प्रीतौ । तृप्रं मेघान्तघर्म आज्यं काष्ठं पापं दुःखं च ॥ दृपौच् हर्षमोहनयोः। दृप्रं वलं दुःखं च । दृप्रा बुद्धिः ॥ चुप मन्दायां गतौ । चुप्रो वायुः ॥ क्षिपींत् प्रेरणे । क्षिप्रं शीघ्रम् ॥ क्षुपिः सादने सौत्रः । क्षुप्रं तुहिनं कण्टकिगुल्मश्च ॥ क्षुदृंपी संपेषे । क्षुद्रमणु जलगर्तश्च । क्षुद्रा मधुकर्यः । क्षुद्रो हिंस्रः ॥ मुदि हर्षे । मुद्रा चिह्नकरणम् ॥ रुदृक् अश्रुविमोचने । रुद्रः शम्भुः ॥ छिदृंपी द्वैधीकरणे । छिद्रं विवरम् ॥ भिदृंपी विदारणे । भिद्रमदृढम् । भिद्रः शरः ॥ खिदंत् परिघाते । खिद्रं विघ्नः । खिद्रो विषाणो विपादश्चन्द्रो दीनश्च ॥ उन्दैप् क्लेदने । उद्र ऋषिर्मत्स्यश्च । सम्पूर्वात् समुन्दन्ति । आर्द्रीभवन्ति वेलाकाले नद्योस्मादिति समुद्रः सागरः । भीमादित्वादपादाने ॥ दम्भूट् दम्भे । दभ्रोल्पश्चन्द्रः कुशः कुशलः सूर्यश्च ॥ शुभि दीप्तौ । शुभ्रोवदातः ॥ उम्भत् पूरणे । उभ्रो मेघः पेलवश्च ॥ दंशं दशने । दभ्रो दन्तः सर्पश्च ॥ चिंगट् चयने । चिरमशीघ्रम् ॥ षिंगट् बन्धने । सिरा रुधिरस्रोतोवाहिनी नाडी ॥ वहीं प्रापणे । उह्रोनड्वान् ॥ विसच् प्रेरणे । विस्रमामगन्धिकम् ॥ वसं निवासे । उस्रो रश्मिः । बाहुलकात् षत्वं न भवति । उस्रा गौः ॥ शुच शोके । शुक्रो ग्रहो मासः शुक्लश्च । शुक्रं रेतः । लत्वे । शुक्लो वर्णः । कत्वं न्यङ्क्वादित्वात् ॥ षिधू गत्याम् । सिध्रः साधुर्वृक्षो मांसप्रभेदश्च ॥ गृधूच् अभिकाङ्क्षायाम् । गृध्रः श्येनो लुब्धकः कङ्कश्च ॥ ञिइन्धैपि दीप्तौ । विपूर्वात् ॥ वीध्रोग्निर्वायुर्नभो निर्मलः पूर्णचन्द्रमण्डलं च ॥ श्विताङ् वर्णे । श्वित्रं श्वेतकुष्ठम् । वृतुङ् वर्तने । वृत्रो दानवो वलवान्रिपुश्च । वृत्रं पापम् ॥ णींग् प्रापणे । नीरं जलम् ॥ शीङ्क् स्वप्ने । शीरोजगरः ॥ षुंग्ट् अभिषवे । सुरो देवः । सुरा मद्यम् ॥ षूङौच् प्राणिप्रसवे । सूर आदित्यो रश्मिश्च ॥ ३८८ ॥

इण्धाग्भ्यां वा ॥ ३८९ ॥

आभ्यां रः प्रत्ययो भवति स च किद्वा भवति ॥ इणक् गतौ । इरा मदनीयपानविशेषो मेदिनी च ॥ एरैडका ॥ डुधांग्क् धारणे च । धीरः सत्त्ववान्धृतिमांश्च ॥ धारा जलयष्टिः खड्गावयवोश्वगतिविशेषश्च ॥ ३८९ ॥

चुम्बिकुम्बितुम्बेर्नलुक् च ॥ ३९० ॥

एभ्यः किद्रः प्रत्ययो भवति नकारस्य चैषां लुग्भवति ॥ चुबु वक्त्रसंयोगे। चुब्रं वक्त्रम्। चुब्रो रश्मिः ॥ कुबु आच्छादने। कुब्रं संकटं भग्नपृष्ठः फल्गुहस्ती चर्म गृहाच्छादनं च ॥ तुबु अर्दने। तुब्रं कुटिलम् ॥ ३९० ॥

भन्देर्वा ॥ ३९१ ॥

भदुङ् सुखकल्याणयोः। इत्यस्माद्रः प्रत्ययो [भवति] नकारस्य च लुग्वा भवति ॥ भद्रं भन्द्रं च कल्याणं सुखं च ॥ ३९१ ॥

चिजिशुसिमितम्यम्यर्देर्दीर्घश्च ॥ ३९२ ॥

एभ्यो रः प्रत्ययो [भवति] दीर्घश्चैषां भवति ॥ चिंग्ट् चयने। चीरं जीर्णवस्त्रं वल्कलं च ॥ जिं अभिभवे। जीरोजाज्यमिर्वायुरश्वश्च। जीरमन्नम्। लत्वे। जीलश्चर्मपुटः ॥ शुं गतौ। शूरो विक्रान्तः ॥ षिंग्ट् बन्धने। सीरं हलम्। सीरा हलविलेखिता लेखा ॥ डुमिंग्ट् प्रक्षेपणे। मीरः समुद्रः। मीरं जलम्। मीरा मांसपचनी देवसीमा च ॥ तमूच् काङ्क्षायाम् ॥ ताम्रो वर्णः शुल्वं च ॥ अम गतौ। आम्रो वृक्षः ॥ अर्द गतियाचनयोः। आर्द्रं सरसम् ॥ ३९२ ॥

चकिरमिविकसेरुच्चास्य ॥ ३९३ ॥

चकिरमिभ्यां विपूर्वाच्च कसे रः प्रत्ययो [भव]त्यकारस्य चैषामुकारो भवति ॥ चकि तृप्तिप्रतीघातयोः। चुक्रोम्लो रसो वीजपूरकमिञ्जिकासुरो निमन्त्रणं च ॥ रमिं क्रीडायाम्। रुम्रः सुन्दर आदित्यसारथिर्ब्राह्मणो विनाशश्च ॥ कस गतौ। विकुस्रश्चन्द्रः समुद्रश्च। विकुस्रं पुष्पितम्। बाहुलकाद्विकसेर्विकल्पः। विकस्रः ॥ ३९३ ॥

शदेरूच्च ॥ ३९४ ॥

शद्लृ शातने। इत्यस्माद्रः प्रत्ययो [भव]त्यकारस्य च ऊकारो भवति ॥ शूद्रश्चतुर्थो वर्णः ॥ ३९४ ॥

कृतेः क्रूकृच्छ्रौ च ॥ ३९५ ॥

कृतैत् छेदने। इत्यस्माद्रः प्रत्ययो [भव]त्यस्य च क्रू कृच्छ्र इत्यादेशौ भवतः ॥ क्रूरममृदु। क्रूरः पापकर्मा। कृच्छ्रं दुःखम् ॥ ३९५ ॥

खुरक्षुरदूरगौरविप्रकुप्रश्वभ्राभ्रधूम्रान्ध्ररन्ध्रशिलिन्ध्रौड्रपुण्ड्रतीव्रनीव्रशी-घ्रोग्रतुग्रभुग्रानिद्रातन्द्रासान्द्रगुन्द्रारिञ्जादयः ।। ३९६ ।।

एते रप्रत्ययान्ता निपात्यन्ते ।। खुरत् छेदने । क्षुरत् विलेखने । अनयो रलोपो गुणाभावश्च । खुरः शफः ।। क्षुरो नापितभाण्डम् ।। ननु च खुरक्षुरशब्दौ नाम्युपान्त्यप्रीकृगृज्ञः क इति केन सिध्यतः । सत्यम् । तत्र कर्तैवार्थ इह तु संप्रदानाद्यान्यत्रोणादय इत्यर्थभेदः । असर्वविषयत्वं वानयोर्ज्ञाप्यते । यथा । अदेः परोक्षायां वा घस्लादेशवचनेन घसेः । एवमन्यत्रापि स्वयमभ्यूह्यम् ।। दुर्पूर्वात् इणो लुक् च । दूरं विप्रकृष्टम् ।। गवतेर्वृद्धिश्च । गौरोवदातः ।। विपूर्वात् पातेर्लुक् च । विप्रो ब्राह्मणः । विविधं प्रातीति वा विप्रः ।। गुपच् व्याकुलत्वे । आदेः कत्वं च । कुप्रं गहनं गृहाच्छादनं च ।। ट्वोश्वि गतिवृद्धयोः । अकारो मोन्तश्च । श्वभ्रं विलमाकाशं च ।। आपॢंट् व्याप्तौ । अभादेशश्च । अभ्रं मेघः ।। धूगश् कम्पने । मोन्तश्च । धूम्रो वर्णविशेषः ।। अहुड् गतौ । धश्च । अन्ध्रः क्षत्रजातिः ।। रधेः स्वरान्नोन्तश्च । रन्ध्रं छिद्रम् ।। ञिइन्धैपि दीप्तौ । अस्य च तालव्यादिशिलश्चादिः । शिलिन्ध्रमुद्भिद्विशेषः ।। ओणेर्डश्च । ओड्रः क्षत्रजातिः ।। पुणेः स्वरान्नोन्तो डश्च । पुण्डेर्वा रूपम् । पुण्ड्रः क्षत्रजातिस्तिलकश्च ।। तिजेर्वा दीर्घश्च तीवतेर्वा । तीव्रस्तीक्ष्ण उत्कृष्टश्च ।। नियो वोन्तश्च नीवतेर्वा । नीव्रं गृहच्छदिरुपान्तः ।। श्यैङ ईत्वं यलोपो घश्चान्तः । शीघ्रस्त्वरितः ।। उचेरुपेर्वा गः किच्च । उग्रो रुद्रो रौद्रश्च ।। तुदींत् व्यथने । गः किच्च । तुग्रं शृङ्गम् ।। भुजंप् पालनाभ्यवहारयोः । गः किच्च । भुग्रो रश्मिसमूहः ।। णिदु कुत्सायाम् । किन्नलोपश्च । निद्रा स्वापः ।। तमूच् काङ्क्षायाम् । दोन्तश्च । तन्द्रालस्यम् ।। षद्लृ विशरणगत्यवसादनेषु । अस्य स्वरान्नोन्तो वृद्धिश्च । सान्द्रं घनम् ।। गुदेः स्वरान्नोन्तश्च । गुन्द्रा जलतृणविशेषः ।। राजे रञ्जेर्वा किच्च इच्चोपान्त्यस्य । रिञ्जो नायकः ।। आदिग्रहणादन्येपि ।। ३९६ ।।

ऋच्छिचटिवटिकुटिकठिवठिमठचण्डिशीकृशीभृकदिबदिकन्दिमन्दि-सुन्दिमन्थिमञ्जिपञ्जिपिञ्जिकमिसमिचमिवमिभ्रम्यमिदेवि-वासिकास्यर्तिजीविवर्बिकुशुदोररः ।। ३९७ ।।

एभ्योरः प्रत्ययो भवति ।। ऋछत् इन्द्रियप्रलयमूर्तिभावयोः । ऋच्छरस्त्वरावान् । ऋच्छरा वेश्या कुलटा त्वराङ्गुलिश्च ।। चटण् भेदे । चटरस्तस्करः ।।

वट वेष्टने। वटरो मधुकण्डरा॥ कुटत् कौटिल्ये। कोटरं छिद्रम्। बाहुलकाद्गुणः॥ कठ कृच्छ्रजीवने। कठरो दरिद्रः॥वठ स्थौल्ये। वठरो मूर्खो बृहद्देहश्च॥ मठ मदनिवासयोश्च। मठर ऋषिरज्ञानी गोत्रमलसश्च॥ अड उद्यमे। अडरो वृक्षः॥ शीकृङ् सेचने। शीकरो जललवसेकः॥ शीभृङ् कत्थने। शीभरो हस्तिहस्तमुक्तो जललवसेकः॥ कदिः सौत्रः। कदरो वृक्षविशेषः॥ बद स्थैर्ये। बदरी फलवृक्षः॥ कदुङ् वैक्लव्ये। कन्दरो गिरिगर्तः॥ मदुङ् स्तुत्यादौ। मन्दरः शैलः॥ सुन्दिः सौत्रः शोभायाम्। सुन्दरो मनोज्ञः॥ मन्थश् विलोडने। मन्थरो मन्दः खर्वश्च॥ मञ्जिपञ्जी सौत्रौ। मञ्जर्याम्रादिशिखा। गौरादित्वान्ङीः॥ पञ्जरः शुकाद्यवरोधसद्म॥ पिजुण् हिंसाबलदाननिकेतनेषु। पिञ्जरः पिशङ्गः॥ कमूङ् कान्तौ। कमरो मूर्खः कार्मुकं कोमलश्चौरः कान्तश्च॥ षम वैक्लव्ये। समरः संग्रामः॥ चमू अदने। चमर आरण्यपशुः॥ टुवमू उद्गिरणे। वमरो दुर्मेधाः॥ भ्रमूच् अनवस्थाने। भ्रमरः षट्पदः॥ अम गतौ। अमरः सुरः॥ देवृङ् देवने। देवरः पत्यनुजः॥ वसं निवासे। णौ। वासरो दिवसः कामोऽग्निः प्रावृट् च। अन्ये वाशिच् शब्दे। इत्यस्मादपि तालव्यान्तादिच्छन्ति। वाशरोऽग्निर्मेघो दिवसश्च॥ कासृङ् शब्दकुत्सायाम्। कासरो महिषः॥ ऋक् गतौ। अररः कपाटो बुधो भ्रमणो गृहं हरणं शलाका च॥ जीव प्राणधारणे। जीवरो दीर्घायुः॥ बर्ब गतौ। बर्बरो म्लेच्छजातिः। बर्बरी कुञ्चिताः केशाः॥ कुंक् शब्दे। कबरो वर्णः। कबरी वेणिः॥ शुं गतौ। शबरो म्लेच्छजातिः। शब गतौ। इत्यस्यान्ये॥ टुदुंट् उपतापे। दवरो गुणः॥ ३९७॥

अवेर्ध् च वा॥ ३९८॥

अव रक्षणादौ। इत्यस्मादरः प्रत्ययो [भवति] धकारश्चान्तादेशो वा भवति॥ अधरो हीन उपरिभावस्य प्रतियोगी दन्तच्छदश्च॥ अवरः परप्रतियोगी॥ ३९८॥

मृद्युन्दिपिठिकुरिकुहिभ्यः कित्॥ ३९९॥

एभ्यः किदरः प्रत्ययो भवति॥ मृदश् क्षोदे। मृदरो व्याधिरतिकायः क्षोदश्च॥ उन्दैप् क्लेदने। उदरं जठरं व्याधिश्च॥ पिठ हिंसासंक्लेशयोः। पिठरं भाण्डम्॥ कुरत् शब्दे। कुररो जलपक्षिजातिः॥ कुहणि विस्मापने। कुहरं गम्भीरगर्तः॥ ३९९॥

शाखेरिदेतौ चातः ॥ ४०० ॥

शाखृ व्याप्तौ । इत्यस्मादरः प्रत्ययो [भव] त्याकारस्य च इकार-एकारौ भवतः ॥ शिखरमग्रम् ॥ शेखर आपीडः ॥ ४०० ॥

शपेः फ् च ॥ ४०१ ॥

शपीं आक्रोशे । इत्यस्मादरः प्रत्ययो [भवति] फकारश्चान्तादेशो भवति ॥ शफरः क्षुद्रमत्स्यः ॥ ४०१ ॥

दमेर्णिद्वा दश्च डः ॥ ४०२ ॥

दमूच् उपशमे । इत्यस्मादरः प्रत्ययो [भवति] स च णिद्वा दकारस्य च डकारो भवति ॥ डामरो भयानकः ॥ डमरः स एव ॥ ४०२ ॥

जठरक्रकरमकरशंकरकर्परकूर्परतोमरपामरप्रामरप्राझरसगरनगरतगरोर्दरादरगृदरदृदरकृदरकुकुन्दरगोर्वराम्बरमुखरखरडहरकुञ्जराजगरादयः ॥ ४०३ ॥

एते किदरप्रत्ययान्ता निपात्यन्ते ॥ जनेष्ठ च । जठरं कोष्ठः ॥ क्रमेः क च । क्रकरो गौरतित्तिरः ॥ मङ्केर्नलोपश्च । मकरो ग्राहः ॥ शम्पूर्वात् किरतेर्डिच्च । शंकरो रुद्रः ॥ कृपेरुपान्त्यस्य ऊर् च वा । कर्परं कपालम् । कूर्परं कुफणी ॥ ताम्यतेरत ओच्च । तोमर आयुधम् ॥ पातेर्मोन्तश्च । पामरो ग्रामीणः ॥ प्रपूर्वात् अमतेः । प्रामरो ग्राम्यमन्दजातिः ॥ प्रपूर्वात् अत्तेर्मोन्तश्च । प्राझरो नरपशुः ॥ सहिनश्योर्ग च । सगरो द्वितीयश्चक्रवर्ती ॥ नगरं पुरम् ॥ तङ्केर्नलोपश्च । तगरो वृक्षविशेषः ॥ ऊर्जः परात् दृणातेर्डित् जलुक् च । ऊर्जा बलेन दृणाति बिभेति । ऊर्दरो दुर्बलः ॥ अदु बन्धने । नलुक् च । अदरं वक्षो वृक्षः संग्रामश्चञ्चुसमूहो मातृवाहश्च ॥ शॄश् हिंसायाम् । दॄश् विदारणे । अनयोर्ह्रस्वत्वं दश्चान्तः ॥ शृदरः सर्पः ॥ दृदरं विषं भयं च ॥ डुकृंग् करणे । दोन्तश्च । कृदरो वृक्षः सर्वकर्मप्रवृत्तो दस्युजनः कुसूलश्च ॥ कुपूर्वात् स्कुंदुङ् आप्रवणे । सलोपश्च । कुकुन्दरं श्रोणीकूपकः ॥ गोपूर्वात् वृगो डित् । रश्चादिः । गोर्वरः करीषः ॥ अमेर्बोन्तश्च । अम्बरं वस्त्रमाकाशं च ॥ मुहेः ख च । मुखरो वाचालः ॥ खनेर्डिच्च । खरो रासभः ॥ दहेरादेर्डश्च । डहरं ह्रत्कमलम् ॥ कूज अव्यक्ते शब्दे । ह्रस्वत्वं स्वराञ्ञोन्तश्च ।

कुञ्जरो हस्ती ॥ अजेरगश्चान्तो वीभावाभावश्च । अजगरः शयुः ॥ आदिग्रहणात् कोठराङ्कुरशाङ्गरपाण्डरवानरादयो भवन्ति ॥ ४०३ ॥

मुदिगूरिभ्यां टिद्गजौ चान्तौ ॥ ४०४ ॥

आभ्यां टिदरः प्रत्ययो [भवति] गकारजकारौ च यथासंख्यमन्तौ भवतः ॥ मुदि हर्षे । मुद्गरः प्रहरणविशेषः । मुद्गरी स्त्री ॥ गूरैचि गतौ । गूर्जरः सौराष्ट्रादिः । गूर्जरी स्त्री ॥ ४०४ ॥

अग्यङ्गिमदिमन्दिकडिकसिकासिमृजिकञ्जिकलिमलिकचिभ्य आरः ॥ ४०५ ॥

एभ्य आरः प्रत्ययो भवति ॥ अग कुटिलायां गतौ । अगारं वेश्म ॥ अगु गतौ । अङ्गारो निर्वातज्वालो निर्वाणश्चोल्मुकावयवो भूमिसुतश्च ॥ मदैच् हर्षे । मदारः पानशौण्डो वराहो हस्त्यलसश्च ॥ मदुङ् स्तुत्यादौ । मन्दारो वृक्षविशेषः ॥ कडत् मदे । कडारः पिङ्गलो विषमदशनश्च ॥ कस गतौ । कसारो हिंस्रः ॥ कासृङ् शब्दकुत्सायाम् । कासारः पल्वलम् ॥ मृजौक् शुद्धौ । मार्जारो विडालः ॥ कञ्जिः सौत्रः । कञ्जारः कुसूलजातिर्यूपो व्यञ्जनं च ॥ कलि शब्दसंख्यानयोः । कलारो विषमरूपः ॥ मलि धारणे । मलारोलसः । मलमित्वारातौ दोस्येति [?] वा मलारः ॥ कचि बन्धने । कचारोपनेयतृणबुसपांशुविकारः ॥ ४०५ ॥

त्रः कादिः ॥ ४०६ ॥

तॄ प्लवनतरणयोः । इत्यस्मात्ककारादिरारः प्रत्ययो भवति ॥ तर्कारो वृक्षः ॥ ४०६ ॥

कृगो मादिश्च ॥ ४०७ ॥

करोतेर्मकारादिः ककारादिश्चारः प्रत्ययो भवति ॥ कर्मारो लोहकारः ॥ कर्कारो वृक्षः ॥ ४०७ ॥

तुषिकुठिभ्यां कित् ॥ ४०८ ॥

आभ्यां किदारः प्रत्ययो भवति ॥ तुषंच् तुष्टौ । तुषारो हिमम् ॥ कुठिः सौत्रः । कुठारः परशुः ॥ ४०८ ॥

कमेरत उच्च ॥ ४०९ ॥

कमूङ् कान्तौ । इत्यस्मादारः प्रत्ययो [भवति]त्यकारस्य च उकारो भवति ॥ कुमारो महासेनोभ्रष्टो बालश्च ॥ ४०९ ॥

कनेः कोविदकर्बुदकाञ्चनाश्च ॥ ४१० ॥

कनै दीप्त्यादौ । इत्यस्मादारः प्रत्ययो[भवति]त्यस्य च कोविद कर्बुद काञ्चन इत्यादेशा भवन्ति ॥ कोविदारः । कर्बुदारः । काञ्चनारश्च वृक्षविशेषाः ॥ ४१० ॥

द्वारशृङ्गारभृङ्गारकह्लारकान्तारकेदारखारडादयः ॥ ४११ ॥

एत आरप्रत्ययान्ता निपात्यन्ते ॥ उभत् पूरणे । द्वादेशश्च । द्वारं द्वाः ॥ श्रयतेस्तालव्यादिः शृङ्गश्च । शृङ्गारो रसविशेषो विदग्धता च ॥ भृगो भृङ् च । भृङ्गारो हस्तिमुखाकारगलन्तिका ॥ कलेर्हश्च स्वरात्परः । कह्लारमुत्पलविशेषः ॥ कमेस्तोन्तो दीर्घश्च । कान्तारमरण्यम् ॥ कदेः सौत्रस्यात एच्च । केदारो वप्रः ॥ खनेर्डिच्च । खारी चतुर्द्रोणम् । खारडिति टकारो ङ्यर्थः ॥ आदिग्रहणात् शिशुमारादयोपि भवन्ति ॥ ४११ ॥

मदिमन्दिचन्दिपदिखदिसहिवहिकुसृभ्य इरः ॥ ४१२ ॥

एभ्य इरः प्रत्ययो भवति ॥ मदैच् हर्षे । मदिरा सुरा ॥ मदुङ् स्तुत्यादौ । मन्दिरं वेश्म नगरं च ॥ चदु दीप्त्याह्लादयोः । चन्दिरश्चन्द्रमा हस्ती च । चन्दिरं चन्द्रिकावज्जलं च ॥ पदिच् गतौ । पदिरो मार्गः ॥ खद हिंसायां च । खदिरो वृक्षविशेषः ॥ षहि मर्षणे । सहिरः पर्वतः ॥ वहीं प्रापणे । वहिरो वलीवर्दः ॥ कुंङ् शब्दे । कविरोक्षिकोणः ॥ सृं गतौ । सरिरं जलम् । लत्वे । सलिलम् ॥ ४१२ ॥

शवशशेरिच्चातः ॥ ४१३ ॥

आभ्यामिरः प्रत्ययो[भव]त्यकारस्य च इकारो भवति ॥ शव गतौ । तालव्यादिः । शिविरं सैन्यसंनिवेशः ॥ शश प्लुतिगतौ । शिशिरं शीतलमृतुश्च ॥ ४१३ ॥

श्रन्थेः शिथ् च ॥ ४१४ ॥

श्रथुङ् शैथिल्ये । इत्यस्मादिरः प्रत्ययो[भव]त्यस्य च शिथ् इत्यादेशो भवति ॥ शिथिरं श्लथम् । लत्वे । शिथिलम् ॥ ४१४ ॥

अशेर्णित् ॥ ४१५ ॥

अश्नोतेरश्नातेर्वा णिदिरः प्रत्ययो भवति ॥ आशिरो विष्णुरादित्यश्च। आशिरो बह्वाशी ॥ ४१५ ॥

शुषीषिबन्धिरुधिरुचिमुचिमुहिमिहितिमिमुदिखिदिछिदि-
भिदिस्थाभ्यः कित् ॥ ४१६ ॥

एभ्यः किदिरः प्रत्ययो भवति ॥ शुषंच् शोषणे। शुषिरं छिद्रम् ॥ इषत् इच्छायाम्। इषिरं तृणम्। इषिरोऽग्निराहारः क्षिप्रः सेव्यश्च ॥ बन्धंश् बन्धने। बधिरः श्रुतिविकलः ॥ रुधृंपी आवरणे। रुधिरं द्वितीयो धातुः ॥ रुचि अभिप्रीत्यां च। रुचिरं दयितं दीप्तिमच्च ॥ मुच्लृंती मोक्षणे। मुचिरो धर्मः सूर्यो मेघश्च ॥ मुहौच् वैचित्त्ये। मुहिरः कन्दर्पः सूर्यश्च। मुहिरं तमः ॥ मिहं सेचने। मिहिरो मेघः सूर्यश्च। मिहिरं तोयम् ॥ तिमच् आर्द्रभावे। तिमिरं तमस्तोयं रोगश्च कश्चित् ॥ मुदि हर्षे। मुदिरो मेघः सूर्यश्च ॥ खिदंत् परिघाते। खिदिरस्त्रासस्तस्करश्च ॥ छिदृंपी द्वैधीकरणे। छिदिर उन्दुरोऽग्निश्च। छिदिरं शस्त्रम् ॥ भिदृंपी विदारणे। भिदिरोऽशनिर्भेदश्च ॥ ष्ठां गतिनिवृत्तौ। स्थिरोऽचलः ॥ ४१६ ॥

स्थविरपिठिरस्फिराजिरादयः ॥ ४१७ ॥

एते किदिरप्रत्ययान्ता निपात्यन्ते। तिष्ठतेर्वोऽन्तो ह्रस्वश्च। स्थविरो वृद्धः॥ पचतेरत इत्वं ठश्च। पिठिरं साधनभाण्डम् ॥ स्फायतेर्डिच्च। स्फिरः स्फारो वृद्धिश्च ॥ अजेर्वीभावाभावश्च। अजिरमङ्गणं नगरं देवो वेश्म च ॥ आदिग्रहणादन्येऽपि ॥ ४१७ ॥

कॄशॄपॄपुग्मञ्जिकुटिकटिपटिकण्डिशौण्डिहिंसिभ्य ईरः ॥ ४१८ ॥

एभ्य ईरः प्रत्ययो भवति ॥ कॄत् विक्षेपे। करीरो वनस्पतिविशेषो वंशाद्यङ्कुरश्च ॥ शॄश् हिंसायाम्। शरीरं वपुः ॥ पॄश् पालनपूरणयोः। परीरं बलं लाङ्गलमुखं च ॥ पुग्श् पवने। पवीरं रङ्गस्थानं फलं पवित्रं बीजावपनं च ॥ मञ्जिः सौत्रः। मञ्जीरं नूपुरः ॥ कुटत् कौटिल्ये। कुटीरमालयः कर्कटकश्चन्द्राश्रयराशिश्च। कोटीरं मुकुटः। बाहुलकाद्गुणः ॥ कटे वर्षावरणयोः। कटीरं जनपदो जघनं जलं च ॥ पट गतौ। पटीरः कन्दर्पः। पटीरं कार्मुकं स्फिक् च ॥ कडु मदे। कण्डीरं हरितकम् ॥ शौडृ गर्वे। शौण्डीरो गर्वितः सत्त्ववान्तीक्ष्णश्च ॥ हिसुप् हिंसायाम्। हिंसीरः श्वापदो हिंस्रश्च ॥ ४१८ ॥

वसिवशिपुटिकुरिकुलिकाभ्यः कित् ॥ ४१९ ॥

एभ्यः किदीरः प्रत्ययो भवति ॥ घस्लृ अदने । क्षीरं दुग्धं मेघश्च ॥ वशक् कान्तौ । उशीरं वीरणीमूलम् ॥ पुटत् संश्लेषणे । पुटीरः कूर्मः ॥ कुरत् शब्दे । कुरीरं मैथुनं वेश्म च । कुरीरो मालाविशेषः कम्बलश्च ॥ कुल बन्धुसंस्त्यानयोः । कुलीरः कर्कटः ॥ कैं शब्दे । कीरः शुकः काश्मीरकश्च ॥ ४१९ ॥

कशेर्मोन्तश्च ॥ ४२० ॥

कश शब्दे । इत्यस्मात्तालव्यान्तादीरः प्रत्ययो[भवति]मश्चान्तो भवति ॥ कश्मीरा जनपदः ॥ ४२० ॥

वनिवपिभ्यां णित् ॥ ४२१ ॥

आभ्यां णिदीरः प्रत्ययो भवति ॥ वन भक्तौ । वानीरो वेतसः ॥ डुवपीं बीजसंताने । वापीरो मेघोमोघानिष्पत्ति च क्षेत्रम् ॥ ४२१ ॥

जम्बीराभीरगभीरगम्भीरकुम्भीरभडीरभण्डीरडिण्डीरक्मिर्मीरादयः ॥ ४२२ ॥

एत ईरप्रत्ययान्ता निपात्यन्ते ॥ जनेर्बोन्तश्च । जम्बीरो वृक्षविशेषः ॥ आप्नोतेर्भश्च । आभीरः शूद्रजातिः ॥ गमेर्भः स्वरान्नस्तु वा । गभीरोगाधोत्रपलश्च । गम्भीरः स एव ॥ स्कुम्भेः सौत्रात्सलोपश्च । कुम्भीरो जलचरः ॥ भडुङ् परिभाषणे । अस्य नलुक् च वा । भडीरो भण्डीरश्च योद्धृवचने ॥ डीङो डित् । द्विर्त्वं पूर्वस्य नोन्तश्च । डिण्डीरः फेनः ॥ किरो मोन्तश्च । किर्मीरः कर्बुरः ॥ आदिग्रहणात् तूणीरनासीरमन्दीरकरवीरादयो भवन्ति ॥ ४२२ ॥

वाश्यसिवासिमसिमथ्युन्दिमन्दिचतिचङ्क्यङ्किकर्बिचकिबन्धिभ्य उरः ॥ ४२३ ॥

एभ्य उरः प्रत्ययो भवति ॥ वाशिच् शब्दे । वाशुरःशकुनिर्गर्दभश्च । वाशुरा रात्रिः ॥ असूच् क्षेपणे । असुरो दानवः ॥ वासण् उपसेवायाम् । वासुरा रात्रिः ॥ मसैच् परिणामे । मसुरा पण्यस्त्री । मसुरं चर्मासनं धान्यविशेषश्च ॥ मथे विलोडने । मथुरा नगरी ॥ उन्दैप् क्लेदने । उन्दुरो मूषिकः ॥ मदुङ् स्तुत्यादौ । मन्दुरा वाजिशाला ॥ चतेग् याचने । चतुरो विदग्धः ॥ चङ्किः सौत्रः । चङ्कति चेष्टते । चङ्कुरो रथोनवस्थितश्च ॥ अकुङ् लक्षणे । अङ्कुरः प्ररोहस्तरुप्रतानभेदश्च । घञ्युपसर्गस्य बहुलमिति बहुलवचनाद्दीर्घत्वे । अङ्कूरः ॥ कर्व गतौ । कर्बुरः शबलः ॥

चकि तृप्तिप्रतीघातयोः । चकुरो दशनः ॥ बन्धंश् बन्धने । बन्धुरो मनोज्ञो नम्रश्च ॥ ४२३ ॥

मङ्केर्नलुक् वोच्चास्य ॥ ४२४ ॥

मकुङ् मण्डने । इत्यस्मादुरः प्रत्ययो [भवति] नकारस्य लुक् अकारस्य च उकारो वा भवति ॥ मुकुर आदर्शो मुकुलं च । मकुर आदर्शः कल्को बालपुष्पं च ॥ ४२४ ॥

विधेः कित् ॥ ४२५ ॥

विधत् विधाने । इत्यस्मात्किदुरः प्रत्ययो भवति ॥ विधुरं वैशसम् ॥ ४२५ ॥

श्वशुरकुकुन्दुरदर्दुरनिचुरप्रचुरचिकुरकुकुरकुक्कुरकुर्कुरशर्कुर-नूपुरनिष्ठुरविथुरमद्गुरवागुरादयः ॥ ४२६ ॥

एते किदुरप्रत्ययान्ता निपात्यन्ते । आशुपूर्वात् शुपूर्वाद्वा अश्नोतेरश्नातेर्वा आकारलोपश्च । श्वशुरो जम्पत्योः पिता ॥ कुपूर्वात् स्कुदुङ् आप्रवणे । इत्यस्मात्सलुक् च । कुकुन्दुरौ नितम्बकूपौ ॥ दृणातेर्दोन्तश्च । दर्दुरो मण्डूको मेघश्च ॥ निपूर्वात्प्रपूर्वात् त्रिनोतेश्चरतेर्वा डिच्च । निचुरस्तरुविशेषः । लत्वे । निचुलः ॥ प्रचुरं प्रायः ॥ चकेरिच्चास्य । चिकुरं युवतीनामीषन्निमीलितमक्षि । चिकुराः केशाः ॥ कुकेः कोन्तो वा । कुकुरो यादवः ॥ कुक्कुरः श्वा ॥ किरः कुर् कोन्तश्च । कुर्कुरः श्वा ॥ शॄश् हिंसायाम् । गुणः कोन्तश्च । शर्कुरस्तरुणः ॥ णूत् स्तवने । पोन्तश्च । नूपुरस्तुलाकोटिः ॥ निपूर्वात् तिष्ठतेः । निष्ठुरः कर्कशः । निष्ठुरं काहलम् ॥ व्यथेर्विथ् च । व्यथन्तेस्माज्जना इत्यपादानेपि । विथुरो राक्षसः ॥ मदिवात्योर्गोन्तश्च । मद्गुरो मत्स्यविशेषः ॥ वागुरा मृगानायः ॥ आदिग्रहणात् मन्यतेर्धश्च । मधुरो रसविशेष इत्यादि ॥ ४२६ ॥

मीमसिपशिखटिखडिखर्जिकर्जिसर्जिकृपिवल्लिमाण्डिभ्य ऊरः ॥ ४२७ ॥

एभ्य ऊरः प्रत्ययो भवति ॥ मींङ्च् हिंसायाम् । मयूरः शिखी । मह्यां रौति मयूर इति पृषोदरादिषु संज्ञाशब्दानामनेकधा व्युत्पत्तिं लक्षयति ॥ मसैच् परिणामे । मसूरोवरधान्यजातिश्चर्मासनं च ॥ पशिः सौत्रः । पश्यते गम्यत इति पशूरो ग्रामः ॥ खट काङ्क्षे । खटूरो मणिविशेषः ॥ खडण् भेदे । खडूरः खुरलीस्थानम् ॥ खर्ज मार्जने च । खर्जूरो वृक्षविशेषः ॥ कर्ज व्यथने । कर्जूरः स एव मलिनश्च ॥ सर्ज अर्जने । सर्जूरोहः ॥ कृपौङ् सामर्थ्ये । कर्पूरो गन्धद्रव्यम् ॥ वल्लि संवरणे । वल्लूरो शुष्कमांसम् ॥ मडु भूषायाम् । मण्डूरो धातुविशेषः ॥ ४२७ ॥

मह्किणिचण्यणिपल्यल्तिलिमलिशलिभ्यो णित् ॥ ४२८ ॥

एभ्यो णिदूरः प्रत्ययो भवति ॥ मह पूजायाम् । माहूरः शैलः ॥ कण गतौ । काणूरो नागः ॥ चण हिंसादानयोश्च । चाणूरो मल्लो विष्णुहतः ॥ अण शब्दे । आणूरो ग्रामः ॥ पल गतौ । पालूरं नाम नगरमन्ध्रराज्ये ॥ अली भूषणादौ । आलूरो विटः ॥ तलण् प्रतिष्ठायाम् । तालूरो जलावर्तः ॥ मलि धारणे । मालूरो दानवो विल्वश्च ॥ शल गतौ । शालूरो दर्दुरः ॥ ४२८ ॥

स्थाविडेः कित् ॥ ४२९ ॥

आभ्यां किदूरः प्रत्ययो भवति ॥ ष्ठां गतिनिवृत्तौ । स्थूरो वठर उच्चश्च । स्थूरा जङ्घाप्रदेशः ॥ विड आक्रोशे । विडूरो वालवाये ग्रामः ॥ ४२९ ॥

सिन्दूरकर्चूरपत्तूरधुत्तूरादयः ॥ ४३० ॥

एत ऊरप्रत्ययान्ता निपात्यन्ते ॥ स्यन्देः सिन्द् च । सिन्दूरं चीनपिष्टः ॥ करोतेश्चोन्तश्च । कर्चूरं औषधविशेषः ॥ पतेस्तोन्तश्च । पत्तूरं गन्धद्रव्यम् ॥ धुवो द्विरुक्तस्तोन्तो ह्रस्वश्च । धुत्तूर उन्मत्तकः । दधातेर्धत्तूरमित्यन्ये ॥ आदिग्रहणात् कस्तूरहारहूरादयो भवन्ति ॥ ४३० ॥

कुगुपतिकथिकुथिकठिकुठिकुटिगडिगुडिमुदिमूलिदंशिभ्यः केरः ॥ ४३१ ॥

एभ्यः किदेरः प्रत्ययो भवति ॥ कुंङ् शब्दे । कुबेरो धनदः ॥ गुंत् पुरीषोत्सर्गे । गुबेरं युद्धम् ॥ पत्लृ गतौ । पतेरः पक्षी पवनश्च ॥ कथण् वाक्यप्रबन्धे । कथेरः कथकः कुहकः शकुन्तश्च ॥ कुथच् पूतिभावे । कुथेरः शिडाकीसंभारः ॥ कठ कृच्छ्रजीवने । कठेरो दरिद्रः ॥ कुठिः सौत्रः । कुंठेरो निःसृतसारोर्जकश्च ॥ कुटत् कौटिल्ये । कुटेरः शठः ॥ गड सेचने । गडेरो मेघः प्रस्रवणशीलश्च ॥ गुडत् रक्षायाम् । गुडेरो राजा पण्यं च बालभक्ष्यम् ॥ मुदि हर्षे । मुदेरो मूर्खः ॥ मूल प्रतिष्ठायाम् । मूलेरो वनस्पतिः । मूलेरं पण्यम् ॥ दंशं दशने । दशेरः सर्पः सारमेयो जनपदश्च ॥ ४३१ ॥

शतेरादयः ॥ ४३२ ॥

शतेर इत्यादयः शब्दाः केरप्रत्ययान्ता निपात्यन्ते ॥ शद्लृं शातने । तश्च । शतेरो वायुस्तुषारश्च ॥ आदिग्रहणात् गुधेरशृङ्गबेरनालिकेरादयो भवन्ति ॥ ४३२ ॥

कठिचकिसहिभ्य ओरः ॥ ४३३ ॥

एभ्य ओरः प्रत्ययो भवति ॥ कठ कृच्छ्रजीवने । कठोरो मृदुश्चिरन्तनश्च ॥ चक तृप्तौ । चकोरः पक्षिविशेषः पर्वतविशेषश्च ॥ षहि मर्षणे । सहोरो विष्णुः पर्वतश्च ॥ ४३३ ॥

कोरचोरमोरकिशोरघोरहोरादोरादयः ॥ ४३४ ॥

कोर इत्यादयः शब्दा ओरप्रत्ययान्ता निपात्यन्ते ॥ कायतेश्चरतेर्म्रियतेश्च डिच्च । कोरो बालपुष्पम् ॥ चोरस्तस्करः ॥ मोरो मयूरः ॥ कृशेरिच्चोपान्त्यस्य । किशोरस्तरुणो बालाश्वश्च ॥ हन्तेर्डित् घश्च । घोरं कष्टम् । हृंग् हरणे । होरा निमित्तवादिनां चक्ररेखा ॥ डुदांग्क् दाने । दोंच् छेदने वा । दोरः कटिसूत्रं तन्तुगुणश्च ॥ आदिग्रहणादन्येऽपि ॥ ४३४ ॥

किशॄवृभ्यः करः ॥ ४३५ ॥

एभ्यः करः प्रत्ययो भवति ॥ किः सौत्रः । केकरो वक्रदृष्टिः ॥ शॄश् हिंसायाम् । शर्करा मत्स्यण्डिकादिः कर्करः क्षुद्रपाषाणावयवश्च ॥ वृग्ट् वरणे । वर्करश्छागशिशुः ॥ ४३५ ॥

सूपुषिभ्यां कित् ॥ ४३६ ॥

आभ्यां कित्करः प्रत्ययो भवति ॥ षूत् प्रेरणे । सूकरो वराहः ॥ पुष पुष्टौ । पुष्करं पद्मं तूर्यमुखं हस्तिहस्ताग्रमाकाशं मुरजस्तीर्थनाम च ॥ ४३६ ॥

अनिकाभ्यां तरः ॥ ४३७ ॥

आभ्यां तरः प्रत्ययो भवति ॥ अनक् प्राणने । अन्तरं बहिर्योगोपसंव्यानयोश्छिद्रमध्यविरहविशेषेषु च ॥ कैं शब्दे । कातरो भीरुः ॥ ४३७ ॥

इण्पूभ्यां कित् ॥ ४३८ ॥

आभ्यां कित्तरः प्रत्ययो भवति ॥ इण्क् गतौ । इतरो निर्दिष्टप्रतियोगी ॥ पूग्श् पवने । पूतरो जलजन्तुः ॥ ४३८ ॥

मीज्यजिमामद्यशौवासिकिभ्यः सरः ॥ ४३९ ॥

एभ्यः सरः प्रत्ययो भवति ॥ मींङ्च् हिंसायाम् । मेसरो वर्णविशेषः ॥ जिं अभिभवे । जेसरः शूरः ॥ अज क्षेपणे च । वेसरोऽश्वतरः । वेसृ गतौ । इत्यस्य वा जठरेत्यादिनिपातनादरेरूपम् ॥ मांक् माने । मासर आयामः ॥ मदैच् हर्षे । मत्सरः क्रोधविशेषः ॥ अशौटि व्याप्तौ । अक्षरं वर्णो मोक्षपदमाका-

ह्रां न । अक्षेर्वारेस्त्वम् ॥ वसं निवासे । वत्सरः संवत्सरः परिवत्सरोनुवत्सरोऽनुसंवत्सरो विवत्सर उद्वत्सरो वर्षाभिधानानि । इडामानेन वसन्त्यत्र कालावयवा इति । इद्वत्सरः । इडया मानेन वसन्त्यत्र वा । इडावत्सरो वर्षविशेषाभिधाने ॥ परिवत्सरादीन्यपि वर्षविशेषाभिधानानीत्येके ॥ कि इत्यदादौ स्मरन्ति । केसरः सिंहसटः पुष्पावयवो वकुलश्च । बाहुलकान्न पत्वम् ॥ ४३९ ॥

कृधूतन्यृषिभ्यः कित् ॥ ४४० ॥

एभ्यः कित्सरः प्रत्ययो भवति ॥ डुकृंग् करणे । कृसरः कृसरा वा विलेपिकाविशेषो वर्णविशेषश्च ॥ धूत् विधूनने । धूसरो भिन्नवर्णो वायुर्धान्यविशेषश्च ॥ तनूयी विस्तारे । तसरः कौशेयसूत्रम् ॥ ऋषैत् गतौ । ऋक्षरः कण्टक ऋत्विक् च । ऋक्षरा तोयधारा ॥ ४४० ॥

कृगृशृदृवृग्चतिखटिकटिनिषदिभ्यो वरट् ॥ ४४१ ॥

एभ्यष्टिद्वरः प्रत्ययो भवति ॥ कृत् विक्षेपे । कर्वरो व्याघ्रो विष्किरोञ्जलिश्च । कर्वरी भूमिः शिवा च ॥ गृत् निगरणे । गर्वरोहंकारो महिषश्च । गर्वरी महिषी संध्या च ॥ शृश् हिंसायाम् । शर्वरः सायाह्नो रुद्रो हिंस्रश्च । शर्वरं तमोन्नं च । शर्वरी रात्रिः ॥ दृश् विदारणे । दर्वरं वज्रम् । दर्वरी सेवा ॥ वृग्ट् वरणे । वर्वरः कामश्चन्दनं केशविशेषो लुब्धकश्च । वर्वरी नदी भार्या च ॥ चतेग् याचने । चत्वरं चतुष्पथमरण्यं च । चत्वरी रथ्या देवता वेदिश्च ॥ खट काङ्क्षे । खट्वरं रससंकीर्णशाकपाकः ॥ कटै वर्षावरणयोः । कट्वरो व्यालाश्वः ॥ कट्वरी दधिविकारः ॥ षद्लृं विशरणादौ । निपूर्वात् । निषद्वरः कर्दमो वह्निः कर्मकरः कन्दर्प इन्द्रश्च । निषद्वरमासनम् । निषद्वरी प्रपा रात्रिः प्रमदेन्द्राणी च ॥४४१॥

अश्नोतेरीचादेः ॥ ४४२ ॥

अशौटि व्याप्तौ । इत्यस्माद्वरट् प्रत्ययो [भवति] ईकारश्चादेर्भवति ॥ ईश्वरो विभुः । ईश्वरी स्त्री ॥ ४४२ ॥

नीमीकुतुचेर्दीर्घश्च ॥ ४४३ ॥

एभ्यो वरट् प्रत्ययो [भवति] दीर्घश्चैषां भवति ॥ णींग् प्रापणे । नीवरः पुरुषकारः ॥ मींग्श् हिंसायाम् । मीवरो हिंस्रः समुद्रश्च ॥ कुङ् शब्दे । कूवरो रथावयवः ॥ तुंक् वृत्त्यादौ । तूवरो मन्दश्मश्रुरजननीकश्च ॥ चिग्ट् चयने । चीवरं मुनिजनवासो निःसारकन्या च ॥ ४४३ ॥

तीवरधीवरपीवरछित्वरछत्वरगह्वरोपह्वरसंयद्वरोदुम्बरादयः ॥ ४४४ ॥

एते वरट्प्रत्ययान्ता निपात्यन्ते । तिम्यतेस्ती च तीवतेर्वा । तीवरं जलं व्यञ्जनं च ॥ ध्यायतेर्धी च । धीवरः कैवर्तः ॥ प्यायः प्यैङो वा पी च पीवतेर्वा किदरः । पीवरो मांसलः ॥ छिनत्तेस्तः किच्च । छित्वरः शठो जर्जरः पिटकश्च ॥ छादेर्णिलुकि ह्रस्वश्च । छत्वरो निर्भर्त्सको निकुञ्जश्च । छत्वरं कुड्यहीनं गृहं शयनप्रच्छदश्छदिश्च ॥ गुहेरश्चोतः । गह्वरं गहनं महाविलं भयानकं प्रत्यन्तदेशश्च ॥ उपपूर्वात् ह्वो वादेर्लुक् च । उपह्वरं संधिः समीपं रहःस्थानं च ॥ सम्पूर्वात् यमेर्दश्च । संयद्वरो रणः संयमी नृपश्च ॥ उन्देः किदुम् चान्तः । उदुम्बरो वृक्षविशेषः ॥ आदिग्रहणात् उम्बरशम्बरादयो भवन्ति ॥ ४४४ ॥

कडेरेवराङ्करौ ॥ ४४५ ॥

कडत् मदे । इत्यस्मादेवर अङ्कर इति प्रत्ययौ भवतः ॥ कडेवरं मृतशरीरम् । लत्वे । कलेवरम् ॥ कडङ्करो वनस्पतिः ॥ ४४५ ॥

त्रट् ॥ ४४६ ॥

सर्वधातुभ्यस्त्रट् प्रत्ययो भवति ॥ छादयतीति छत्त्रं छत्त्री वा घर्मवारणम् ॥ पातीति पात्रमूर्जितगुणाधारः साध्वादिः । पात्री भाजनम् ॥ स्नायतेः । स्नात्रं स्नानम् ॥ राजत इति राष्ट्रं देशः ॥ शिष्यतेनेनेति शास्त्रं ग्रन्थः ॥ असूच् क्षेपणे ॥ अस्त्रं धनुः ॥ ४४६ ॥

जिभृसृभ्रस्जिगमिनमिनश्याशिहनिविषेर्वृद्धिश्च ॥ ४४७ ॥

एभ्यस्त्रट् प्रत्ययो [भवति] वृद्धिश्चैषां भवति ॥ जिं अभिभवे । जैत्रो जयनशीलः । जैत्रं द्यूतम् ॥ टुडुभृंग्क् पोषणे च । भार्त्रं पोषो यश्च भृतिं गृहीत्वा वहति ॥ सृं गतौ । सात्त्रमालयः ॥ भ्रस्जींत् पाके । भ्राष्ट्रमम्बरीषम् ॥ गम्लृं गतौ । गान्त्रं मनः शरीरं लोकश्च ॥ णमं प्रह्वत्वे । नान्त्रं शिरः शाखा वैचित्र्यं च ॥ नशौच् अदर्शने । नशो धुटीति ञोन्तः । नांष्ट्रा यातुधानाः ॥ अश्नोतेरश्नातेर्वा । आष्ट्रमाकाशो रश्मिश्च ॥ हनंक् हिंसागत्योः हान्त्रं रक्षो युद्धं वधश्च ॥ विषॢंकी व्याप्तौ । वैष्ट्रो विष्णुर्वायुश्च । वैष्ट्रं यत्किञ्चिदिवं वेश्म च ॥ ४४७ ॥

दिवेर्द्यौ च ॥ ४४८ ॥

दीव्यतेस्त्रट् प्रत्ययो [भवति] द्यौ चास्यादेशो भवति ॥ द्यौत्रं त्रिदिवं ज्योतिर्विमानं प्रमाणं प्रतोदश्च ॥ ४४८ ॥

सूमूखन्युषिभ्यः कित् ॥ ४४९ ॥

एभ्यः किच्चट् प्रत्ययो भवति ॥ षूत् प्रेरणे । सूत्रं तन्तुः शास्त्रं च ॥ मूङ् बन्धने । मूत्रं प्रस्रावः ॥ खनूग् अवदारणे । खात्रं कूर्दालस्तडाकं ग्रामाधानमूरीकृतं न च्छिद्रम् ॥ उषू दाहे । उष्ट्रः क्रमेलकः ॥ ४४९ ॥

स्त्री ॥ ४५० ॥

स्यतेः सूतेः स्त्यायतेः स्तृणातेर्वा त्रट् डिच्च । स्त्री योषित् ॥ ४५० ॥

हुयामाश्रुवसिभसिगुवीपचिवचिधृयम्यमिमनितनिसदिछादि-
क्षिक्षदिलुपिपतिधूभ्यस्त्रः ॥ ४५१ ॥

एभ्यस्त्रः प्रत्ययो भवति ॥ हुंक् दानादनयोः । होत्रं हवनम् । होत्रा ऋत्विजः ॥ यांक् प्रापणे । यात्रा प्रस्थानं यापनमुत्सवश्च ॥ मांक् माने । मात्रा प्रमाणं कालविशेषः स्तोको गणना च ॥ श्रुंट् श्रवणे । श्रोत्रं कर्णः ॥ वसिक् आच्छादने । वस्त्रं वासः ॥ भसिं जुहोत्यादौ स्मरन्ति । भस्त्रा चर्ममयमावपनमुदरं च ॥ गुंङ् शब्दे । गोत्रः पर्वतः । गोत्रा पृथ्वी । गोत्रमन्वयः ॥ वींक् प्रजननादौ । वेत्रं वीरुद्विशेषः ॥ डुपचींष् पाके । पक्त्रं पितरं गार्हपत्यं च ॥ वचंक् भाषणे । वक्त्रमास्यं छन्दोजातिश्च ॥ धृंङ्त् स्थाने । धत्रौ धर्मौ वृक्षो रविश्च । धत्रं नभो गृहसूत्रं च । धत्रा द्यौः ॥ यमूं उपरमे । यन्त्रं शरीरसंधानमरघट्टादि च । अम गतौ । अन्त्रं पुरीतत् ॥ मनिंच् ज्ञाने । मन्त्रश्छन्दः ॥ तनूयी विस्तारे । तन्त्रं प्रसारितास्तन्तवः शास्त्रं समूहः कुटुम्बं च ॥ षद्लृ विशरणगत्यवसादनेषु । सत्त्रं यज्ञसदो दानं छद्म योगविशेषश्च ॥ छदण् संवरणे । छादयतीति छात्त्रः शिक्षकः ॥ क्षित् निवासगत्योः । क्षेत्रं कर्षणभूमिर्भार्या शरीरमाकाशं च ॥ क्षदः संवरणे सौत्रः । क्षत्त्रं राजबीजम् ॥ लुपृंती छेदने । लोप्त्रमपहृतं द्रव्यम् ॥ पत्लृ गतौ । पत्त्रं पर्णं यानं च ॥ धूग्श् कम्पने । धोत्रं रज्जुः ॥ ४५१ ॥

श्वितेर्वश्च मो वा ॥ ४५२ ॥

श्विताङ् वर्णे । इत्यस्मात्त्रः प्रत्ययो[भवति] वकारस्य च मकारो वा भवति ॥ श्मेत्त्रं श्वेत्त्रं च रोगौ ॥ ४५२ ॥

गमेरा च ॥ ४५३ ॥

गम्लृं गतौ । इत्यस्मात्त्रः प्रत्ययो[भव]त्याकारश्चान्तादेशो भवति ॥ गात्रं शरीरम् । गात्रा खट्वावयवः ॥ ४५३ ॥

चिमिदिशंसिभ्यः कित् ॥ ४५४ ॥

एभ्यः कित्त्रः प्रत्ययो भवति ॥ चिञ्ट् चयने । चित्रमाश्चर्यमालेख्यं वर्णश्च ॥ ञिमिदाच् स्नेहने । मित्त्रं सुहृत् । अमित्त्रः शत्रुः । मित्त्रः सूर्यः ॥ शंसू स्तुतौ च । शस्त्रं स्तोत्रमायुधं च ॥ ४५४ ॥

पुत्रादयः ॥ ४५५ ॥

पुत्र इत्यादयः शब्दास्त्रप्रत्ययान्ता निपात्यन्ते ॥ पुनाति पवते वा पितृपूतिमिति पुत्रः सुतः । यदाहुः । पुतीति नरकस्याख्या दुःखं च नरकं विदुः । पुन्नाम्नो नरकात्त्रायत इति । व्युत्पत्तिस्तु संज्ञाशब्दानामनेकधा व्याख्यानं लक्षयति ॥ आदिग्रहणादन्येपि ॥ ४५५ ॥

वृग्नक्षिपचिवच्यमिनमिवमिवपिवधियजिपतिकडिभ्योत्रः ॥ ४५६ ॥

एभ्योत्रः प्रत्ययो भवति ॥ वृग्ट् वरणे । वरत्रा चर्मरज्जुः ॥ णक्ष गतौ । नक्षत्रमश्विन्यादि ॥ डुपचींष् पाके । पचत्रं रन्धनस्थाली ॥ वचंक् भाषणे । वचत्रं वचनम् ॥ अम गतौ । अमत्रं भाजनम् ॥ णमं प्रह्वत्वे । नमत्रं कर्मारोपकरणम् ॥ टुवमू उद्गिरणे । वमत्रं प्रक्षेपः ॥ डुवपीं बीजसंताने । वपत्रं क्षेत्रम् ॥ वधि बन्धने । वधत्रमायुधं वस्त्रं विषं शूरश्च ॥ यजीं देवपूजासंगतिकरणदानेषु । यजत्रो यज्वा । यजत्रमग्निहोत्रम् ॥ पत्लृ गतौ । पतत्रं बर्हं वाहनं व्योम च ॥ कडत् मदे । कडत्रं दाराः । लत्वे । कलत्रं दारा जघनं च ॥ ४५६ ॥

सोर्विदः कित् ॥ ४५७ ॥

सुपूर्वात् विदः किदत्रः प्रत्ययो भवति ॥ सुष्ठु वेत्ति विन्दति विद्यते च । सुविदत्रं कुटुम्बं धनं मङ्गलं च ॥ ४५७ ॥

कृतेः कृन्त च ॥ ४५८ ॥

कृतैत् छेदने । इत्यस्मादत्रः प्रत्ययो भवत्यस्य च कृन्त इत्यादेशो [भवति] ॥ कृन्तत्रो मशकः । कृन्तत्रं छेदनं लाङ्गलाग्रं च ॥ ४५८ ॥

बन्धिवहिकटयशयादिभ्य इत्रः ॥ ४५९ ॥

एभ्य इत्रः प्रत्ययो भवति ॥ बन्धंश् बन्धने । बन्धित्रं मन्थः ॥ वहीं प्रापणे । वहित्रं वाहनं वहनं च ॥ कटे वर्षावरणयोः । कटित्रं लेख्यचर्म ॥ अशौटि व्याप्तौ । अशश् भोजने वा । अशित्रं रश्मिरग्निर्हविरन्नपानं च ॥ आदिग्रहणात् लुनातेः । लवित्रं कर्मद्रव्यम् ॥ पुनातेः । पवित्रं मङ्गल्यम् ॥ अटतेः । अटित्रं

गूले पक्वमांसम् ॥ कडतेः । काडित्रं कटित्रमेव ॥ अमतेः । अमित्रो रिपुः ॥ इत्यादिः ॥ ४५९ ॥

भूगृवदिचरिभ्यो णित् ॥ ४६० ॥

एभ्यो णिदित्रः प्रत्ययो भवति ॥ भू सत्तायाम् । भावित्रं त्रैलोक्यं निधानं भद्रं च ॥ गृत् निगरणे । गारित्रं नभोन्नपानमाचार्यश्च ॥ वद व्यक्तायां वाचि । वादित्रमातोद्यम् ॥ चर भक्षणे च । चारित्रं वृत्तं स्थित्यभेदश्च ॥ ४६० ॥

तनितृलापात्रादिभ्य उत्रः ॥ ४६१ ॥

एभ्य उत्रः प्रत्ययो भवति ॥ तनूयी विस्तारे । तनुत्रं कवचम् ॥ तॄ प्लवनतरणयोः । तरुत्रं प्लवो घासहारी च ॥ लांक् आदाने । लोत्रमपहृतद्रव्यम् ॥ पां पाने । पोत्रं हलसूकरयोर्मुखम् ॥ त्रैङ् पालने । त्रोत्रमभयक्रिया ॥ आदिग्रहणात् वृणोतेः । वरुत्रमभिप्रेतम् ॥ इत्यादयः ॥ ४६१ ॥

शामाश्याशक्यम्व्यमिभ्यो लः ॥ ४६२ ॥

एभ्यो लः प्रत्ययो भवति ॥ शोंच् तक्षणे । शाला सभा ॥ मांक् माने । माला स्रक् ॥ श्यैंङ् गतौ । श्यालः पत्नीभ्राता ॥ शकृंट् शक्तौ । शक्लो मनोज्ञदर्शनो मधुरवाक् शक्तश्च ॥ अबुङ् शब्दे । अम गतौ । अम्ब्लोम्लश्च रसः ॥ ४६२ ॥

शुकशीमूभ्यः कित् ॥ ४६३ ॥

एभ्यः किल्लः प्रत्ययो भवति ॥ शुक गतौ । शुक्लः सितो वर्णः ॥ शीङ्क् स्वप्ने । शीलं स्वभावो व्रतं धर्मः समाधिश्च ॥ मूङ् बन्धने । मूलं वृक्षपादावयव आदिर्हेतुश्च ॥ ४६३ ॥

भिल्लाच्छभल्लसौविदल्लादयः ॥ ४६४ ॥

भिल्लादयः शब्दाः किल्लप्रत्ययान्ता निपात्यन्ते ॥ भिदेर्लश्च । भिल्लोन्त्यजातिः ॥ अच्छपूर्वात् भलेः । अच्छभल्ल ऋक्षः ॥ सुपूर्वात् विदेरलोन्तः सोश्च वृद्धिः । सौविदल्लः कञ्चुकी ॥ आदिग्रहणात् अल्लपल्लीरल्लादयोपि भवन्ति ॥ ४६४ ॥

मृदिकन्दिकुण्डिमण्डिमङ्गिपटिपाटिशकिकेवृदेवृकमियामिशलिकालिपलिगुम्बञ्चिचञ्चिचपित्रहिदिहिकुहितृसृपिशितुसिकुस्यनिद्रमेरलः ॥ ४६५ ॥

एभ्योलः प्रत्ययो भवति ॥ मृदश् क्षोदे । मर्दलो मुरजः ॥ कदु रोदनाह्वानयोः । कन्दलं प्ररोहः ॥ कुडुङ् दाहे । कुण्डलं कर्णाभरणम् ॥ मडु भूषायाम् ।

मण्डलं देशः परिवारश्च ॥ मगु गतौ। मङ्गलं शुभम् ॥ पट गतौ। पटलं छदिः समूह आवपनं नेत्ररोगश्च। ण्यन्तात्। पाटलो वर्णः ॥ शकॢ शक्तौ। शकलं भित्तमसारं च ॥ केवृङ् सेवने। केवलं परिपूर्णं ज्ञानमसहायं च ॥ देवृङ् देवने। देवल ऋषिर्देवव्रातः क्रीडनश्च ॥ कमूङ् कान्तौ। कमलं पद्मम्। णिडि। कामलो नेत्ररोगः ॥ यमू उपरमे। यमलं युग्मम् ॥ शल गतौ। शललं सेधाङ्गरुहशङ्कुः। कलि शब्दसंख्यानयोः। कललं गर्भप्रथमावस्था ॥ पल गतौ। पललं भृष्टतिलातसीचूर्णम् ॥ गुङ् शब्दे। गवलो महिषः ॥ धूञ् कम्पने। धवलः श्वेतः ॥ अञ्चू गतौ च। अञ्चलो वस्त्रान्तः ॥ चञ्चू गतौ। चञ्चलोऽस्थिरः ॥ चप सान्त्वने। चपलः स एव ॥ वर्हि प्रापणे। वहलं सान्द्रम् ॥ दिहींक् लेपे। देहली द्वाराधःपट्टः ॥ कुहणि विस्मापने। कोहलो भरतसूनुः। वाहुलकाद्गुणः ॥ तॄ प्लवनतरणयोः। तरलो धीरो हारमध्यमणिश्च ॥ सृं गतौ। सरलो कुटिलो वृक्षविशेषश्च ॥ पिशत् अवयवे। पेशलो मनोज्ञः ॥ तुस शब्दे। तोसला जनपदः ॥ कुसच् श्लेषे। कोसला जनपदः ॥ अनक् प्राणने। अनलोऽग्निः ॥ द्रम गतौ। द्रमलं जलम् ॥ ४६५ ॥

नहिलङ्गेर्दीर्घश्च ॥ ४६६ ॥

आभ्यामलः प्रत्ययो [भव]त्यनयोश्च दीर्घो भवति ॥ णहींच् बन्धने। नाहलो म्लेच्छः ॥ लगु गतौ। लाङ्गलं हलम् ॥ ४६६ ॥

ऋजनेर्गोन्तश्च ॥ ४६७ ॥

आभ्यामलः प्रत्ययो [भवति] गकारश्चान्तो भवति ॥ ऋक् गतौ। अर्गला परिघः ॥ जनैचि प्रादुर्भावे। जङ्गलं निर्जलो देशः ॥ ४६७ ॥

तृपिवपिकुपिकुशिकुटिवृषिमुसिभ्यः कित् ॥ ४६८ ॥

एभ्यः किदलः प्रत्ययो भवति ॥ तृपौच् प्रीतौ। तृपला लता। तृपलं शुष्कपर्णं शुष्कतृणं च ॥ डुवपीं बीजसंताने। उपलः पाषाणः ॥ कुपच् क्रोधे। कुपलः प्रवालः ॥ कुशच् श्लेषणे। कुशलो मेधावी। कुशलमारोग्यम् ॥ कुटत् कौटिल्ये। कुटल ऋषिः ॥ वृषू सेचने। वृषलो दासजातिः ॥ मुसच् खण्डने। मुसलमवहननम् ॥ ४६८ ॥

कोर्वा ॥ ४६९ ॥

कुंङ् शब्दे। इत्यस्मादलः प्रत्ययो [भवति] स च किद्वा भवति ॥ कुवलं वदरम्। कुवली क्षुद्रबदरी ॥ कवलो ग्रासः ॥ ४६९ ॥

शमेर्व च वा ॥ ४७० ॥

शमूच् उपशमे । इत्यस्मादलः प्रत्ययो [भवति] मकारस्य च वकारो वा भवति ॥ शवलः कल्माषः ॥ शमलं पुरीषं दुरितं च ॥ ४७० ॥

छोर्डग् गादिर्वा ॥ ४७१ ॥

छोंच् छेदने । इत्यस्मात्किदलः प्रत्ययो [भवति] स च डगादिर्गादिर्वा भवति ॥ छगलश्छागः ॥ छागल ऋषिः ॥ छलं वचनविघातोर्थविकल्पोपपत्त्या ॥ ४७१ ॥

मृजिखन्याङ्हनिभ्यो डित् ॥ ४७२ ॥

एभ्यो डिदलः प्रत्ययो भवति ॥ मृजौक् शुद्धौ । मलं बाह्यं रजोन्तर्दोषश्च ॥ खनूग् अवदारणे । खलो दुर्जनो निष्पीडितरसं पिण्याकादि । खलं सस्यफलग्रहणभूमिः ॥ हनंक् हिंसागत्योः । आङ्पूर्वः । आहलो विषाणं नखरश्च ॥४७२॥

स्थो वा ॥ ४७३ ॥

तिष्ठतेरलः प्रत्ययो [भवति] स च डिद्वा भवति ॥ स्थलं प्रदेशविशेषः ॥ स्थालं भाजनम् ॥ ४७३ ॥

मुरलोरलविरलकेरलकपिञ्जलकज्जलेज्जलकोमलभृमलसिंहलकाहलशूकलपाकलयुगलभगलविदलकुन्तलोत्पलादयः ॥ ४७४ ॥

एतेलप्रत्ययान्ता निपात्यन्ते ॥ मुर्व्युर्व्योर्वलोपः किच्च । मुरला जनपदः ॥ उरल उत्कटः ॥ विपूर्वात् रमेर्डिच्च । विरलोसंहतः ॥ किरः केर च । केरला जनपदः ॥ कम्पेरिञ्जोन्तो नलोपश्च । कपिञ्जलो गौरतित्तिरः ॥ कषीपेर्जोन्तो जश्च । कज्जलं मषी ॥ इज्जलो वृक्षविशेषः ॥ कमेरत ओच्च । कोमलं मृदु ॥ भ्रमेर्भृम् च । भृमलो वायुः कृमिजातिश्च । भृमलं चक्रम् ॥ हिंसेराद्यन्तविपर्ययश्च । सिंहला जनपदः ॥ कणेर्हो दीर्घश्च । काहलोव्यक्तवाक् । काहला वाद्यविशेषः ॥ शकेरूच्चास्य । शूकलोश्वाधमः ॥ पचेः पाक् च । पाकलो हस्तिज्वरः ॥ युजेः किद्ग च । युगलं युग्मम् ॥ भातेर्गोन्तो ह्रस्वश्च । भगलो मुनिः ॥ विन्देर्नलोपश्च । विदलं वेणुदलम् ॥ कनेरत उत्तोन्तश्च । कुन्तला जनपदः केशाश्च ॥ उत्पूर्वात् पिबतेर्ह्रस्वश्च । उत्पलं पद्मम् ॥आदिग्रहणात् सुवर्चलामुद्गलपुद्गलादयो भवन्ति॥४७४॥

ऋकृमृवृतनितमिचषिचपिकपिकीलिपलिवलिपञ्चिमङ्गिगण्डिमण्डिचण्डितण्डिपिण्डिनन्दिनदिशाकिभ्य आलः ॥४७५ ॥

एभ्य आलः प्रत्ययो भवति ॥ ऋंक् गतौ । अरालं वक्रम् ॥ डुकृंग् करणे ।

करालमुखम् ॥ मृत् प्राणत्यागे । मरालो हंसो महांश्च ॥ वृगट् वरणे । वरालो वदान्यः ॥ तनूयी विस्तारे । तनालं जलाशयः ॥ तमूच् काङ्क्षायाम् । तमालो वृक्षो व्यालश्च ॥ चषी भक्षणे । चषालं यूपशिरासि द्रव्यम् ॥ चप सान्त्वने । चपालं यज्ञद्रव्यम् ॥ कपिः सौत्रः । कपालं घटाद्यवयवः शिरोऽस्थि च ॥ कील बन्धे । कीलालं मद्यं जलमसृक् च ॥ पल गतौ । पलालमकणो व्रीह्यादिः ॥ बल प्राणनधान्यावरोधयोः । बलालो वायुः ॥ पचुङ् व्यक्तीकरणे । पञ्चाल ऋषी राजा च । पञ्चाला जनपदः ॥ मगु गतौ । मङ्गालो देशः ॥ गडु वदनैकदेशे । गण्डालो मत्तहस्ती ॥ मडु भूषायाम् । मण्डाल ऋषिः ॥ चडुङ् कोपे । चण्डालः श्वपचः । अकृतज्ञमकार्यज्ञं दीर्घरोषमनार्जवम् । चतुरो विद्धि चण्डालाञ्जन्मना चेति पञ्चमम् ॥ १ ॥ तडुङ् ताडने । तण्डालः क्षुपः ॥ पिडुङ् संघाते । पिण्डालः कन्दजातिः॥ टुनदु समृद्धौ । नन्दालो राजा ॥ णद अव्यक्ते शब्दे । नदालो नादवान् ॥ शकॢट् शक्तौ । शकाला जनपदो मूर्खधनी च ॥ ४७५ ॥

कुलिपिलिविशिविडिमृणिकुणिपीप्रीभ्यः कित् ॥ ४७६ ॥

एभ्यः किदालः प्रत्ययो भवति ॥ कुल बन्धुसंस्त्यानयोः । कुलालः कुम्भकारः ॥ पिलण् क्षेपे । पिलालं श्लिष्टम् ॥ विशंत् प्रवेशने । विशालं विस्तीर्णम् ॥ विड आक्रोशे । विडालो मार्जारः । लत्वे । विलालः स एव ॥ मृणत् हिंसायाम् । मृणालं बिसम् । कुणंत् शब्दोपकरणयोः । कुणालः कृतमालः कटविशेषश्च । कुणालं नगरं कठिनं च ॥ पीङ्च् पाने । पियालो वृक्षः । पियालं शाकं वीरुच ॥ प्रीङ्च् प्रीतौ । प्रियालः पियालः ॥ ४७६ ॥

भजेः कगौ च ॥ ४७७ ॥

भजीं सेवायाम् । इत्यस्मात्किदालः प्रत्ययो भवति कगौ चान्तादेशौ भवतः ॥ भकालम् । भगालमुभयं कपालम् ॥ ४७७ ॥

सर्तेर्गोन्तश्च ॥ ४७८ ॥

सृं गतौ । इत्यस्मात्किदालः प्रत्ययो भवति गकारोन्तश्च[भवति ॥]
सृगालः क्रोष्टा ॥ ४७८ ॥

पतिकृलूभ्यो णित् ॥ ४७९ ॥

एभ्यो णिदालः प्रत्ययो भवति ॥ पतॢ गतौ । पातालं रसातलम् ॥ डुकृंग् करणे । कारालं लेपद्रव्यम् ॥ लूग्श् छेदने । लावाल उद्दन्तः ॥ ४७९ ॥

चात्वालकङ्कालहिन्तालवेतालजम्बालशब्दालममापालादयः ॥ ४८० ॥

एत आलप्रत्ययान्ता निपात्यन्ते ॥ चतेर्वोन्तो दीर्घश्च । चात्वालो यज्ञगर्तः॥ कन्देः स्वरान्नोन्तः कश्च । कङ्कालः कलेवरम् ॥ हिंसेस्तश्च । हिन्तालो वृक्षविशेषः॥ वियस्तोन्तो गुणश्च । वेतालो रजनीचरविशेषः ॥ जनेर्वोन्तश्च । जम्बालः कर्दमः शैवलं च ॥ शमे[र्दि]र्वा शब्दभावश्च । शब्दालः शब्दनशीलः ॥ ममेर्मलोपो माप्रश्चान्तः । ममापालो मतिः स्नेहः पुत्रादिषु स्नेहबन्धनं च ॥ आदिशब्दात् चक्रवालकरवालालवालादयो भवन्ति ॥ ४८० ॥

कल्यनिमहिद्रमिजटिभटिकुटिचण्डिशण्डितुण्डिपिण्डिभूकुकिभ्य इलः ॥ ४८१ ॥

एभ्य इलः प्रत्ययो भवति ॥ कलि शब्दसंख्यानयोः । कलिलं गहनं पापमात्माधिष्ठितं च शुक्रार्तवम् ॥ अनक् प्राणने । अनिलो वायुः ॥ मह पूजायाम् । महिला स्त्री ॥ द्रम गतौ । द्रमिलास्त्रैराज्यवासिनः ॥ जट झट संघाते । जटिलो जटावान् ॥ भट भृतौ । भटिलः श्वा सेवकश्च ॥ कुटत् कौटिल्ये । कुटिलं वक्रम् ॥ चडुङ् कोपे । चण्डिलः श्वा क्रोधनो नापितश्च ॥ शडुङ् रुजायाम् । शण्डिल ऋषिः ॥ तुडुङ् तोडने । तुण्डिलो वाग्जाली ॥ पिडुङ् संघाते । पिण्डिलो मेघो हिंस्रो हिमो गणकश्च ॥ भू सत्तायाम् । भविलो मुनिः समर्थो गृहं बहुनेता च ॥ कुकि आदाने । कोकिलः परभृतः ॥ ४८१ ॥

भण्डेर्नलुक् च वा ॥ ४८२ ॥

भडुङ् परिभाषणे । इत्यस्मादिलः प्रत्ययो भवति नकारस्य च लुग्वा भवति ॥ भडिल ऋषिः पिशाचः शत्रुश्च ॥ भण्डिलः श्वा दूत ऋषिश्च ॥४८२॥

गुपिमिथिध्रुभ्यः कित् ॥ ४८३ ॥

एभ्यः किदिलः प्रत्ययो भवति ॥ गुपौ रक्षणे । गुपिलं गहनम् ॥ मिथृग् मेधाहिंसयोः । मिथिला नगरी ॥ ध्रुं स्थैर्ये च । ध्रुविल ऋषिः ॥ ४८३ ॥

स्थण्डिलकपिलविचकिलादयः ॥ ४८४ ॥

स्थण्डिलादयः शब्दा इलप्रत्ययान्ता निपात्यन्ते ॥ स्थलेः स्थण्ड् च । स्थण्डिलं व्रतिशयनवेदिका ॥ कवेः प् च । कपिलो वर्ण ऋषिश्च ॥ विचेरकोन्तश्च । विचकिलो मल्लिकाविशेषः ॥ आदिग्रहणात् गोभिलनिकुम्भिलादयोपि भवन्ति ॥ ४८४ ॥

हृषिवृतिचटिपटिशकिशङ्कितण्डिमङ्ग्युत्कण्ठिभ्य उलः ॥ ४८५ ॥

एभ्य उलः प्रत्ययो भवति ॥ हृषच् तुष्टौ । हृषू अलीके वा । हर्षुलो हर्षवान्कामी मृगश्च । वृतुङ् वर्तने । वर्तुलो वृत्तः ॥ चटण् भेदे । चटुलश्चञ्चलः ॥ पट गतौ । पटुलो वाग्मी ॥ शक्लृट् शक्तौ । शकुलो मत्स्यः ॥ शकुङ् शङ्कायाम् । शङ्कुला क्रीडनशङ्कुर्बन्धनभाण्डमायुधं च ॥ तडुङ् ताडने । तण्डुलो निस्तुषो व्रीह्यादिः ॥ मगु गतौ । मङ्गुलं न्यायापेतम् ॥ कठुङ् शोके । उत्पूर्वः । उत्कण्ठुल उत्कण्ठावान् ॥ ४८५ ॥

स्थावङ्किबंहिविन्दिभ्यः किन्नलुक् च ॥ ४८६ ॥

एभ्यः किदुलः प्रत्ययो [भवति] नकारस्य च लुग्भवति ॥ ष्ठां गतिनिवृत्तौ । स्थुलं पटकुटीविशेषः ॥ वकुङ् कौटिल्ये । वकुलः केसर ऋषिश्च ॥ वहुङ् वृद्धौ । वहुलं प्रचुरम् । बहुलः प्रासकः कृष्णपक्षश्च । बहुलाः कृत्तिकाः । बहुला गौः ॥ विदु अवयवे । विदुलो वेतसः ॥ ४८६ ॥

कुमुलतुमुलनिचुलवञ्जुलमञ्जुलपृथुलविशंस्थुलाङ्गुलमुकुलशष्कुलादयः ॥ ४८७ ॥

एत उलप्रत्ययान्ता निपात्यन्ते ॥ कमितम्योरत उच्च । कुमुलं कुसुमं हिरण्यं च । कुमुलः शिशुः कान्तश्च ॥ तुमुलं व्यामिश्रयुद्धं संकुलं च ॥ निजेः किच्चश्च । निचुलो वञ्जुलः ॥ वजेः स्वरान्नोन्तश्च । वञ्जुलो निचुलः ॥ मञ्जिः सौत्रः । मञ्जुलं मनोज्ञम् ॥ प्रथेः पृथ् च । पृथुलो विस्तीर्णः ॥ विपूर्वात् शंसेस्थोन्तश्च । विशंस्थुलो व्यग्रः ॥ अञ्जेर्गश्च । अङ्गुलमष्टयवप्रमाणम् ॥ मुचेः किक्कश्च । मुकुलमविकसितपुष्पम् ॥ शकेः स्वरात् षोन्तश्च । शष्कुली भक्ष्यविशेषः कर्णावयवश्च ॥ आदिग्रहणात् लकुलवल्गुलादयो भवन्ति ॥ ४८७ ॥

पिञ्जिमञ्जिकण्डिगण्डिबलिवधिवञ्चिभ्य ऊलः ॥ ४८८ ॥

एभ्य ऊलः प्रत्ययो भवति ॥ पिजुण् हिंसाबलदाननिकेतनेषु । पिञ्जूलो हस्तिबंधनपाशो राशिः कुलपतिश्च ॥ मञ्जिः सौत्रः । मञ्जूला मृदुभाषिणी ॥ कडुङ् मदे । कण्डूलोऽशिष्टो जनः ॥ गडु वदनैकदेशे । गण्डूलः कृमिजातिः ॥ बल प्राणनधान्यावरोधयोः । बलूल ऋषिर्मेघो मासश्च ॥ वधि बन्धने । वधूलो हस्ती धातकी रसायनं तन्त्रकारश्च ॥ वञ्चिण् प्रलम्भने । वञ्चूलो हस्ती मत्स्यमारपक्षी च ॥ ४८८ ॥

तमेर्वोन्तो दीर्घस्तु वा ॥ ४८९ ॥

तमूच् काङ्क्षायाम् । इत्यस्मादूलः प्रत्ययो भवति वोन्तश्च भवति दीर्घस्तु वा भवति ॥ ताम्बूलम् । तम्बूलमुभयं पूगपत्त्रचूर्णसंयोगः ॥ ४८९ ॥

कुलपुलकुसिभ्यः कित् ॥ ४९० ॥

एभ्य ऊलः प्रत्ययो भवति स च किद्भवति ॥ कुल बन्धुसंस्त्यानयोः । कुलूलः कृमिजातिः ॥ पुल महत्त्वे । पुलूलो वृक्षविशेषः ॥ कुसच् श्लेषे । कुसूलः कोष्ठः ॥ ४९० ॥

दुकूलकुकूलवब्बूललाङ्गूलशार्दूलादयः ॥ ४९१ ॥

दुकूलादयः शब्दा ऊलप्रत्ययान्ता निपात्यन्ते ॥ दुक्तोः कोन्तश्च । दुकूलं क्षौमं वासः ॥ कुकूलं कारीषाग्निः ॥ वधेर्वोन्तो बश्च । बब्बूलो वृक्षविशेषः ॥ लङ्गेर्दीर्घश्च । लाङ्गूलं वालधिः । शृणातेर्दोन्तो वृद्धिश्च । शार्दूलो व्याघ्रः ॥ आदिग्रहणात् मार्जूलकञ्चूलादयो भवन्ति ॥ ४९१ ॥

महेरेलः ॥ ४९२ ॥

मह पूजायाम् । इत्यस्मादेलः प्रत्ययो भवति ॥ महेला स्त्री ॥ ४९२ ॥

कटिपटिकण्डिगण्डिशकिकपिचहिभ्य ओलः ॥ ४९३ ॥

एभ्य ओलः प्रत्ययो भवति ॥ कटे वर्षावरणयोः । कटोलः कटविशेषो वादित्रविशेषश्च । कटोलौषधिः ॥ पट गतौ । पटोला वल्लीविशेषः ॥ कडु मदे । कण्डोलो विदलभाजनविशेषः ॥ गडु वदनैकदेशे । गण्डोलः कृमिविशेषः ॥ शकॢट् शक्तौ । शकोलः शक्तः ॥ कपिः सौत्रः । कपोलो गण्डः ॥ चह कल्कने । चहोल उपद्रवः ॥ ४९३ ॥

ग्रह्याद्भ्यः कित् ॥ ४९४ ॥

ग्रहेराकारान्तेभ्यश्च धातुभ्यः किदोलः प्रत्ययो भवति ॥ ग्रहीश् उपादाने । गृहोलो बालिशः ॥ कायतेः । कोलो बदरी वराहश्च ॥ गायतेः । गोलो वृत्ताकृतिः । गोला गोदावरी बालरमणकाष्ठं च ॥ पातेः । पोला तालाख्यं कपाटबन्धनं परिखा च ॥ लातेः । लोलश्चपलः ॥ ददातेर्दयतेर्द्यतेर्वा । दोला प्रेङ्खणम् ॥ ४९४ ॥

पिञ्छोलकल्लोलकक्कोलमक्कोलादयः ॥ ४९५ ॥

पिञ्छोलादयः शब्दा ओलप्रत्ययान्ता निपात्यन्ते ॥ पीडेः पिञ्छ् च । पिञ्छोलो वादित्रविशेषः ॥ कलेर्लोन्तश्च । कल्लोल ऊर्मिः ॥ कचिमच्योः कादिः । कक्कोली लताविशेषः ॥ मक्कोलः सुधाविशेषः ॥ आदिग्रहणादन्येपि ॥ ४९५ ॥

वलिपुषेः कलक् ॥ ४९६ ॥

आभ्यां कित्कलः प्रत्ययो भवति ॥ वलि संवरणे। वल्कलं तरुत्वक् ॥ पुष पुष्टौ। पुष्कलं समग्रं युद्धं शोभनं हिरण्यं धान्यं च ॥ ४९६ ॥

मिगः खलश्चैच्च ॥ ४९७ ॥

डुमिंगट् प्रक्षेपणे। इत्यस्मात्खलः चकारात्कलश्च प्रत्ययौ भवत एकारश्चान्तादेशो भवति ॥ मेखला गिरिनितम्बो रशना च ॥ मेकलो नर्मदाप्रभवोऽद्रिः॥ मिग एत्ववचनमात्वबाधनार्थम् ॥ ४९७ ॥

शो नोन्तो ह्रस्वश्च ॥ ४९८ ॥

शॄश् हिंसायाम्। इत्यस्मात्खलः प्रत्ययो [भवति] नकारोन्तो ह्रस्वश्च भवति ॥ शृङ्खला लोहरज्जुः। शृङ्खलः शृङ्खलं वा ॥ ४९८ ॥

शमिकमिपलिभ्यो बलः ॥ ४९९ ॥

एभ्यो वलः प्रत्ययो भवति ॥ शमूच् उपशमे। शम्बलं पाथेयम्॥ कमूङ् कान्तौ। कम्बल ऊर्णापटः॥ पल गतौ। पल्वलमकृत्रिमोदकस्थानविशेषः ॥४९९॥

तुल्वलेल्वलादयः ॥ ५०० ॥

तुल्वलादयः शब्दा वलप्रत्ययान्ता निपात्यन्ते ॥ तुलीन्योर्णिलुग्गुणाभावश्च। तुल्वल ऋषिः। यस्य तौल्वलिः पुत्रः ॥ इल्वलोऽसुरो योगस्त्येन जग्धो मत्स्यो यूपश्च। इल्वलास्तिस्रो मृगशिरःशिरस्ताराः ॥ आदिग्रहणात् शाल्वलादयो भवन्ति ॥ ५०० ॥

शीङस्तलक्पालवालण्वलण्वलाः ॥ ५०१ ॥

शीङ्क् स्वप्ने। इत्यस्मात्तलक् पाल वालण् वलण् वल इत्येते प्रत्यया भवन्ति॥ शीतलमनुष्णम्॥ शेपालम्। जपादित्वात्पस्य वत्वे। शेवालम्। शैवालम्। शैवलम्। शेवलं पञ्चकमपि जलमलवाचि ॥ ५०१ ॥

रुचिकुटिकुषिकशिशालिद्रुभ्यो मलक् ॥ ५०२ ॥

एभ्यः किन्मलः प्रत्ययो भवति ॥ रुचि अभिप्रीत्याम्। रुक्मलं सुवर्णम्। न्यङ्क्वादित्वात्कत्वम् ॥ कुटत् कौटिल्ये। कुड्मलं मुकुलम् ॥ कुषच् निष्कर्षे। कुष्मलं तदेव बिलं च ॥ कश शब्दे। कश्मलं मलिनम्॥ शालृङ् श्लाघायाम्। लत्वे। शाल्मलो वृक्षविशेषः॥ द्रुं गतौ। द्रुमलं वनं जलं च ॥ ५०२ ॥

कुशिकमिभ्यां कुल्कुमौ च ॥ ५०३ ॥

आभ्यां मलक् प्रत्ययो भवत्यनयोश्च यथासंख्यं कुल् कुम् इत्यादेशौ भवतः ॥ कुशच् श्लेषणे । कुल्मलं छेदनम् ॥ कमूङ् कान्तौ । कुम्मलं पद्मम् ॥५०३॥

पतेः सलः ॥ ५०४ ॥

पत्ऌ गतौ । इत्यस्मात्सलः प्रत्ययो भवति ॥ पत्सलः प्रहारो गोमानाहारश्च ॥ ५०४ ॥

लटिखटिखलिनलिकण्यशौसृगॄकॄगॄदॄपॄशपिश्याशालापदिह्रसीण्भ्यो वः ॥ ५०५ ॥

एभ्यो वः प्रत्ययो भवति ॥ लट बाल्ये । लट्वा क्षुद्रचटका कुसुम्भं च ॥ खट काङ्क्षे । खट्वा शयनयन्त्रम् ॥ खल संचये च । खल्वं निम्नं खलीनं च ॥ खल्वा दृतिः ॥ णल गन्धे । नल्वो भूमानविशेषः ॥ कण शब्दे । कण्व ऋषिः । कण्वं पापम् ॥ अशौटि व्याप्तौ । अश्वस्तुरंगः ॥ सृं गतौ । सर्वः शम्भुः सर्वादि च कृत्स्नार्थे ॥ शॄश् हिंसायाम् । शर्वः शम्भुः ॥ कॄत् विक्षेपे । कर्व आखुः समुद्रो निष्पत्तिक्षेत्रं च ॥ गॄत् निगरणे । गर्वोऽहंकारः ॥ दॄश् विदारणे । दर्वा जनपदः । दर्वो हिंस्रः ॥ पॄश् पालनपूरणयोः । पर्वो रुद्रः काण्डं च ॥ शपीं आक्रोशे । शप्व आक्रोशः ॥ श्यैङ् गतौ । श्यावो वर्णः ॥ शोंच् तक्षणे । शावस्तिर्यग्वालः ॥ लांक् आदाने । लावः पक्षिजातिः ॥ पदिंच् गतौ । पद्वो रथो वायुर्भूर्लोकश्च ॥ ह्रस शब्दे । ह्रस्वो लघुः ॥ इणक् गतौ । एवः केवलः । एवेत्यवधारणे निपातश्च ॥ ५०५ ॥

शीङापो ह्रस्वश्च वा ॥ ५०६ ॥

आभ्यां वः प्रत्ययो [भवति] ह्रस्वश्च वा भवति ॥ शीङ्क् स्वप्ने । शिवं क्षेमं सुखं मोक्षपदं च । शिवा हरीतकी । शेवं धनम् । शेवोऽजगरः सुखकृच्च । शेवा प्रबलनिद्राविशेषो मेण्ढ्रश्च ॥ आप्लृंट् व्याप्तौ । अप्वा देवायुधम् । आप्वा वायुः ॥ ५०६ ॥

उर्देर्ध च ॥ ५०७ ॥

उर्दि मानक्रीडनयोश्च । इत्यस्माद्वः प्रत्ययो भवति धकारश्चान्तादेशो भवति ॥ ऊर्ध्वं उद्धर्मा । ऊर्ध्वमुपरि पुरस्ताच्च ॥ ५०७ ॥

गन्धेरर् चान्तः ॥ ६०८ ॥

गन्धिण् अर्दने । इत्यस्माद्वः प्रत्ययो [भव]त्यर् चान्तो भवति ॥ गन्धर्वो गाथको देवविशेषश्च ॥ ६०८ ॥

लषेर्लिष् च वा ॥ ६०९ ॥

लषी कान्तौ । इत्यस्माद्वः प्रत्ययो [भव]त्यस्य च लिष् इत्यादेशो वा भवति ॥ लिष्वो लम्पटः कान्तो दयितश्च ॥ लष्वोपत्यमृषिस्थानं च ॥ ६०९ ॥

सलेर्णिद्वा ॥ ६१० ॥

सल गतौ । इत्यस्माद्वः प्रत्ययो [भवति] स च णिद्वा भवति ॥ साल्वाः सल्वाश्च जनपदः क्षत्रिय[ा]श्च ॥ ६१० ॥

निघृषीष्यृषिस्रुप्रुषिकिणिविशिबिल्यविपॄभ्यः कित् ॥ ६११ ॥

एभ्यः किद्वः प्रत्ययो भवति ॥ घृषू संहर्षे । निपूर्वः । निघृष्वोनुकूलः सुवर्णनिकषोपलो वायुः क्षुरश्च ॥ इषत् इच्छायाम् । इष्वोभिलषित आचार्यश्च । इष्वापत्यसंततिः ॥ ऋषैत् गतौ । ऋष्वो रिपुर्हिंस्रश्च । रिषेर्व्यञ्जनादेः केचिदिच्छन्ति । रिष्वः ॥ स्रुं गतौ । स्रुवो हवनभाण्डम् ॥ प्रुषू दाहे । प्रुष्वा निवृत्तिर्जललवश्च ॥ किणः सौत्रः । किण्वं सुराबीजम् ॥ विशंत् प्रवेशने । विश्वं जगत्सर्वादि च ॥ बिलत् भेदने । बिल्वो मालूरः ॥ अव रक्षणादौ । अवेत्यव्ययम् ॥ पॄश् पालनपूरणयोः । पूर्वो दिक्कालनिमित्तः ॥ ६११ ॥

नञो भुवो डित् ॥ ६१२ ॥

नञ्पूर्वात् भवतेर्डिद्वः प्रत्ययो भवति ॥ अभ्वमद्भुतम् ॥ ६१२ ॥

लिहेर्जिह् च ॥ ६१३ ॥

लिहींक् आस्वादने । इत्यस्माद्वः प्रत्ययो भवत्यस्य च जिह् इत्यादेशो भवति ॥ जिह्वा रसना ॥ ६१३ ॥

प्रह्वाह्वायह्वास्वच्छेवाग्रीवामीवाब्वादयः ॥ ६१४ ॥

प्रह्वादयः शब्दा वप्रत्ययान्ता निपात्यन्ते ॥ प्रपूर्वस्य ह्वयतेर्वादेर्लोपो यततेर्वा हादेशश्च । प्रह्वः प्रणतः ॥ आह्वयतेराह् च । आह्वा कण्ठः ॥ यमेर्यसेर्वा ह् च । यह्वा बुद्धिः ॥ अस्यतेरलोपश्च । स्व आत्मात्मीयं ज्ञातिर्धनं च ॥ छ्यतेश्छिदेर्वा छेभावश्च । छेवोच्छित्तिः ॥ ग्रन्थतेर्गिरतेर्वा ग्रीभावश्च । ग्रीवा ॥ अमेरीच्चान्तो दीर्घश्च वा । अमीवा बुभुक्षा । आमीवा व्याधिः ॥ मिनोतेर्दीर्घश्च । मीवा

मन उदकं न । तदेतत्त्रयमपि तन्त्रेणावृत्त्या वा निर्दिष्टम् ॥ अवतेर्वलोपाभावश्च । अम्बा माता ॥ आदिशब्दात् प्वादयो भवन्ति ॥ ५१४ ॥

वडिवटिपेलचणिपणिपल्लिवल्लेरवः ॥ ५१५ ॥

एभ्योवः प्रत्ययो भवति ॥ वड आग्रहणे सौत्रः। वडवाश्वा॥ वट वेष्टने। वटवा सैव ॥ पेल गतौ । पेलवं निःसारम् ॥ चण हिंसादानयोश्च । चणवोवरधान्यजातिः ॥ पणि व्यवहारस्तुत्योः । पणवो वाद्यजातिः ॥ पल्ल गतौ । पल्लवं किसलयम् ॥ वल्लि संवरणे । वल्लवो गोपः ॥ ५१५ ॥

मणिवसेर्णित् ॥ ५१६ ॥

आभ्यां णिदवः प्रत्ययो भवति ॥ मण शब्दे । माणवः शिष्यः ॥ वसं निवासे । वासवः शक्रः ॥ ५१६ ॥

मलेर्वा ॥ ५१७ ॥

मलि धारणे । इत्यस्मादवः प्रत्ययो [भवति] स च णिद्वा भवति । मालवा जनपदः ॥ मलवो दानवः ॥ ५१७ ॥

कितिकुडिकुरिमुरिस्थाभ्यः कित् ॥ ५१८ ॥

एभ्यः किदवः प्रत्ययो भवति ॥ कित निवासे । कितवो द्यूतकारः ॥ कुडत् बाल्ये च । कुडवो मानम् । लत्वे । कुलवः स एव नालीद्वयं च ॥ कुरत् शब्दे । कुरवः पुष्पवृक्षजातिः ॥ मुरत् संवेष्टने । मुरवो मानविशेषो वाद्यजातिश्च ॥ ष्ठां गतिनिवृत्तौ । स्थवोजावृषः ॥ ५१८ ॥

कैरवभैरवमुतवकारण्डवादीनवादयः ॥ ५१९ ॥

कैरवादयः शब्दा अवप्रत्ययान्ता निपात्यन्ते । कृग्भृगोः कैरभैरौ च । कैरवं कुमुदम् ॥ भैरवो भर्गो भयानकश्च ॥ मिनोतेर्मुत् च । मुतवो मानविशेषः॥ कृगोण्डोन्तो वृद्धिश्च । कारण्डवो जलपक्षी ॥ आङ्पूर्वात् दीङो नोन्तश्च । आदीनवो दोषः ॥ आदिग्रहणात् कोद्रवकोटवादयोपि भवन्ति ॥ ५१९ ॥

गृणातेरावः ॥ ५२० ॥

शॄश् हिंसायाम् । इत्यस्मादावः प्रत्ययो भवति ॥ शरावो मल्लकः॥५२०॥

प्रथेरिवट् पृथ् च ॥ ५२१ ॥

प्रथिष् प्रख्याने । इत्यस्मादिवट् प्रत्ययो [भव]त्यस्य च पृथ् इत्यादेशो भवति ॥ पृथिवी भूः ॥ ५२१ ॥

पलिसचेरिवः ॥ ६२२ ॥

पलण् रक्षणे । षचि सेचने । इत्याभ्यामिवः प्रत्ययो भवति ॥ पलिवो गोपा ॥ सचिवः सहायः ॥ ६२२ ॥

स्पृशेः श्वः पार् च ॥ ६२३ ॥

स्पृशंत् संस्पर्शे । इत्यस्मात् श्वः प्रत्ययो [भव]त्यस्य च पार् इत्यादेशो भवति ॥ पार्श्वं स्वाङ्गं समीपं च । पार्श्वो भगवांस्तीर्थकरः ॥ ६२३ ॥

कुडितुड्यडेरुवः ॥ ६२४ ॥

एभ्य उवः प्रत्ययो भवति ॥ कुडत् बाल्ये च । कुडुवं प्रसृतं हस्तमानं च ॥ तुडत् तोडने । तुडुवमपनेयद्रव्यम् ॥ अड उद्यमे । अडुवः प्लवः॥६२४॥

नीह्विण्ध्यैप्यापादामाभ्यस्त्वः ॥ ६२५ ॥

एभ्यस्त्वः प्रत्ययो भवति ॥ णींग् प्रापणे । नेत्वं द्यावापृथिव्यौ चन्द्रश्च ॥ हुंक् दानादनयोः । होत्वं यजमानः समुद्रश्च ॥ इण्क् गतौ । एत्वं गमनपरम् ॥ ध्यैं चिन्तायाम् । ध्यात्वं ब्राह्मणः ॥ प्यैंङ् वृद्धौ । प्यात्वं ब्राह्मणः समुद्रो नेत्रं च ॥ पां पाने । पात्वं पात्रम् ॥ डुदांगृक् दाने । दात्व आयुक्तो यज्वा यज्ञश्च ॥ मांक् माने । मात्वं प्रमेयद्रव्यम् ॥ ६२५ ॥

कृजन्येधिपाभ्य इत्वः ॥ ६२६ ॥

एभ्य इत्वः प्रत्ययो भवति ॥ डुकृंग् करणे । करित्वः करणशीलः ॥ जनैचि प्रादुर्भावे । जनित्वो लोको मातापितरौ द्यावापृथिव्यौ च । जनित्वं कुलम् ॥ एधि वृद्धौ । एधित्वोऽग्निः समुद्रः शैलश्च ॥ पां पाने । पेत्वं तप्तभूमिप्रदेशोऽमृतं नेत्रं सुखं मानं च ॥ ६२६ ॥

पादावम्यमिभ्यः शः ॥ ६२७ ॥

एभ्यः शः प्रत्ययो भवति ॥ पांक् रक्षणे । पाशो बन्धनम् ॥ डुदांगृक् दाने । दाशः कैवर्तः ॥ टुवमू उद्गिरणे । वंशो वेणुः ॥ अम गतौ । अंशो भागः ॥ ६२७ ॥

कृवृभृवनिभ्यः कित् ॥ ६२८ ॥

एभ्यः कित् शः प्रत्ययो भवति ॥ डुकृंग् करणे । कृशस्तनुः ॥ वृग्ट् वरणे । वृशं शृङ्गवेरं मूलकं लशुनं च ॥ टुडुभृंगृक् पोषणे च । भृशमत्यर्थम् ॥ वन भक्तौ । वश आयत्तः ॥ ६२८ ॥

कोर्वा ॥ ५२९ ॥

कुंङ् शब्दे । इत्यस्मात् शः प्रत्ययो [भवति] स च किद्वा भवति ॥ कुशो दर्भः ॥ कोशः सारं कुड्मलं च ॥ ५२९ ॥

क्लिशः के च ॥ ५३० ॥

क्लिशौश् विबाधने । इत्यस्मात् शः प्रत्ययो [भव]त्यस्य च के इत्यादेशो भवति ॥ केशा मूर्धजाः ॥ ५३० ॥

उरेरशक् ॥ ५३१ ॥

उर गतौ । इत्यस्मात्सौत्रादशक् प्रत्ययो भवति ॥ उरश ऋषिः ॥५३१॥

कलेष्टित् ॥ ५३२ ॥

कलि शब्दसंख्यानयोः । इत्यस्माट्टिदशक् प्रत्ययो भवति ॥ कलशः कुम्भः । कलशी दधिमन्थनभाजनम् ॥ ५३२ ॥

पलेराशः ॥ ५३३ ॥

पल गतौ । इत्यस्मादाशः प्रत्ययो भवति ॥ पलाशो ब्रह्मवृक्षः ॥५३३ ॥

कनेरीश्चातः ॥ ५३४ ॥

कनै दीप्त्यादौ । इत्यस्मादाशः प्रत्ययो [भवति] ईकारश्चाकारस्य भवति ॥ कीनाशः कर्षको वर्णसंकरः कदर्यश्च । तथा । लुब्धः कीनाशः स्यात्कीनाशोऽप्युच्यते कृतघ्नश्च । योऽश्नात्यामं मांसं स च कीनाशो यमश्चैव ॥ १ ॥ ५३४ ॥

कुलिकनिकणिपलिवडिभ्यः किशः ॥ ५३५ ॥

एभ्यः किदिशः प्रत्ययो भवति ॥ कुल बन्धुसंस्त्यानयोः । कुलिशं वज्रम् । कनै दीप्त्यादौ । कण शब्दे । कनिशं कणिशं च सस्यमञ्जरी ॥ पल गतौ । पलिशं यत्र स्थित्वा मृगा व्यापाद्यन्ते ॥ वड आग्रहणे सौत्रः । वडिशं मत्स्यग्रहणम् ॥ ५३५ ॥

वलेर्णिद्वा ॥ ५३६ ॥

वल प्राणनधान्यावरोधयोः । इत्यस्मात्किशः प्रत्ययो [भवति] स च णिद्वा भवति ॥ वालिशो मूर्खः ॥ वलिशं वडिशम् ॥ ५३६ ॥

तिनिशेतिशादयः ॥ ५३७ ॥

तिनिशादयः शब्दाः किशप्रत्ययान्ता निपात्यन्ते ॥ तनेरिच्चातः । तिनिशो वृक्षः ॥ हणस्तोऽन्तश्च । इतिशो गोत्रकृदपि ॥ आदिग्रहणादन्येऽपि ॥ ५३७ ॥

मस्ज्यङ्किभ्यामुशः ॥ ५३८ ॥

आभ्यामुशः प्रत्ययो भवति ॥ टुमस्जोँत् शुद्धौ । न्यङ्क्वादित्वान्मेघादय इति गः । मद्गुशो नकुलः ॥ अकुङ् लक्षणे । अङ्कुशः सृणिः ॥ ५३८ ॥

अर्तीण्भ्यां पिशतशौ ॥ ५३९ ॥

आभ्यां यथासंख्यं पिश तश इत्येतौ प्रत्ययौ भवतः ॥ ऋक् गतौ । अर्पिशमार्द्रमांसं बालवत्साया दुग्धं च ॥ इण्क् गतौ । एतशोऽश्व ऋषिर्वायुरग्निरर्कश्च ॥ ५३९ ॥

वृकृतॄमीङ्माभ्यः षः ॥ ५४० ॥

एभ्यः षः प्रत्ययो भवति ॥ वृग्ट् वरणे । वर्षो भर्ता । वर्षं संवत्सरः। वर्षा ऋतुः ॥ कृत् विक्षेपे । कर्ष उन्मानविशेषः ॥ तॄ प्लवनतरणयोः । तर्षः प्लवो हर्षश्च ॥ मींङ्त्र् हिंसायाम् । मेष उरभ्रः॥ मांक् माने । माषो धान्यविशेषो हेमपरिमाणं च ॥ ५४० ॥

योरूच्च वा ॥ ५४१ ॥

युक् मिश्रणे । इत्यस्मात् षः प्रत्ययो [भव] त्यूकारश्चान्तादेशो वा भवति॥ यूषः पेयविशेषः । यूषा छाया । योषा स्त्री ॥ ५४१ ॥

स्नुपूसूम्वर्कलूभ्यः कित् ॥ ५४२ ॥

स्न्वादिभ्योऽर्कपूर्वाच्च लुनातेः कित् षः प्रत्ययो भवति ॥ स्नुक् प्रस्नवने । स्नुषा पुत्रवधूः ॥ पूग्श् पवने । पूषः पवनभाण्डं शूर्पादिः ॥ षूत् प्रेरणे । सूषो बलम् ॥ मूङ् बन्धने । मूषा लोहरक्षणभाजनम् ॥ लूग्श् छेदने । अर्कपूर्वः । अर्कलूषः ऋषिः ॥ ५४२ ॥

श्लिषेः शे च ॥ ५४३ ॥

श्लिषंच् आलिङ्गने । इत्यस्मात् षः प्रत्ययो [भव]त्यस्य च शे इत्यादेशो भवति ॥ शेषो नागराजः ॥ ५४३ ॥

कोरषः ॥ ५४४ ॥

कुंङ् शब्दे । इत्यस्मादषः प्रत्ययो भवति ॥ कवषः क्रोधी शब्दकारश्च ॥ ५४४ ॥

युजलेराषः ॥ ५४५ ॥

आभ्यामाषः प्रत्ययो भवति ॥ युक् मिश्रणे । यवाषो दुरालभा ॥ जल घात्ये । जलाषं जलम् ॥ ५४५ ॥

अर्तेरिषः ॥ ५४६ ॥

ऋक् गतौ । इत्यस्माण्ण्यन्तादिषः प्रत्ययो भवति ॥ आर्पिषमार्द्रमांसम् ॥ ५४६ ॥

मह्यविभ्यां टित् ॥ ५४७ ॥

आभ्यां टिदिषः प्रत्ययो भवति ॥ मह पूजायाम् । महिषः सैरिभो राजा च । महिषी राजपत्नी सैरिभी च ॥ अव रक्षणादौ । अविषः समुद्रो राजा पर्वतश्च । अविषी द्यौर्भूमिर्गङ्गा च ॥ ५४७ ॥

रुहेर्वृद्धिश्च ॥ ५४८ ॥

रुहं जन्मनि । इत्यस्माट्टिदिषः प्रत्ययो [भवति] वृद्धिश्चास्य भवति ॥ रौहिषं तृणविशेषोन्तरिक्षं च । रौहिषो मृगः । रौहिषी वाल्या मृगी दूर्वा च ॥ ५४८ ॥

अभिमृभ्यां णित् ॥ ५४९ ॥

आभ्यामिषः प्रत्ययो भवति स च णित् [भवति ॥] अम गतौ । आमिषं भक्ष्यम् ॥ मृश् हिंसायाम् । मारिषो हिंस्रः ॥ ५४९ ॥

तवेर्वा ॥ ५५० ॥

तव गतौ ॥ इत्यस्मात्सौत्राट्टिदिषः प्रत्ययो [भवति] स च णिद्वा भवति ॥ ताविपस्तविपश्च स्वर्गः ॥ ताविषं तविषं च बलं तेजश्च ॥ ताविषी तविषी च वाल्या देवकन्या च ॥ ५५० ॥

कलेः किल्व च ॥ ५५१ ॥

कलि शब्दसंख्यानयोः । इत्यस्माट्टिदिषः प्रत्ययो [भव]त्यस्य च किल्व इत्यादेशो भवति ॥ किल्विषं पापम् । किल्विषी वेश्या रात्रिः पिशाची च ॥ ५५१ ॥

नञो व्यथेः ॥ ५५२ ॥

नञ्पूर्वात् व्यथिप् भयचलनयोः । इत्यस्माट्टिदिषः प्रत्ययोभवति ॥ अव्यथिषः क्षेत्रज्ञः सूर्योग्निश्च । अव्यथिषी पृथिवी ॥ ५५२ ॥

कृतॄभ्यामीषः ॥ ५५३ ॥

आभ्यामीषः प्रत्ययो भवति ॥ कृत् विक्षेपे । करीषः शुष्कगोमयरजः ॥ तॄ प्लवनतरणयोः । तरीषः समर्थः स्तम्भः प्लवश्च ॥ ५५३ ॥

ऋजिशॄपॄभ्यः कित् ॥ ५५४ ॥

एभ्यः किदीषः प्रत्ययो भवति ॥ ऋजि गत्यादौ । ऋजीषं धनम् । ऋजीषोपस्करः ॥ शॄस् हिंसायाम् । शिरीषो वृक्षः ॥ पॄश् पालनपूरणयोः । पुरीषं शकृत् ॥ ५५४ ॥

अमेर्वरादिः ॥ ५५५ ॥

अम गतौ । इत्यस्माद्वरादिरीषः प्रत्ययो भवति ॥ अम्बरीषं भ्राष्ट्रं व्योम च । अम्बरीष आदिनृपः ॥ ५५५ ॥

उषेर्णोन्तश्च ॥ ५५६ ॥

उषू दाहे । इत्यस्मादीषः प्रत्ययो [भवति] णकारश्चान्तो भवति ॥ उष्णीषो मुकुटं शिरोवेष्टनं च ॥ ५५६ ॥

ऋपॄनहिहनिकलिचलिचपिवपिकॄपिहयिभ्य उषः ॥ ५५७ ॥

एभ्य उषः प्रत्ययो भवति ॥ ऋश् गतौ । अरुषो व्रणो हय आदित्यो वर्णो रोषश्च ॥ पॄश् पालनपूरणयोः । परुषः कर्कशः ॥ णहींच् बन्धने । नहुषः पूर्वो राजा ॥ हनंक् हिंसागत्योः । हनुषः क्रोधो राक्षसश्च ॥ कलि शब्दसंख्यानयोः । कलुषमप्रसन्नं पापं च ॥ चल कम्पने । चलुषो वायुः ॥ चप सान्त्वने । चपुषः शकुनिः ॥ डुवपीं बीजसंताने । वपुषो वर्णः ॥ कृपौङ् सामर्थ्ये । कल्पुषः क्रियानुगुणः ॥ हय क्रान्तौ च । हयुषौषधिः ॥ ५५७ ॥

विदिपॄभ्यां कित् ॥ ५५८ ॥

आभ्यां किदुषः प्रत्ययो भवति ॥ विदक् ज्ञाने । विदुषो विद्वान् ॥ पॄश् पालनपूरणयोः । पुरुषः पुमानात्मा च ॥ ५५८ ॥

अपुषधनुषादयः ॥ ५५९ ॥

अपुषादयः शब्दा उषप्रत्ययान्ता निपात्यन्ते ॥ आप्नोतेर्ह्रस्वश्च । अपुषोग्निः सरोगश्च ॥ दधातेर्धन् च । धनुषः शैलः ॥ आदिग्रहणात् लङ्घुषादयोपि ॥५५९॥

खलिफलिवृपॄकॄजॄलम्बिमञ्जिपीयिहन्यङ्घिमङ्घि-
गण्डर्यतिभ्य ऊषः ॥ ५६० ॥

एभ्य ऊषः प्रत्ययो भवति ॥ खल संचये च । खलूषो म्लेच्छजातिः ॥ फल निष्पत्तौ । फलूषो वीरुत् ॥ वृग्ट् वरणे । वरूषो भाजनम् ॥ पॄश् पालनपूरणयोः । परूषो वृक्षविशेषः ॥ कॄत् विक्षेपे । करूषा जनपदः ॥ जॄष्ट्र् जरसि । जरूष आदित्यः ॥ लबुङ् अवस्रंसने च । लम्बूषो नीरकदम्बो निचुलश्च । मञ्जिः पीयिश्च

मौर्वी || मञ्जूषा काष्ठकोष्ठः || पीयूषं प्रत्यग्रप्रसवक्षीरविकारोऽमृतं घृतं च || हनंक् हिंसागत्योः | हनूषो राक्षसः || अगु गतौ | अङ्कूषः शकुनिजातिर्हस्ती बाणो वेगश्च || मगु गतौ | मङ्कूषो जलचरशकुनिः || गडु वदनैकदेशे | गण्डूषो द्रवकवलः || ऋक् गतौ | अरूषो रविः || ५६० ||

कोरदूषाटरूषकारूषशैलूषपिञ्जूषादयः || ५६१ ||

एत ऊषप्रत्ययान्ता निपात्यन्ते || कुरेरदोन्तश्च | कोरदूषः कोद्रवः || आटेररोन्तश्च | आटरूषो वासा | अटनं रूषतीत्यटरूष इति तु पृषोदरादिः || कृगो वृद्धिश्च | कारूषा जनपदः || शलेरै चातः | शैलूषो नटः || पिजुण् हिंसादौ | पिञ्जूषः कर्णशष्कुल्याभोगः || आदिशब्दात् प्रत्यूषाभ्यूषादयो भवन्ति || ५६१ ||

कलेर्मषः || ५६२ ||

कलि शब्दसंख्यानयोः | इत्यस्मान्मषः प्रत्ययो भवति || कल्मषं पापम् || ५६२ ||

कुलेश्च माषक् || ५६३ ||

कुल बन्धुसंस्त्यानयोः | इत्यस्मात्कलेश्च किन्माषः प्रत्ययो भवति || कुल्माषोऽर्धस्विन्नं माषादि || कल्माषः शबलः || ५६३ ||

मावावद्यमिकमिहनिमानिकष्यशिपचिमुचियजिवृतृभ्यः सः ||५६४||

एभ्यः सः प्रत्ययो भवति || मांक् माने | मासस्त्रिंशद्रात्रः || वांक् गतिगन्धनयोः | वासा | आटरूषः || वद व्यक्तायां वाचि | वत्सस्तर्णक ऋषिः प्रियस्य च पुत्रस्याख्यानम् || अम गतौ | अंसो भुजशिखरम् || कमूङ् कान्तौ | कंसो लोहजातिर्विष्णोररातिर्हिरण्यमानं च || हनंक् हिंसागत्योः | हंसः श्वेतच्छदः || मानि पूजायाम् | मांसं तृतीयो धातुः || कष हिंसायाम् | कक्षस्तृणगहनारण्यं शरीरावयवश्च || अशौटि व्याप्तौ | अक्षाः प्रासकाः | अक्षाणीन्द्रियाणि रथचक्राणि च || डुपचींष् पाके | पक्षोऽर्धमासो वर्गः शकुन्यवयवः सहायः साध्यं च || मुच्लृंतीं मोक्षणे | मोक्षो मुक्तिः || यजीं देवपूजादौ | यक्षो गुह्यकः || वृग्श् वरणे | वर्सो देशः समुद्रश्च || तॄ प्लवनतरणयोः | तर्सो वीतंसः सूर्यश्च || वर्सतर्सयोर्बाहुलकान्न षत्वम् || ५६४ ||

व्यवाभ्यां तनेरीच्च वेः || ५६५ ||

वि अव इत्येताभ्यां परात्तनोतेः सः प्रत्ययो [भवति] वेरीकारश्चान्तादेशो भवति || वीतंसः शकुन्यवरोधः || अवतंसः कर्णपूरः || ५६५ ||

प्लुषेः प्लष् च ॥ ५६६ ॥

प्लुषू दाहे। इत्यस्मात्सः प्रत्ययो [भव]त्यस्य च प्लष् इत्यादेशो भवति॥ प्लक्षो नक्षत्रं वृक्षश्च॥ ५६६॥

ऋजिरिषिकुषिकृतिव्रश्च्युन्दिशॄभ्यः कित् ॥ ५६७ ॥

एभ्यः कित्सः प्रत्ययो भवति॥ ऋजि गत्यादौ। ऋक्षं नक्षत्रम्। ऋक्षोऽच्छभल्लः॥ रिष हिंसायाम्। रिक्षा यूकाण्डम्। लत्वे। लिक्षा सैव॥ कुषश् निष्कर्षे। कुक्षो गर्भः। कुक्षं गर्तः॥ कृतैत् छेदने। कृत्सो गोत्रकृदोदनं वल्कलं दुःखजातं च॥ ओव्रश्चौत् छेदने। वृक्षः पादपः॥ उन्दैप् क्लेदने। उत्सः समुद्र आकाशं जलं जलाशयश्च। उत्सं स्रोतः॥ शॄश् हिंसायाम्। शीर्षं शिरः॥ ५६७॥

गुधिगृधेस्त च ॥ ५६८ ॥

आभ्यां कित्सः प्रत्ययो [भवति] तकारश्चान्तादेशो भवति॥ गुधच् परिवेष्टने। गुत्सो रोपस्तृणजातिश्च॥ गृधूच् अभिकाङ्क्षायाम्। गृत्सो विप्रः श्वा गृध्रोभिलाषश्च॥ तकारविधानमादिचतुर्थत्वबाधनार्थम्॥ ५६८॥

तप्यणिपन्यल्यविरधिनभिनम्यमिचमितमिचटयतिपतेरसः ॥ ५६९ ॥

एभ्योसः प्रत्ययो भवति॥ तप संतापे। तपस आदित्यः पशुर्धर्मो घर्मश्च॥ अण शब्दे। अणसः शकुनिः॥ पनि स्तुतौ। पनसः फलवृक्षः॥ अली भूषणादौ। अलसो निरुत्साहः॥ अव रक्षणादौ। अवसो भानू राजा च। अवसं चापं पाथेयं च॥ रधौच् हिंसासंराद्धयोः। रध इटि तु परोक्षायामेवेति नागमे। रन्धसोऽन्धकजातिः॥ णभच् हिंसायाम्। नभस ऋतुराकाशः समुद्रश्च॥ णमं प्रह्वत्वे। नमसो वेत्रः प्रणामश्च॥ अम गतौ। अमसः काल आहारः संसारो रोगश्च॥ चमू अदने। चमसः सोमपात्रं मन्त्रपूतं पिष्टं च। चमसी मुद्गादिभि[र्]कृता॥ तमूच् काङ्क्षायाम्। तमसोन्धकारः। तमसा नाम नदी॥ चटण् भेदे। चटसश्चर्मपुटः॥ अत सातत्यगमने। अतसो वायुरात्मा वनस्पतिजातिश्च। अतस्योषधिः॥ पत्लृ गतौ। पतसः पतंगः॥ ५६९॥

सृवयिभ्यां णित् ॥ ५७० ॥

आभ्यां णिदसः प्रत्ययो भवति॥ सृ गतौ। सारसः पक्षिविशेषः॥ वयि गतौ। वायसः काकः॥ ५७०॥

वहियुभ्यां वा ॥ ५७१ ॥

आभ्यामसः प्रत्ययो [भवति] स च णिद्वा भवति॥ वहीं प्रापणे। वाहसो-

नड्वाञ्शकटमजगरो वहनजीवश्च ॥ वहसोनड्वाञ्शकटं च ॥ युक् मिश्रणे । यावसं भक्तं तृणं मिश्रं च ॥ यवसमश्वादिघासोन्नं च ॥ ५७१ ॥

दिवादिरभिलभ्युरिभ्यः कित् ॥ ५७२ ॥

दिवादिभ्यो रभिलभ्युरिभ्यश्च किदसः प्रत्ययो भवति ॥ दीव्यतेः । दिवसो वासरः ॥ व्रीडयतेर्लत्वे । व्रीलसो लज्जावान् ॥ नृत्यतेः । नृतसो नर्तकः ॥ क्षिप्यतेः । क्षिपसो योद्धा ॥ सीव्यतेः । सिवसः श्लोको वस्त्रं च ॥ श्रीव्यतेः । श्रिवसो गतिमान् ॥ इष्यतेः । इषस इष्वाचार्यः ॥ रभिं राभस्ये । रभसः संरम्भ उद्धर्षो गम्भीरश्च ॥ डुलभिष् प्राप्तौ । लभसो याचकः प्राप्तिश्च ॥ उरिः सौत्रः । उरस ऋषिः ॥ ५७२ ॥

फनसतामरसादयः ॥ ५७३ ॥

फनसादयः शब्दा असप्रत्ययान्ता निपात्यन्ते ॥ फण गतौ । नश्च । फनसः पनसः ॥ तमेररोन्तो वृद्धिश्च । तामरसं पद्मम् ॥ आदिशब्दात् कीकसबुक्कसादयो भवन्ति ॥ ५७३ ॥

युवलिभ्यामासः ॥ ५७४ ॥

आभ्यामासः प्रत्ययो भवति ॥ युक् मिश्रणे । यवासो दुरालभा ॥ बल प्राणनधान्यावरोधयोः । बलासः श्लेष्मा ॥ ५७४ ॥

किलेः कित् ॥ ५७५ ॥

किलत् श्वैत्यक्रीडनयोः । इत्यस्मात्किदासः प्रत्ययो भवति ॥ किलासं सिध्मम् । किलासी पाककर्परम् ॥ ५७५ ॥

तलिकसिभ्यामीसण् ॥ ५७६ ॥

आभ्यामीसण् प्रत्ययो भवति ॥ तलण् प्रतिष्ठायाम् । तालीसं गन्धद्रव्यम् ॥ कस गतौ । कासीसं धातुजमौषधम् ॥ ५७६ ॥

सेर्डित् ॥ ५७७ ॥

षिंग्ट् बन्धने । इत्यस्माड्डिदीसण् प्रत्ययो भवति ॥ सीसं लोहजातिः ॥ ५७७ ॥

त्रपेरुसः ॥ ५७८ ॥

त्रपौषि लज्जायाम् । इत्यस्मादुसः प्रत्ययो भवति ॥ त्रपुसं कर्कटिका । विधानसामर्थ्यबलान् पत्वाभावः ॥ ५७८ ॥

पटिवीभ्यां टिसडिसौ ॥ ५७९ ॥

आभ्यां यथासंख्यं टिसो डिदिसश्च प्रत्ययौ भवतः ॥ पट गतौ । पट्टिस आयुधविशेषः ॥ वींक् प्रजननाशे । विसं मृणालम् ॥ ५७९ ॥

तसः ॥ ५८० ॥

पटिवीभ्यां तसः प्रत्ययो भवति ॥ पट्टसस्त्रिशूलम् ॥ वेतसो वानीरः ॥५८०॥

इणः ॥ ५८१ ॥

एतेस्तसः प्रत्ययो भवति ॥ एतसोध्वर्युः ॥ ५८१ ॥

पीङो नसक् ॥ ५८२ ॥

पींङ्च् पाने । इत्यस्मात्किन्नसः प्रत्ययो भवति ॥ पीनसः श्लेष्मा ॥५८२॥

कृकुरिभ्यां पासः ॥ ५८३ ॥

आभ्यां पासः प्रत्ययो भवति ॥ डुकृंग् करणे । कर्पासः पिचुप्रकृतिर्वीरुच्च ॥ कुरत् शब्दे । कूर्पासः कञ्चुकः ॥ ५८३ ॥

कलिकुलिभ्यां मासक् ॥ ५८४ ॥

आभ्यां किन्मासः प्रत्ययो भवति ॥ कलि शब्दसंख्यानयोः । कल्मासं शबलम् ॥ कुल बन्धुसंस्त्यानयोः । कुल्मासमर्धस्विन्नं माषादि ॥ ५८४ ॥

अलेरम्बुसः ॥ ५८५ ॥

अली भूषणादौ । इत्यस्मादम्बुसः प्रत्ययो भवति ॥ अलम्बुसो यातुधानः । अलम्बुसा नामौषधिः ॥ ५८५ ॥

लूगो हः ॥ ५८६ ॥

लुनातेर्हः प्रत्ययो भवति ॥ लोहं सुवर्णादि ॥ ५८६ ॥

कितो गे च ॥ ५८७ ॥

कित निवासे । इत्यस्मात् हः प्रत्ययो[भव]त्यस्य च गे इत्यादेशो भवति ॥ गेहं गृहम् ॥ ५८७ ॥

हिंसेः सिम् च ॥ ५८८ ॥

हिसुप् हिंसायाम् । इत्यस्मात् हः प्रत्ययो[भव]त्यस्य च सिमित्यादेशो भवति ॥ सिंहो मृगराजः ॥ ५८८ ॥

कॄपॄकटिपटिमटिलटिलिलपिलिकल्यनिरगिलगेरहः ॥ ५८९ ॥

एभ्योहः प्रत्ययो भवति ॥ कॄत् विक्षेपे । करहो धान्यावपनम् ॥ पॄश् पालनपूर-

णयोः। परहः शंकरः॥ कटै वर्षावरणयोः। कटहः पर्जन्यः कर्णवच्च कालायसभाजनम्॥ पट गतौ। पटहो वाद्यविशेषः॥ मट सादे सौत्रः। मटहो ह्रस्वः॥ लट बाल्ये। लटति विलसति। लटहो विलासवान्॥ ललिण् ईप्सायाम्। ललहो लीलावान्॥ पल गतौ। पलह आवापः॥ कलि शब्दसंख्यानयोः। कलहो युद्धम्॥ अनक् प्राणने। अनहो नीरोगः॥ रगे शङ्कायाम्। रगहो नटः॥ लगे सङ्गे। लगहो मन्दः॥ ५८९॥

पुलेः कित्॥ ५९०॥

पुल महत्त्वे। इत्यस्मात्किदहः प्रत्ययो भवति॥ पुलहः प्रजापतिः॥५९०॥

वृकटिशमिभ्य आहः॥ ५९१॥

एभ्य आहः प्रत्ययो भवति॥ वृगट् वरणे। वराहः सूकरः॥ कटै वर्षावरणयोः। कटाहः कर्णवत्कालायसभाजनम्॥ शमूच् उपशमे। शमाह आश्रमः॥ ५९१॥

विलेः कित्॥ ५९२॥

विलत् वरणे। इत्यस्मात्किदाहः प्रत्ययो भवति॥ विलाहो रहः॥ ५९२॥

निर इण ऊहश्॥ ५९३॥

निर्पूर्वात् इणक् गतौ। इत्यस्मात् शिदूहः प्रत्ययो भवति॥ निर्यूहः सौधादिकाष्ठनिर्गमः॥ ५९३॥

दस्त्यूहः॥ ५९४॥

ददातेस्त्यूहः प्रत्ययो भवति॥ दात्यूहः पक्षिविशेषः॥ ५९४॥

अनेरोकहः॥ ५९५॥

अनक् प्राणने। इत्यस्मादोकहःप्रत्ययो भवति॥ अनोकहो वृक्षः॥५९५॥

वलेरक्षः॥ ५९६॥

वलि संवरणे। इत्यस्मादक्षः प्रत्ययो भवति॥ वलक्षः शुक्लः॥ ५९६॥

लाक्षाद्राक्षामिक्षादयः॥ ५९७॥

लाक्षादयः शब्दा अक्षप्रत्ययान्ता निपात्यन्ते॥ लसेरा च। लाक्षा जतु॥ रसेर्द्रा च। द्राक्षा मृद्वीका॥ आङ्पूर्वात् मृदेरन्त्यस्वरादेर्लुक् प्रत्ययादेरित्वं च। आमिक्षा हविर्विशेषः॥ आदिग्रहणात् चुप मन्दायां गतौ। इत्यस्य। चोक्षो ग्रामरागः शुद्धं च॥ एवं पीयूक्षादयोपि॥ ५९७॥

समिण्निकषिभ्यामाः ॥ ५९८ ॥

सम्पूर्वात् इणक् गतौ । इत्यस्मात् निपूर्वात् कष हिंसायाम् । इत्यस्माच्च आः प्रत्ययो भवति ॥ समया पर्वतम् ॥ निकषा पर्वतम् ॥ समीपासूयावाचिनावेतौ ॥ ५९८ ॥

दिविपुरिवृषिमृषिभ्यः कित् ॥ ५९९ ॥

एभ्यः किदाः प्रत्ययो भवति ॥ दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु । दिवाहः ॥ पुरत् अग्रगमने । पुरा भूतकालवाची ॥ वृषू सेचने । वृषा प्रबलमित्यर्थः ॥ मृषीच् तितिक्षायाम् । मृषाभूतमित्यर्थः ॥ ५९९ ॥

वेः साहाभ्याम् ॥ ६०० ॥

विपूर्वाभ्यां षोंच् अन्तकर्मणि । ओहांक् त्यागे । इत्येताभ्यामाः प्रत्ययो भवति ॥ विसा चन्द्रमा बुद्धिश्च । तालव्यान्तोयमित्येके ॥ विहा विहगः स्वर्गश्च ॥ ६०० ॥

वृमिथिदिशिभ्यस्थयट्याश्चान्ताः ॥ ६०१ ॥

एभ्यः किदाः प्रत्ययो भवति यथासंख्यं थकारयकारट्यकाराश्चान्ता भवन्ति ॥ वृग्ट् वरणे । वृथानर्थकम् ॥ मिथृग् मेधाहिंसयोः । मिथ्या मृषा निष्फलं च ॥ दिशींत् अतिसर्जने । दिष्ट्या प्रीतिवचनम् ॥ ६०१ ॥

मुचिस्वदेर्धं च ॥ ६०२ ॥

आभ्यां किदाः प्रत्ययो [भवति] धकारश्चान्तस्य भवति ॥ मुच्लृंती मोक्षणे । मुधानिमित्तम् ॥ ष्वदि आस्वादने । स्वधा पितृबलिः ॥ ६०२ ॥

सोर्ब्रूग आह च ॥ ६०३ ॥

सुपूर्वात् ब्रूगेराः प्रत्ययो [भव]त्याह इति चास्यादेशो भवति ॥ स्वाहा देवतातर्पणम् ॥ ६०३ ॥

सनिक्षमिदुषेः ॥ ६०४ ॥

एभ्यो धातुभ्य आः प्रत्ययो भवति ॥ षणूयी दाने । सना नित्यम् ॥ क्षमौषि सहने । क्षमा भूः क्षान्तिश्च ॥ दुषंच् वैकृत्ये । दोषा रात्रिः ॥ ६०४ ॥

डित् ॥ ६०५ ॥

धातोर्बहुलमाः प्रत्ययो भवति स च डिद्भवति ॥ मनिंच् ज्ञाने । मा निषेधे ॥ षोंच् अन्तकर्मणि । सावसानम् ॥ अनक् प्राणने । आ स्मरणादौ ॥ प्रींङ्च् प्रीतौ । प्रा स्मयने । हनंक् हिंसागत्योः । हा विषादे ॥ वन भक्तौ । वा विकल्पे ॥

रांक् दाने । रा दीप्तिः ॥ भांक् दीप्तौ । भा । सहपूर्वः । सभा परिषत् ॥ नाम्नीति सहस्य सः ॥ ६०५ ॥

स्वरेभ्य इः ॥ ६०६ ॥

स्वरान्तेभ्यो धातुभ्य इः प्रत्ययो भवति ॥ जिं अभिभवे । यजी राजा ॥ हिंट् गतिवृद्ध्योः । हयिः कामः ॥ रुक् शब्दे । रविः सूर्यः ॥ कुंक् शब्दे । कविः काव्यकर्ता ॥ ष्टुंग्क् स्तुतौ । स्तविरुद्गाता ॥ लूग्श् छेदने । लविर्दात्रम् ॥ पूग्श् पवने । पविर्वायुर्वज्रं पवित्रं च ॥ भू सत्तायाम् । भविः सत्ता चन्द्रो विधिश्च ॥ ऋंक् गतौ । अरिः शत्रुः ॥ हृंग् हरणे । हरिरिन्द्रो विष्णुश्चन्दनं मर्कटादिश्च । हरयः शक्राश्वाः ॥ डुडुभृंग्क् पोषणे च । भारिर्वसुधा ॥ सृं गतौ । सरिर्मेघः ॥ पॄश् पालनपूरणयोः । परिर्भूमिः ॥ तॄ प्लवनतरणयोः । तरिर्नौः ॥ दॄश् विदारणे । दरिर्महाभिदा ॥ मॄश् हिंसायाम् । ण्यन्तः । मारिरशिवम् ॥ वॄग्श् वरणे । वरिर्विष्णुः । ण्यन्तात् । वारिर्हस्तिवन्धनम् । वारि जलम् ॥ ६०६ ॥

पदिपठिपचिस्थलिहलिकलिवलिवल्लिवह्लिपल्लिकटिचटिवटिवधिगाध्यर्चिवन्दिनन्द्यविवशिवाशिकाशिछर्दितन्त्रिमन्त्रिखण्डिमण्डिचण्डियत्यञ्जिमस्यसिवनिध्वनिसनिगमितमिग्रन्थिश्रन्थिजनिमण्यादिभ्यः ॥ ६०७ ॥

एभ्य इः प्रत्ययो भवति ॥ पदिंच् गतौ । पदी राशिर्मोक्षमार्गश्च ॥ पठ व्यक्तायां वाचि । पठिर्विद्वान् ॥ डुपचींष् पाके । पचिरग्निः ॥ ष्ठल स्थाने । स्थलिर्दानशाला ॥ हल विलेखने । हलिर्हलः ॥ कलि शब्दसंख्यानयोः । कलिः कलहो युगं च ॥ वल प्राणनधान्यावरोधयोः । वलिर्दैवतोपहारो दानवश्च ॥ वल्लि वह्लि संवरणे । वलिस्त्वक्तरंगः । वह्लिर्हिरण्यशलाका लता च ॥ पल्ल गतौ । पल्लिर्मुनीनामाश्रमो व्याधसंस्त्यायश्च ॥ कटे वर्षावरणयोः । कटिः स्वाङ्गम् ॥ चटण् भेदे । चटिर्वर्णः ॥ वट वेष्टने । वटिर्गुलिका तन्तुः शूना च नाभिर्वर्णश्च ॥ वधि वन्धने । वधिः क्रियाशब्दः ॥ गाधृङ् प्रतिष्ठालिप्साग्रन्थेषु । गाधिर्विश्वामित्रपिता ॥ अर्च पूजायाम् । अर्चिरग्निशिखा ॥ वदुङ् स्तुत्यभिवादनयोः । वन्दिर्ग्रहणिः ॥ टुनदु समृद्धौ । नन्दिरीश्वरः प्रतीहारो भेरिश्च ॥ अव रक्षणादौ । आविर्गायुः ॥ वशक् कान्तौ । वशिर्वशिता ॥ वाशिच् शब्दे । वाशिः कान्ती रश्मिर्गोमायुरग्निः शब्दः प्रजननप्राप्ता चतुष्पाज्जलदश्च ॥ काशृङ् दीप्तौ । काशयो जनपदः ॥ छर्दण् वमने । छर्दिर्वमनम् ॥ तन्त्रिण् कुटुम्बधारणे । तन्त्रिर्वीणासूत्रम् ॥

मन्त्रिण् गुप्तभाषणे। मन्त्रिः सचिवः॥ खडुण् भेदे। खण्डिः प्रद्वारम्॥ मडु भूषायाम्। मण्डिर्मूर्द्धाजनपिधानम्॥ चडुङ् कोपे। चण्डिर्भामिनी॥ यतैङ् प्रयत्ने। यतिर्भिक्षुः॥ अञ्जौप् व्यक्तिम्रक्षणगतिषु। अञ्जिः सज्जः पेषणी पेजो गतिश्च। समञ्जिः शिश्नः॥ मसैच् परिणामे। मसिः शल्ली॥ असूच् क्षेपणे। असिः खड्गः॥ वनूयी याचने। वनिः साधुर्याच्ञा शकुनिरग्निश्च॥ ध्वन शब्दे। ध्वनिर्नादः॥ षन भक्तौ। सनिः संभक्ता पन्था दानं म्लेच्छो नदीतटं च॥ गमॢ गतौ। गमिराचार्यः॥ तमूच् काङ्क्षायाम्। तमिरलसः॥ ग्रन्थश् संदर्भे। श्रन्थश् मोचनप्रतिहर्षणयोः। ग्रन्थिः श्रन्थिश्च पर्वसंध्यादि॥ जनैचि प्रादुर्भावे। जनिर्वधूः कुलाङ्गना भगिनी प्रादुर्भावश्च॥ मण शब्दे। मणी रत्नम्॥ आदिग्रहणात् वर्हीं प्रापणे। वर्हिरश्वः॥ खादृ भक्षणे। खादिः श्वा॥ दधि धारणे। दधि क्षीरविकारः॥ खल संचये च। खलिः पिण्याकः॥ शचि व्यक्तायां वाचि। शचीन्द्राणी। इतोऽत्यर्थादिति गौरादित्वाद्वा ङीः॥ इत्यादयोऽपि भवन्ति॥६०७॥

किलिपिलिपिशिचिटित्रुटिशुण्ठितुण्डिकुण्डिभण्डिहुण्डिहिण्डिपिण्डि-चुल्लिबुधिमिथिरुहिदिविकीर्त्यादिभ्यः॥६०८॥

एभ्य इः प्रत्ययो भवति॥ किलत् श्वैत्यक्रीडनयोः। केलिः क्रीडा॥ पिलण् क्षेपे। पेलिः क्षुद्रपेला॥ पिशत् अवयवे। पेशिर्मांसखण्डम्॥ चिट प्रेष्ये। चेटिर्दारिका प्रेष्या च॥ त्रुटत् छेदने। ण्यन्तः। त्रोटिश्चञ्चुः॥ शुठु शोषणे। शुण्ठिर्विश्वभेषजम्॥ तुडुङ् तोडने। तुण्डिरास्यं प्रवृद्धा च नाभिः॥ कुडुङ् दाहे। कुण्डिर्जलभाजनम्॥ भडुङ् परिभाषणे। भण्डिः शकटम्॥ हुडुङ् संघाते। हुण्डिः पिण्डित ओदनः॥ हिडुङ् गतौ च। हिण्डी रात्रौ रक्षाचारः॥ पिडुङ् संघाते। पिण्डिर्निष्पीडितस्नेहपिण्डः॥ चुल्ल हावकरणे। चुल्ली रन्धनस्थानम्॥ बुधिंच् ज्ञाने। बोधिः सम्यग्ज्ञानम्॥ मिथृग् मेधाहिंसयोः। मेथिः खलमध्यस्थूणा॥ रुहं जन्मनि। रोहिः सस्यं जन्म च॥ दिवूच् क्रीडादौ। देविर्भूमिः॥ कृतण् संशब्दने। णिजन्तः। कीर्तिर्यशः॥ आदिग्रहणादन्येऽपि॥६०८॥

नाम्युपान्त्यकृगॄशॄपॄपूङ्भ्यः कित्॥ ६०९॥

नाम्युपान्त्येभ्यः कादिभ्यश्च किदिः प्रत्ययो भवति॥ लिखत् अक्षरविन्यासे। लिखिः शिल्पम्॥ शुच शोके। शुचिः पूतो विद्वान्धर्म आषाढश्च॥ रुचि अभिप्रीत्यां च। रुचिर्दीप्तिरभिलाषश्च॥ भुजंप् पालनाभ्यवहारयोः। भुजिरग्नी

राजा कुटिलं च ॥ कुणत् शब्दोपकरणयोः । कुणिर्विकलो हस्तो हस्तविकलश्च ॥ सृजंत् विसर्गे । सृजिः पन्थाः ॥ द्युति दीप्तौ । द्युतिर्दीप्तिः ॥ ऋत घृणागतिस्पर्धेषु । ऋतिर्यतिः ॥ छिदूंपी द्वैधीकरणे । छिदिश्छेत्ता परशुश्च ॥ मुदि हर्षे । मुदिर्बालः ॥ भिदूंपी विदारणे । भिदिर्वज्रं सूचको भेत्ता च ॥ ऊछूदूपी दीप्तिदेवनयोः । छृदी रथकारः ॥ लिपींत् उपदेहे । लिपिरक्षरजातिः ॥ तुर त्वरणे सौत्रः । तुरिस्तन्तुवायोपकरणम् ॥ दुलण् उत्क्षेपे । दुलिः कच्छपः ॥ त्विषीं दीप्तौ । त्विषिर्दीप्तिस्त्विषिमान्राजवर्चस्वी च ॥ कृषींत् विलेखने । कृषिः कर्षणं कर्षणभूमिश्च ॥ ऋषैत् गतौ । ऋषिर्मुनिर्वेदश्च ॥ कुषश् निष्कर्षे । कुषिः शुषिरम् ॥ शुषंच् शोषणे । शुषिश्छिद्रं शोषणं च ॥ हृषू अलीके । हृषिरलीकवादी दीप्तिस्तुष्टिश्च ॥ ष्णुहौच् उद्गिरणे । स्नुहिर्वृक्षः ॥ कॄत् विक्षेपे । किरिः शूकरो मूषिको गन्धर्वो गर्तश्च ॥ गॄत् निगरणे । गिरिर्नगः कन्दुकश्च ॥ शॄश् हिंसायाम् । शिरिर्हिंस्रः शोकः खड्गः पाषाणश्च ॥ पॄश् पालनपूरणयोः । पुरिर्नगरं राजा पूरयिता च ॥ पूङ् पवने । पुविर्वातः ॥ ६०९ ॥

विदिवृतेर्वा ॥ ६१० ॥

आभ्यामिः प्रत्ययो भवति स च किद्वा भवति ॥ विदक् ज्ञाने । विदिः शिल्पी । वेदिरिज्यादिस्थानम् ॥ वृतूङ् वर्तने । वृतिः कण्टकशाखावरणम् । निर्वृतिः सुखम् । वर्तिर्द्रव्यं दीपाङ्गं च ॥ ६१० ॥

तॄभ्रम्यव्यापिदम्भिभ्यस्तित्तिरभृमाधापदेभाश्च ॥ ६११ ॥

एभ्यः किदिः प्रत्ययो [भव]त्येषां च यथासंख्यं तित्तिर भृम अध अप देभ इत्यादेशा भवन्ति ॥ तॄ प्लवनतरणयोः । तित्तिरिः शकुनिजातिः प्रवक्ता च वेदशाखायाः ॥ भ्रमू चलने । भृमिर्वायुर्हस्ती जलं च । बाहुलकाद्भृमादेशाभावे । भ्रमिर्भ्रमः ॥ अदं प्सांक् भक्षणे । अध्युपरिभावे । अध्यागच्छति ॥ आप्लृंट् व्याप्तौ । अपि समुच्चयादौ । प्लक्षोपि न्यग्रोधोपि ॥ दम्भूट् दम्भे । देभिः शरासनम् ॥ ६११ ॥

मनेरुदेतौ चास्य वा ॥ ६१२ ॥

मनिंच् ज्ञाने । इत्यस्मादिः प्रत्ययो [भव]त्यकारस्य च उकार-एकारौ वा भवतः ॥ मुनिर्ज्ञानवान् ॥ मेनिः संकल्पः ॥ मनिर्धूमवर्तिः ॥ ६१२ ॥

कमितमिस्तम्भेरिच्च नमेस्तु वा ॥ ६१३ ॥

एभ्यः किदिः प्रत्ययो [भव]त्यकारस्य च इकारो भवति नमेः पुनरकारस्य

विकल्पेन इकारः ॥ क्रमू पादविक्षेपे। क्रिमिः क्षुद्रजन्तुः ॥ तमूच् काङ्क्षायाम्। तिमिर्महामत्स्यः ॥ स्तम्भिः सौत्रः । स्तिम्भिः केतकादिसूची हृदयं समुद्रश्च ॥ णमं प्रह्वत्वे । निमी राजा । नमिर्विद्याधराणामाद्यस्तीर्थकरश्च ॥ ६१३ ॥

अम्भिकुण्ठिकम्प्यंहिभ्यो नलुक् च ॥ ६१४ ॥

एभ्य इः प्रत्ययो [भवति] नकारस्य च लुग्भवति ॥ अभुङ् शब्दे। अभ्याभिमुख्येऽव्ययम्। अभ्यग्नि शलभाः पतन्ति ॥ कुठु आलस्ये च। कुठिर्वृक्षः पापं वृषलो देहो गेहं कुठारश्च ॥ कपुङ् चलने। कपिरग्निर्वानरश्च ॥ अहुङ् गतौ। अहिः सर्पो वृत्रो वप्रश्च ॥ ६१४ ॥

उभेर्द्वत्रौ च ॥ ६१५ ॥

उभत् पूरणे। इत्यस्मादिः प्रत्ययो भवत्यस्य च द्वत्रावित्यादेशौ भवतः ॥ द्वौ द्वितीयो द्विमुनि व्याकरणस्य ॥ त्रयस्तृतीयस्त्रिमुनि व्याकरणस्य ॥ ६१५ ॥

नीवीप्रहृभ्यो डित् ॥ ६१६ ॥

एभ्यो डिदिः प्रत्ययो भवति ॥ णींग् प्रापणे। निर्वसति ॥ वींक् प्रजननादौ। विस्तन्तुवायः पक्ष्युपसर्गश्च ॥ यथा विभवति ॥ हृंग् हरणे। प्रपूर्वः। प्रहिः कूप उदपानं च ॥ ६१६ ॥

वौ रिचेः स्वरान्नोन्तश्च ॥ ६१७ ॥

व्युपसर्गे सति रिचूंपी विरेचने। इत्यस्मादिः प्रत्ययो [भवति] स्वरात्परो नोन्तश्च भवति ॥ विरिञ्चिर्ब्रह्मा ॥ ६१७ ॥

कमिवमिजमिघसिशलिफलितलितडिवजिव्रजिध्वजिराजिपणिवणिवदि-
सदिहदिहनिसहिवहितपिवपिभटिकञ्चिसंपतिभ्यो
णित् ॥ ६१८ ॥

एभ्यो णिदिः प्रत्ययो भवति ॥ कमूङ् कान्तौ। कामिर्वस्तुकः कामी च ॥ टुवमू उद्गिरणे। वामिः स्त्री ॥ जमू अदने। जामिर्भगिनी तृणं जनपदश्चैकः ॥ घस्लृं अदने। घासिः संग्रामो गर्तोऽग्निर्बहुभुक् च ॥ शल गतौ। शालिर्व्रीहिराजः ॥ फल निष्पत्तौ। फालिर्दलम् ॥ तलण् प्रतिष्ठायाम्। तालिर्वृक्षजातिः ॥ तडण् आघाते। ताडिः स एव ॥ वज व्रज ध्वज गतौ। वाजिरश्वः पुङ्खावसानं च ॥ व्राजिः पद्धतिः पिटकजातिश्च ॥ ध्वाजिः पताकाश्वश्च ॥ राजृग् दीप्तौ। राजिः पङ्क्तिर्लेखा च ॥ पणि व्यवहारस्तुत्योः। पाणिः करः ॥ वण शब्दे। वाणिर्वाक्।

ह्याम् । वाणी ॥ वद व्यक्तायां वाचि । वादिर्वाग्मी वीणा च ॥ षद्लृं विशरणगत्यवसादनेषु । सादिरश्वारोहः सारथिश्च ॥ हादें पुरीषोत्सर्गे । हादिर्लूता ॥ हनंक् हिंसागत्योः । घातिः प्रहरणम् । केचित्तु हानिरर्थनाश उच्छित्तिश्चेत्युदाहरन्ति । तत्र बाहुलकात् ञ्णिति घादिति घात्र भवति । बाहुलकादेव णित्त्वविकल्पे । हनिरायुधम् ॥ षहि मर्षणे । साहिः शैलः ॥ वहीं प्रापणे । वाहिरनड्वान् ॥ तपं संतापे । तापिर्दानवः ॥ डुवपीं बीजसंताने । वापिः पुष्करिणी ॥ भट भृतौ । भाटिः सुरतमूल्यम् ॥ कचुङ् दीप्तौ । काञ्चिर्मेखला पुरी च । णित्करणादनुपान्त्यस्यापि वृद्धिः ॥ पत्लृ गतौ । सम्पूर्वात् । संपातिः पक्षिराजः ॥ ६१८ ॥

कृशॄकुटिग्रहिखन्यणिकष्यलिपलिचरिवसिगण्डिभ्यो वा ॥ ६१९ ॥

एभ्य इः प्रत्ययो [भवति] स च णिद्वा भवति ॥ डुकृंग् करणे । कारिः शिल्पी । करिर्हस्ती विष्णुश्च ॥ शॄश् हिंसायाम् । शारिर्द्यूतोपकरणं हस्तिपर्याणं शारिका च । शरिर्हिंसा शूलश्च ॥ कुटत् कौटिल्ये । कोटिरश्रिरग्रभागोऽष्टमं चाङ्कस्थानम् । कुटिर्गृहं शरीराङ्गं च ॥ ग्रहीश् उपादाने । ग्राहिः पतिः । ग्रहिर्वेणुः ॥ खनूग् अवदारणे । खानिः खनिश्च निधिराकरस्तडागं च ॥ अण शब्दे । आणिरणिश्च द्वारकीलिका ॥ कष हिंसायाम् । काषिः कर्षकः । कषिर्निकषोपलः काष्ठमश्वकर्णः खनित्रं च ॥ अली भूषणादौ । आलिः पङ्क्तिः सखी च । अलिर्भ्रमरः ॥ पल गतौ । पालिर्जलसेतुः कर्णपर्यन्तश्च । पलिः संस्त्यायः ॥ चर भक्षणे च । चारिः पशूनां भक्ष्यम् । चरिः प्राकारशिखरं विषयो वायुः पशुः केशोर्णा च ॥ वसं निवासे । वासिस्तक्षोपकरणम् । वसिः शय्याग्निर्गृहं रात्रिश्च ॥ गडु वदनैकदेशे । गण्डिर्गण्डिका । णित्त्वपक्षेऽनुपान्त्यस्यापि वृद्धौ । गाण्डिर्धनुष्पर्व ॥ ६१९ ॥

पादाच्चात्यजिभ्याम् ॥ ६२० ॥

पादशब्दपूर्वाभ्यां केवलाभ्यां चात्यजिभ्यां णिदिः प्रत्ययो भवति ॥ अत सातत्यगमने । अज क्षेपणे च । पादाभ्यामततीति । अजतीति वा । पदातिः । पदाजिः । पदः पादस्याज्यातिगोपहत इति पदभावः । उभावपि पत्तिवाचिनौ ॥ आतिः पक्षी । सुपूर्वात् । स्वातिर्वायव्यनक्षत्रम् ॥ आजिः संग्रामः स्पर्धावधिश्च ॥ ॥ ६२० ॥

नहेर्भ च ॥ ६२१ ॥

णहींच् बन्धने । इत्यस्माण्णिदिः प्रत्ययो भवति भकारश्चान्तादेशो भवति ॥ नाभिरन्त्यकुलकरश्चक्रमध्यं शरीरावयवश्च ॥ ६२१ ॥

अशो रश्चादिः ॥ ६२२ ॥

अशौटि व्याप्तौ। इत्यस्माण्णिदिः प्रत्ययो [भवति] रेफश्च धातोरादिर्भवति ॥ राशिः समूहो नक्षत्रपादनवकरूपश्च मेषादिः ॥ ६२२ ॥

कायः किरिच्च वा ॥ ६२३ ॥

कैं शब्दे। इत्यस्मात्किः प्रत्ययो [भवति] इकारश्चान्तादेशो वा भवति ॥ किकिः पक्षी विद्वांश्च ॥ काकिः स्वरदोषः ॥ ६२३ ॥

वर्धेरकिः ॥ ६२४ ॥

वर्धण् छेदनपूरणयोः। इत्यस्मादकिः प्रत्ययो भवति ॥ वर्धकिस्तक्षा॥६२४॥

सनेर्डखिः ॥ ६२५ ॥

षणूयी दाने। इत्यस्माड्डिदखिः प्रत्ययो भवति ॥ सखा मित्रम्। सखायौ। सखायः ॥ ६२५ ॥

कोर्डिखिः ॥ ६२६ ॥

कुंक् शब्दे। इत्यस्माड्डिदिखिः प्रत्ययो भवति ॥ किखिर्लोमसिका॥६२६॥

मृश्विकण्यणिदध्यविभ्य ईचिः ॥ ६२७ ॥

एभ्य ईचिः प्रत्ययो भवति ॥ मृंत् प्राणत्यागे । मरीचिर्मुनिर्मयूखश्च ॥ ट्वोश्वि गतिवृद्ध्योः। श्वयीचिश्चन्द्रः श्वयथुश्च ॥ कण अण शब्दे। कणीचिः प्राणी लता चक्षुः शकटं शङ्खश्च ॥ अणीचिर्वेणुः शाकटिकश्च ॥ दधि धारणे। दधीची राजर्षिः ॥ अव रक्षणादौ। अवीचिर्नरकविशेषः ॥ ६२७ ॥

वेगो डित् ॥ ६२८ ॥

वेंग् तन्तुसंताने। इत्यस्माड्डिदीचिः प्रत्ययो भवति ॥ वीचिरूर्मिः ॥६२८॥

वणेर्णित् ॥ ६२९ ॥

वण शब्दे। इत्यस्माण्णिदीचिः प्रत्ययो भवति ॥ वाणीचिश्छाया व्याधिश्च ॥ ६२९ ॥

कृपिशकिभ्यामटिः ॥ ६३० ॥

आभ्यामटिः प्रत्ययो भवति ॥ कृपौङ् सामर्थ्ये। कर्पटिः निःस्वः ॥ शक्लृट् शक्तौ। शकटिः शकटम् ॥ ६३० ॥

श्रेर्ढिः ॥ ६३१ ॥

श्रिग् सेवायाम्। इत्यस्माड्ढिः प्रत्ययो भवति ॥ श्रेढिर्गणितव्यवहारः ॥६३१॥

चमेरुच्चातः ॥ ६३२ ॥

चमू अदने । इत्यस्माड्डिः प्रत्ययो भवत्यकारस्य उकारो भवति ॥ चुण्ढिः क्षुद्रवापी ॥ ६३२ ॥

मुपेरुण् चान्तः ॥ ६३३ ॥

मुपश् स्तेये । इत्यस्माड्डिः प्रत्ययो [भव]त्युण् चान्तो भवति ॥ मुपुण्डिः प्रहरणम् । उणो न गुणो विधानसामर्थ्यात् ॥ ६३३ ॥

कावावीक्रीश्रिश्रुक्षुज्वरितूरिचूरिपूरिभ्यो णिः ॥ ६३४ ॥

एभ्यो णिः प्रत्ययो भवति ॥ कैं शब्दे । काणिर्विलक्ष्यानुसर्पणम् ॥ वेंग् तन्तुसंताने । वाणिर्व्यूतिः ॥ वींक् प्रजननादौ । वेणिः कवरी ॥ डुक्रींग्श् द्रव्यविनिमये । क्रेणिः क्रयविशेषः ॥ श्रिग् सेवायाम् । श्रेणिः पङ्क्तिर्बलविशेषश्च । श्रेणयोष्टादश गणविशेषाः । निपूर्वात् । निश्रेणिः संक्रमः ॥ श्रुंट् श्रवणे । श्रोणिर्जघनम् ॥ टुक्षुक् शब्दे । क्षोणिः पृथिवी ॥ ज्वर रोगे । जूर्णिर्ज्वरो वायुरादित्योग्निः शरीरं ब्रह्मा पुराणश्च ॥ तूरैचि त्वरायाम् । तूर्णिस्त्वरा मनः शीघ्रश्च ॥ चूरैचि दाहे । चूर्णिर्वृत्तिः ॥ पूरैचि आप्यायने । पूर्णिः पूरः ॥ ६३४ ॥

ऋत्घृसृकुवृषिभ्यः कित् ॥ ६३५ ॥

ऋकारान्तेभ्यो घृ इत्यादिभ्यश्च किण्णिः प्रत्ययो भवति ॥ शॄश् हिंसायाम् । शीर्णी रोगोवयवश्च ॥ स्तॄग्श् आच्छादने । स्तीर्णिः संस्तरः ॥ घृं सेचने । घृणी रश्मिर्ज्वाला निदाघश्च ॥ सृं गतौ । सृणिरादित्यो वज्रमनिलोङ्कुशोग्निश्च ॥ कुंक् शब्दे । कुणिर्विकलो हस्तो हस्तविकलश्च ॥ वृषू सेचने । वृष्णिर्वस्नो मेषो यदुविशेषश्च । पर्षतेरपीच्छन्त्येके । पृष्णी रश्मिः ॥ ६३५ ॥

पृषिहृषिभ्यां वृद्धिश्च ॥ ६३६ ॥

आभ्यां णिः प्रत्ययो [भव]त्यनयोश्च वृद्धिर्भवति ॥ पृषू सेचने । पार्ष्णिः पादपश्चाद्भागः पृष्ठप्रदेशश्च ॥ हृषच् तुष्टौ । हार्ष्णिर्हरणम् ॥ ६३६ ॥

ह्रूर्णिधूर्णिभूर्णिघूर्ण्यादयः ॥ ६३७ ॥

एते णिप्रत्ययान्ता निपात्यन्ते ॥ हृंग् हरणे । धृंग् धारणे । भू सत्तायाम् । घृं सेचने । ऊत्वं रश्चान्तो निपात्यते ॥ ह्रूर्णि कुल्या ॥ धूर्णिर्धृतिः ॥ भूर्णिश्चेतनं भूमिः कालश्च ॥ घूर्णिर्भ्रमः ॥ आदिग्रहणादन्येपि ॥ ६३७ ॥

ऋहसृमृधृभृकृतृग्रहेरणिः ॥ ६३८ ॥

एभ्योऽणिः प्रत्ययो भवति ॥ ऋंक् गतौ। अरणिरग्निमथनकाष्ठम् ॥ हृंग् हरणे। हरणिः कुल्या मृत्युश्च ॥ सृं गतौ। सरणिरीषद्गतिः पन्था आदित्यः सिरा-संघातश्च ॥ मृंत् प्राणत्यागे। मरणी रात्रिः ॥ धृंग् धारणे। धरणिः क्षितिः ॥ टुडुभृंग्क् पोषणे च। भरणिर्नक्षत्रम् ॥ डुकृंग् करणे। करणिः सादृश्यम् ॥ तॄ प्लवनतरणयोः। तरणिः संक्रम आदित्यो यवागूः पतितगोरूपोत्थापनी च यष्टिः। वै दुःखार्थे। दुःखेन तीर्यत इति वैतरणी नदी ॥ ग्रहीश् उपादाने। ग्रहणिर्जठ-राग्निस्तदाधारो व्याधिर्मेढ्रं मृत्युश्च ॥ ६३८ ॥

कङ्केरिच्चास्य वा ॥ ६३९ ॥

ककुङ् गतौ। इत्यस्मादणिः प्रत्ययो [भवति] धातोरकारस्य च इकारो वा भवति ॥ कङ्कणिः कङ्कणम् ॥ किङ्कणिर्घण्टा ॥ ६३९ ॥

ककेर्णित् ॥ ६४० ॥

ककि लौल्ये। इत्यस्माण्णिदणिः प्रत्ययो भवति ॥ काकणिर्मानविशेषः ॥ ६४० ॥

कृषेश्च चादेः ॥ ६४१ ॥

कृषींत् विलेखने। इत्यस्मादणिः प्रत्ययो [भव]त्यादेश्च चकारो भवति ॥ चर्षणिश्चमूरग्निर्बुद्धिर्व्यवसायो वेश्या वृषश्च ॥ ६४१ ॥

क्षिपेः कित् ॥ ६४२ ॥

क्षिपींत् प्रेरणे। इत्यस्मात्किदणिः प्रत्ययो भवति ॥ क्षिपणिरायुधं वडिश-बन्धकश्चर्मकृता पाषाणसर्जनी च ॥ ६४२ ॥

आङः कृहृशुषेः सनः ॥ ६४३ ॥

आङः परेभ्यो डुकृंग् करणे। हृंग् हरणे। शुषंच् शोषणे। इत्येतेभ्यः सन्नन्तेभ्योऽणिः प्रत्ययो भवति ॥ आचिकीर्षणिर्व्यवसायः ॥ आजिहीर्षणिः श्रीः ॥ आशुशुक्षणिरग्निर्वायुश्च ॥ ६४३ ॥

वारिसर्त्यादेरिणिक् ॥ ६४४ ॥

एभ्यः किदिणिः प्रत्ययो भवति ॥ वृग्ट् वरणे। ण्यन्तः। वारिणिः पशुः पशुवृत्तिश्च ॥ सृं गतौ। सिणिरग्निर्वज्रं च ॥ आदिग्रहणादन्येऽपि ॥ ६४४ ॥

अदेस्त्रीणिः ॥ ६४५ ॥

अदंक् भक्षणे । इत्यस्मात्त्रीणिः प्रत्ययो भवति ॥ अत्त्रीणिः कृमिजातिः ॥ ६४५ ॥

ग्लुज्ञायाजिषपिपदिवसिवितसिभ्यस्तिः ॥ ६४६ ॥

एभ्यस्तिः प्रत्ययो भवति ॥ ग्लुङ् गतौ । ग्लोतिर्धीरम् ॥ ज्ञांश् अवबोधने । ज्ञायते त्रैलोक्यस्य त्रातेति ज्ञातिरिक्ष्वाकुर्वृषभः स्वजनश्च ॥ यजीं देवपूजादौ । यष्टिर्दण्डो लता च ॥ षप समवाये । सप्तिरश्वः ॥ पदिंच् गतौ । पत्तिः पदातिः ॥ वसं निवासे । वस्तिः सूत्राधारश्चर्मपुटः स्नेहनोपकरणं च ॥ तसूच् उपक्षये । विपूर्वः । वितस्तिरर्धहस्तः ॥ ६४६ ॥

प्रथेर्लुक् च वा ॥ ६४७ ॥

प्रथिष् प्रख्याने । इत्यस्मात्तिः प्रत्ययो [भव] त्यन्तस्य च लुग्वा भवति ॥ वृक्षं प्रति विद्योतते । प्रतिष्ठितः ॥ पक्षे । प्रत्तिः प्रथनं भागश्च ॥ ६४७ ॥

कोर्यषादिः ॥ ६४८ ॥

कुंक् शब्दे । इत्यस्माद्यषादिस्तिः प्रत्ययो भवति ॥ कोयष्टिः पक्षिविशेषः ॥ ६४८ ॥

ग्रो गृष् च ॥ ६४९ ॥

गृत् निगरणे । इत्यस्मात्तिः प्रत्ययो [भव] त्यस्य च गृष् इत्यादेशो भवति ॥ गृष्टिः सकृत्प्रसूता गौः ॥ ६४९ ॥

सोरस्तेः शित् ॥ ६५० ॥

सुपूर्वात् असक् भुवि । इत्यस्मात् शित्तिः प्रत्ययो भवति ॥ स्वस्ति कल्याणम् ॥ शित्त्वाद्भूभावाल्लुगभावः ॥ ६५० ॥

दृमुषिकृषिरिषिविषिशोशुच्यशिपूयीण्प्रभृभ्यः कित् ॥ ६५१ ॥

एभ्यः कित्तिः प्रत्ययो भवति ॥ दृंङ्त् आदरे । दृतिश्छागादित्वग्मयो जलाधारः ॥ मुषश् स्तेये । मुष्टिरङ्गुलिसंनिवेशविशेषः ॥ कृषींत् विलेखने । कृष्टिः पण्डितः ॥ रिष हिंसायाम् । रिष्टिः प्रहरणम् ॥ विप्लृंकी व्याप्तौ । विष्टिरचेतनकर्मकरः ॥ शोंच् तक्षणे । शितिः कृष्णः कृशश्च ॥ शुच शोके । शुक्तिः मुक्तादिः ॥ अशौटि व्याप्तौ । अष्टिश्छन्दोविशेषः ॥ पूयैङ् दुर्गन्धविशरणयोः । पूतिर्दुर्गन्धो दुष्टं तृणजातिश्च ॥ इणक् गतौ । इति हेत्यादौ ॥ डुडुभृंग्क् पोषणे च । प्रपूर्वः । प्रभृतिरादिः ॥ ६५१ ॥

कुच्योर्नोन्तश्च ॥ ६५२ ॥

आभ्यां क्तिः प्रत्ययो भवति नकारश्चान्तो भवति ॥ कुंङ् शब्दे । कुन्ती राजा । कुन्तयो जनपदः ॥ चिंग्ट् चयने । चिन्ती राजा ॥ ६५२ ॥

खल्यमिरमिवहिवस्यर्तेरतिः ॥ ६५३ ॥

एभ्योऽतिः प्रत्ययो भवति ॥ खल संचये च । खलतिः खल्वाटः ॥ अम गतौ । अमतिश्चातकश्छागः प्रावृण्मार्गो व्याधिर्गतिश्च ॥ रमिं क्रीडायाम् । रमतिः क्रीडा कामः स्वर्गः सभा च ॥ वहीं प्रापणे । वहतिर्गौर्वायुरमात्योपत्यं कुटुम्बं च ॥ वसं निवासे । वसतिर्निवासो ग्रामसंनिवेशश्च ॥ ऋक् गतौ । अरतिर्वायुः सरणमसुखं क्रोधो वर्म च ॥ ६५३ ॥

हन्तेरंह च ॥ ६५४ ॥

हनंक् हिंसागत्योः । इत्यस्मादतिः प्रत्ययो [भव]त्यस्य च अंह इत्यादेशो भवति ॥ अंहतिर्व्याधिः पन्थाः कालो रथश्च ॥ ६५४ ॥

वृगो व्रत च ॥ ६५५ ॥

वृग्ट् वरणे । इत्यस्मादतिःप्रत्ययो [भव] त्यस्य च व्रत इत्यादेशो भवति ॥ व्रततिर्वल्ली ॥ ६५५ ॥

अञ्चेः क च वा ॥ ६५६ ॥

अञ्चू गतौ च । इत्यस्मादतिः प्रत्ययो [भवति] ककारश्चान्तादेशो वा भवति ॥ अङ्कतिर्वायुः प्रजापतिरग्निश्च ॥ अञ्चतिरग्निः ॥ ६५६ ॥

वातेर्णिद्वा ॥ ६५७ ॥

वांक् गतिगन्धनयोः । इत्यस्मादतिः प्रत्ययो [भवति] स च णिद्वा भवति ॥ वायतिर्वातः ॥ वातिर्गन्धमिश्रपवनः ॥ ६५७ ॥

योः कित् ॥ ६५८ ॥

युक् मिश्रणे । इत्यस्मात्किदतिः प्रत्ययो भवति ॥ युवतिस्तरुणी ॥ ६५८ ॥

पातेर्वा ॥ ६५९ ॥

पांक् रक्षणे । इत्यस्मादतिः प्रत्ययो [भवति] स च किद्वा भवति ॥ पतिर्भर्ता ॥ पातिर्भर्ता रक्षिता प्रभुश्च ॥ ६५९ ॥

अगिविलिपुलिक्षिपेरस्तिक् ॥ ६६० ॥

एभ्यः किदस्तिः प्रत्ययो भवति ॥ अग कुटिलायां गतौ । अगस्तिः ॥

त्रिलत् वरणे । विलस्तिः ॥ पुल महत्त्वे । पुलस्तिः ॥ क्षिपींत् प्रेरणे । क्षिपस्तिः ॥ एते लौकिका ऋषयः । अगस्तिर्वृक्षजातिश्च ॥ ६६० ॥

गृधेर्गभ च ॥ ६६१ ॥

गृधूच् अभिकाङ्क्षायाम् । इत्यस्मादस्तिक् प्रत्ययो भवति गभ चास्यादेशो भवति ॥ गभस्ती रश्मिः ॥ ६६१ ॥

वस्यर्तिभ्यामातिः ॥ ६६२ ॥

आभ्यामातिः प्रत्ययो भवति ॥ वसं निवासे । वसातयो जनपदः ॥ ऋक् गतौ । अरातिः शत्रुः ॥ ६६२ ॥

अभेर्यामाभ्याम् ॥ ६६३ ॥

अभिपूर्वाभ्यामाभ्यामातिः प्रत्ययो भवति ॥ यांक् प्रापणे । मांक् माने । अभियातिरभिमातिश्च शत्रुः ॥ ६६३ ॥

यजो य च ॥ ६६४ ॥

यजीं देवपूजादौ । इत्यस्मादातिः प्रत्ययो[भवति] यकारश्चान्तादेशो भवति ॥ ययाती राजा ॥ ६६४ ॥

वद्यविछदिभूभ्योन्तिः ॥ ६६५ ॥

एभ्योन्तिः प्रत्ययो भवति ॥ वद व्यक्तायां वाचि । वदन्तिः कथा ॥ अव रक्षणादिषु । अवन्ती राजा । अवन्तयो जनपदः ॥ छदण् अपवारणे । युजादिविकल्पितणिजन्तत्वादण्यन्तः । छदन्तिर्गृहाच्छादनद्रव्यम् ॥ भू सत्तायाम् । भवन्तिः कालो लोकस्थितिश्च ॥ ६६५ ॥

शकेरुन्तिः ॥ ६६६ ॥

शक्लृट् शक्तौ । इत्यस्मादुन्तिः प्रत्ययो भवति ॥ शकुन्तिः पक्षी ॥ ६६६ ॥

नञो दागो डितिः ॥ ६६७ ॥

नञ्पूर्वात् डुदांग्क् दाने । इत्यस्माड्डिदितिः प्रत्ययो भवति ॥ अदितिर्देवमाता ॥ ६६७ ॥

देङः ॥ ६६८ ॥

देङ् पालने । इत्यस्माड्डिदितिः प्रत्ययो भवति ॥ दितिरसुरमाता॥६६८॥

वीसञ्ज्यसिभ्यस्थिक् ॥ ६६९ ॥

एभ्यस्थिक् प्रत्ययो भवति ॥ वींक् प्रजननादिषु । वीथिर्मार्गः ॥ षञ्जं सङ्गे । सक्थिरूरुः शकटाङ्गं च ॥ असूच् क्षेपणे । अस्थि पञ्चमो धातुः ॥६६९॥

सारेरथिः ॥ ६७० ॥

सृ गतौ । इत्यस्माण्ण्यन्तादथिः प्रत्ययो भवति ॥ सारथिर्यन्ता ॥६७०॥

निषञ्जेरथित् ॥ ६७१ ॥

निपूर्वात् षञ्जं सङ्गे । इत्यस्माद्विदथिः प्रत्ययो भवति ॥ निषङ्गथी रुद्रो धनुर्धरश्च ॥ थित्करणं गत्वार्थम् ॥ ६७१ ॥

उदर्तेर्णिद्वा ॥ ६७२ ॥

उत्पूर्वात् ऋक् गतौ । इत्यस्मादथिः प्रत्ययो [भवति] स च णिद्वा भवति ॥ उदारथिर्विष्णुः ॥ उदरथिर्विप्रः काष्ठं समुद्रोनड्वांश्च ॥ ६७२ ॥

अतेरिथिः ॥ ६७३ ॥

अत सातत्यगमने । इत्यस्मादिथिः प्रत्ययो भवति ॥ अतिथिः पात्रतमो भिक्षावृत्तिः ॥ ६७३ ॥

तनेर्डित् ॥ ६७४ ॥

तनूयी विस्तारे । इत्यस्माड्डिदिथिः प्रत्ययो भवति ॥ तिथिः प्रतिपदादिः॥६७४॥

उषेरधिः ॥ ६७५ ॥

उषू दाहे । इत्यस्मादधिः प्रत्ययो भवति ॥ ओषधिरुद्भिद्विशेषः ॥६७५॥

विदो रधिक् ॥ ६७६ ॥

विदक् ज्ञाने । इत्यस्मात्किद्रधिः प्रत्ययो भवति ॥ विद्रधिर्व्याधिविशेषः ॥ ६७६ ॥

वीयुसुवह्यगिभ्यो निः ॥ ६७७ ॥

एभ्यो निः प्रत्ययो भवति ॥ वींक् प्रजननादौ । वेनिर्व्याधिर्नदी च ॥ युक् मिश्रणे । योनिः प्रजननमङ्गमुत्पत्तिस्थानं च ॥ षुंगट् अभिषवे । सोनिः सवनम् ॥ वहीं प्रापणे । वह्निः पावको बलीवर्दश्च ॥ अग कुटिलायां गतौ । अग्निःपावकः ॥ ६७७ ॥

धूशाशीङो ह्रस्वश्च ॥ ६७८ ॥

एभ्यो निः प्रत्ययो [भवति] ह्रस्वश्चैषां भवति ॥ धूगश् कम्पने । धुनिर्नदी॥ शोंच् तक्षणे । शनिः सौरिः॥ शीङ्क् स्वप्ने । शिनिर्यादवो वर्णश्च ॥६७८॥

लूधूप्रच्छिभ्यः कित् ॥ ६७९ ॥

एभ्यः किन्निः प्रत्ययो भवति ॥ लूगश् छेदने । लूनिर्लवनः ॥ धूगश् कम्पने । धूनिर्वायुः ॥ प्रछंत् ज्ञीप्सायाम् । पृश्निर्वर्णोल्पतनुः किरणः स्वर्गश्च ॥६७९॥

सदिवृत्यमिधम्यश्यटिकटयवेरनिः ॥ ६८० ॥

एभ्योऽनिः प्रत्ययो भवति ॥ षद्लृं विशरणादौ । सदनिर्जलम् ॥ वृतूङ् वर्तने । वर्तनिः पन्था देशनाम च ॥ अम गतौ । अमनिरग्निः ॥ धमः सौत्रः । धमनिर्मन्या रसवहा च सिरा ॥ अशौटि व्याप्तौ । अशनिरिन्द्रायुधम् ॥ अट गतौ । अटनिश्चापकोटिः ॥ कटे वर्षावरणयोः । कटनिः शैलमेखला ॥ अव रक्षणादौ । अवनिर्भूः ॥ ६८० ॥

रञ्जेः कित् ॥ ६८१ ॥

रञ्जीं रागे । इत्यस्मात्किदनिः प्रत्ययो भवति ॥ रजनी रात्रिः ॥६८१॥

अर्तेरत्निः ॥ ६८२ ॥

ऋक् गतौ । इत्यस्मादत्निः प्रत्ययो भवति ॥ अरत्निर्बाहुमध्यं शम उत्कनिष्टश्च हस्तः ॥ ६८२ ॥

एधेरिनिः ॥ ६८३ ॥

एधि वृद्धौ । इत्यस्मादिनिः प्रत्ययो भवति ॥ एधिनिर्मेदिनी ॥ ६८३ ॥

शकेरुनिः ॥ ६८४ ॥

शकूंट् शक्तौ । इत्यस्मादुनिः प्रत्ययो भवति ॥ शकुनिः पक्षी ॥ ६८४ ॥

अदेर्मनिः ॥ ६८५ ॥

अदं प्सांक् भक्षणे । इत्यस्मान्मनिः प्रत्ययो भवति ॥ अद्मनिः पशूनां भक्षणद्रोण्यग्निर्जयो हस्त्यश्वस्तालु च ॥ ६८५ ॥

दमेर्दुभिर्दुम् च ॥ ६८६ ॥

दमूच् उपशमे । इत्यस्मादुभिः प्रत्ययो [भव]त्यस्य च दुम् इत्यादेशो भवति ॥ दुन्दुभिर्देवतूर्यम् ॥ ६८६ ॥

नीसावृयुशॄवलिदलिभ्यो मिः ॥ ६८७ ॥

एभ्यो मिः प्रत्ययो भवति ॥ णींग् प्रापणे । नेमिश्चक्रधारा ॥ षोंच् अन्तकर्मणि । साम्यर्धवाच्यव्ययम् ॥ वृग्ट् वरणे । वर्मिर्वल्मीककृमिः ॥ युक् मिश्रणे । योमिः शकुनिः ॥ शॄश् हिंसायाम् । शर्मिर्मृगः ॥ वलि संवरणे । वल्मिरिन्द्रः समुद्रश्च ॥ दल विशरणे । दल्मिरायुधमिन्द्रः समुद्रः शक्रो विषं च॥६८७॥

अशो रश्चादिः ॥ ६८८ ॥

अशौटि व्याप्तौ । इत्यस्मान्मिः प्रत्ययो [भवति] रेफश्च धातोरादिर्भवति ॥ रश्मिः प्रग्रहो मयूखश्च ॥ ६८८ ॥

सर्तेरूच्चातः॥ ६८९ ॥

आभ्यां मिः प्रत्ययो [भवति] गुणे च कृतेकारस्य ऊकारादेशो भवति॥ सृं गतौ। सूर्मिः स्थूणा॥ ऋक् गतौ। ऊर्मिस्तरंगः॥ ६८९॥

कृभूभ्यां कित्॥ ६९०॥

आभ्यां किन्मिः प्रत्ययो भवति॥ डुकृंग् करणे। कृमिः क्षुद्रजन्तुजातिः॥ भू सत्तायाम्। भूमिर्वसुधा॥ ६९०॥

क्कणेर्डयिः॥ ६९१॥

क्कण शब्दे। इत्यस्माड्डिदयिः प्रत्ययो भवति॥ क्कयिः पक्षिविशेषः॥६९१॥

तङ्किवङ्क्यङ्किमङ्क्यंहिशाद्यदिसद्यशौवपिवशिभ्यो रिः॥ ६९२॥

एभ्यो रिः प्रत्ययो भवति॥ तकु कृच्छ्रजीवने। तङ्क्रिर्युवा॥ वकुङ् कौटिल्ये। वङ्क्रिः शल्यं परशुका रथोहः कुटिलश्च॥ अकुङ् लक्षणे। अङ्क्रिश्चिह्नं वंशकठिनिकश्च॥ मकुङ् मण्डने। मङ्क्रिर्मण्डनं शठः प्रवकश्च॥ अहुङ् गतौ। अंह्रिः पादः। अङ्घ्रिरप्येके। अघुङ् गत्याक्षेपे। अङ्घ्रिः॥ शद्लृ शातने। शद्रिर्भस्म हस्ती वज्रं गिरिर्ऋषिः शोभनश्च॥ अदं प्सांक् भक्षणे। अद्रिः पर्वतः॥ षद्लृ विशरणादौ। सद्रिर्हस्ती गिरिर्मेषश्च॥ अशौटि व्याप्तौ। अश्रिः कोटिः॥ डुवपीं बीजसंताने। वप्रिः केदारः॥ वशक् कान्तौ। वश्रिः समूहः॥ ६९२॥

भूसूकुशिविशिशुभिभ्यः कित्॥ ६९३॥

एभ्यः किद्रिः प्रत्ययो भवति॥ भू सत्तायाम्। भूरि प्रभूतं काञ्चनं च॥ षूत् प्रेरणे। सूरिराचार्यः पण्डितश्च॥ कुशच् श्लेषणे। कुश्रिर्ऋषिः॥ विशंत् प्रवेशने। विश्रिर्मृत्युर्ऋषिश्च॥ शुभि दीप्तौ। शुभ्रिर्यतिर्विप्रो दर्शनीयं शुभं सत्यं च॥ ६९३॥

जृषो रश्च वः॥ ६९४॥

जृष्च् जरसि। इत्यस्मात्किद्रिः प्रत्ययो[भवति] ईरि सति रेफस्य वकारश्च भवति॥ जीव्रिः शरीरम्॥ ६९४॥

कुन्द्रिकुद्र्यादयः॥ ६९५॥

कुन्द्र्यादयः शब्दाः किद्रिप्रत्ययान्ता निपात्यन्ते॥ कुपेः कौतेश्च दश्चान्तः। कुन्द्रिर्ऋषिः॥ कुद्रिः पर्वत ऋषिः समुद्रश्च॥ आदिग्रहणात् क्षौतेर्दोन्तः। क्षुद्रिः समुद्रः॥ अर्तेर्गोन्तः। ऋग्रिर्लोकनाथः॥ शकेः। शक्रिर्बलवान्॥ इत्यादयोऽपि भवन्ति॥ ६९५॥

राशदिशकिकद्यदिभ्यस्त्रिः ॥ ६९६ ॥

एभ्यस्त्रिः प्रत्ययो भवति ॥ रांक् दाने । रात्रिर्निशा ॥ शद्लृं शातने । शत्त्रिः कुञ्जरः क्रौञ्चश्च ॥ शकॢट् शक्तौ । शक्त्रिः क्रौञ्च ऋषिश्च ॥ कद वैक्लव्ये सौत्रः । कत्त्रिर्ऋषिः ॥ अदं प्सांक् भक्षणे । अत्त्रिर्ऋषिः ॥ ६९६ ॥

पतेरत्रिः ॥ ६९७ ॥

पतॢ गतौ । इत्यस्मादत्रिः प्रत्ययो भवति ॥ पतत्रिः पक्षी ॥ ६९७ ॥

नदिवल्ल्यर्तिकृतेररिः ॥ ६९८ ॥

एभ्योऽरिः प्रत्ययो भवति ॥ णद अव्यक्ते शब्दे । नदरिः पटहः ॥ वल्लि संवरणे । वल्लरिर्लता वीणा सस्यमञ्जरी च ॥ ऋंक् गतौ । अररिः कपाटः ॥ कृतैत् छेदने । कर्तरिः केशादिकर्तनयन्त्रम् ॥ ६९८ ॥

मस्यसिघसिजस्यङ्गिसहिभ्य उरिः ॥ ६९९ ॥

एभ्य उरिः प्रत्ययो भवति ॥ मसैच् परिणामे । मसुरिर्मरीचिः ॥ असूच् क्षेपणे । असुरिः संग्रामः ॥ घसॢं अदने । घसुरिरग्निः ॥ जसूच् मोक्षणे । जसुरिः समाप्तिरशनिररणिः क्रोधश्च ॥ अगु गतौ । अङ्गुरिः करशाखा । लत्वे अङ्गुलिः॥ षहि मर्षणे । सहुरिः पृथिव्यक्रोधनोऽनड्वान्संग्रामोऽन्धकारः सूर्यश्च ॥ ६९९ ॥

मुहेः कित् ॥ ७०० ॥

मुहौच् वैचित्त्ये । इत्यस्मात्किदुरिः प्रत्ययो भवति ॥ मुहुरिः सूर्योऽनड्वांश्च ॥ ७०० ॥

धूमूभ्यां लिक्लिणौ ॥ ७०१ ॥

आभ्यां यथासंख्यं लिक् लिण् इति प्रत्ययौ भवतः ॥ धूग्श् कम्पने । धूलिः पांशुः ॥ मूङ् बन्धने । मौलिर्जूटः ॥ ७०१ ॥

पाटयञ्जिभ्यामलिः ॥ ७०२ ॥

आभ्यामलिः प्रत्ययो भवति ॥ पट गतौ । ण्यन्तः । पाटलिर्वृक्षविशेषः ॥ अञ्जौप् व्यक्त्यादौ । अञ्जलिः पाणिपुटः प्रणामहस्तयुग्मं च ॥ ७०२ ॥

माशालिभ्यामोकुलिमली ॥ ७०३ ॥

आभ्यां यथासंख्यमोकुलि मलि इत्येतौ प्रत्ययौ भवतः ॥ मांक् माने । मौकुलिः काकः ॥ शल गतौ । ण्यन्तः । शाल्मलिर्वृक्षविशेषः ॥ ७०३ ॥

दॄपॄवृभ्यो विः ॥ ७०४ ॥

एभ्यो विः प्रत्ययो भवति ॥ दॄश् विदारणे । दर्विस्तर्दुः ॥ पॄश् पालनपूरणयोः । पर्विः कङ्को हिंस्रश्च ॥ वृग्श् वरणे । वर्विः शकटं धात्री काकः श्येनश्च ॥ ७०४ ॥

जॄगॄस्तॄजागृकृनीघृषिभ्यो ङित् ॥ ७०५ ॥

एभ्यो ङिद्विः प्रत्ययो भवति ॥ जॄष्च् जरसि । जीर्विः पशुः कण्टकः शकटो मद्गुः कायो गुल्मं शङ्का वृद्धो वृद्धभावश्च ॥ शॄश् हिंसायाम् । शीर्विर्हिंस्रः कृमिर्न्यङ्कुश्च ॥ स्तॄग्श् आच्छादने । स्तीर्विर्गर्विष्ठोऽध्वर्युर्भगस्तनू रुधिरं भयं तृणजातिर्निभोजश्च ॥ जागृक् निद्राक्षये । जागृवी राजाग्निः प्रबुद्धश्च । ङित्त्वान्न गुणः ॥ डुकृंग् करणे । कृवी रुद्रस्तन्तुवायस्तन्तुवायद्रव्यं राजा च । यदुपज्ञं कृवय इति पुरा पञ्चालानाचक्षते ॥ णींग् प्रापणे । नीविः परिधानग्रन्थिर्मूलधनं च ॥ घृषू संहर्षे । घृष्विर्वराहो वायुरग्निश्च ॥ ७०५ ॥

छविच्छिविस्फविस्फिविस्थविस्थिविदविदीविकिकिविदिदिविदीदिविकिकीदिविकिकिदीविशिव्यटव्यादयः ॥ ७०६ ॥

एते ङिद्विप्रत्ययान्ता निपात्यन्ते ॥ छ्यतेर्ह्रस्वश्च । छविस्त्वक्तच्छायात्वरणं च ॥ छिदेर्लुक् च । छिविः फल्गुद्रव्यम् ॥ स्फायतेः स्फस्फिभावौ च । स्फविर्वृक्षजातिः । स्फिविर्वृक्ष उदश्विच्च ॥ तिष्ठतेः स्थस्थिभावौ च । स्थविः प्रसेवकस्तन्तुवायः सीमाग्निरजङ्गमः स्वर्गः कुष्ठी कुष्ठिमांसं फलं च । स्थिविः सीमा ॥ दमेर्लुक् च । दविर्धर्मशीलो दाता स्थानं फालश्च ॥ दीव्यतेर्दीर्घश्च । दीविः कितवो द्युतिमान्कालो व्याघ्रजातिश्च ॥ कितेर्द्वित्वं पूर्वस्य चत्वाभावो लुक् च । किकिविः पक्षिविशेषः ॥ दिवेर्द्वित्वं पूर्वदीर्घत्वं च वा । दिदिविः स्वर्गः । दीदिविरन्नं स्वर्गश्च ॥ कितेः किकीदिभावश्च । किकीदिविर्वर्णः पक्षी च ॥ किकिपूर्वाद्दीव्यतेर्दीर्घश्च । किकीति कुर्वन्दीव्यति । किकिदीविश्चाषः ॥ शीङो ह्रस्वश्च । शिवी राजा ॥ अटेरचान्तः । अटविररण्यम् ॥ आदिग्रहणादन्येऽपि ॥ ७०६ ॥

प्लुषिपुषिशुषिकुष्यशिभ्यः सिक् ॥ ७०७ ॥

एभ्यः कित्सिः प्रत्ययो भवति ॥ प्रुषू प्लुषू दाहे । प्रुक्षिरग्निरुदपानश्च ॥ प्लुक्षिरग्निर्जठरं कुसूलश्च ॥ शुषंच् शोषणे । शुक्षिर्वायुर्निदाघो यवासकस्तेजश्च ॥ कुषश् निष्कर्षे । कुक्षिर्जठरम् ॥ अशौटि व्याप्तौ । अक्षि नेत्रम् ॥ ७०७ ॥

गोपादेरनेरसिः ॥ ७०८ ॥

गोप इत्यादिभ्यः परात् अनक् प्राणने । इत्यस्मादसिः प्रत्ययो भवति ॥ गोपानसिः सौधाग्रभागच्छदिः ॥ चित्रानसिर्जलचरः ॥ एकानसिरुज्जयनी ॥ वाराणसिः कासिनगरी ॥ ७०८ ॥

वृधृपॄवॄसाभ्यो नसिः ॥ ७०९ ॥

एभ्यो नसिः प्रत्ययो भवति ॥ वृगट् वरणे । वर्णसिस्तरुः ॥ धृंग् धारणे । धर्णसिः शैलो लोकपालो जलं माता च ॥ पॄश् पालनपूरणयोः । पर्णसिर्जलधर उलूखलं शाकादिश्च ॥ वॄश् भरणे । वर्णसिर्भूमिः ॥ षोंच् अन्तकर्मणि । सानसिः स्नेहो नखो हिरण्यमृणं सखा सनातनश्च ॥ ७०९ ॥

व्रियो ह्रिक् ॥ ७१० ॥

व्रींश् वरणे । इत्यस्मात्किद् ह्रिः प्रत्ययो भवति ॥ व्रीहिर्धान्यविशेषः ॥७१०॥

तॄस्तॄतन्द्रितन्त्र्यविभ्य ईः ॥ ७११ ॥

एभ्य ईः प्रत्ययो भवति ॥ तॄ प्लवनतरणयोः । तरीर्नौरग्निर्वायुः प्लवनश्च ॥ स्तॄग्श् आच्छादने । स्तरीस्तृणं धूमो मेघो नदी शय्या च ॥ तन्द्रिः सादमोहनयोः सौत्रः । तन्द्री मोहनिद्रा ॥ तन्त्रिण् कुटुम्बधारणे । तन्त्रीः शुष्कस्नायुर्वादित्र्यालस्यं च ॥ अव रक्षणादौ । अवीः प्रकाश आदित्यो भूमिः पशू राजा स्त्री च ॥ ७११ ॥

नडेर्णित् ॥ ७१२ ॥

नडेः सौत्रादीः प्रत्ययो [भवति] स च णिद्भवति ॥ नाडी आयतशुषिरं द्रव्यमर्धमुहूर्तश्च ॥ ७१२ ॥

वातात् प्रमः कित् ॥ ७१३ ॥

वातपूर्वपदात्प्रेणोपसृष्टात् मांक् माने । इत्यस्मात्किदीः प्रत्ययो भवति ॥ वातप्रमीर्वात्याश्वो वातमृगः पक्षी शमी च वृक्षः ॥ ७१३ ॥

यापाभ्यां द्वे च ॥ ७१४ ॥

आभ्यां किदीः प्रत्ययो [भव]त्यनयोश्च द्वे रूपे भवतः ॥ यांक् प्रापणे । ययीर्मोक्षमार्गो दिव्यवृष्टिरादित्योऽश्वश्च ॥ पां पाने । पपीः रश्मिः सूर्यो हस्ती च ॥ ॥ ७१४ ॥

लक्षेर्मोन्तश्च ॥ ७१५ ॥

लक्षीण् दर्शनाङ्कनयोः । इत्यस्मादीः प्रत्ययो [भवति] मकारश्चान्तो भवति ॥ लक्ष्मीः श्रीः ॥ ७१५ ॥

भृमृतृत्सरितनिधन्यनिमनिमस्जिशीवटिकटिपटिगडिचञ्च्यसि-
वसित्रपिशृस्त्रृस्निहिक्लिदिकन्दीन्दिविन्द्यन्धिबन्ध्यणि-
लोष्टिकुन्थिभ्य उः ॥ ७१६ ॥

एभ्य उः प्रत्ययो भवति ॥ टुडुभृंग्क् पोषणे च । भृंग् भरणे वा । भरुः समुद्रो वर्णिभर्ता च ॥ मृंत् प्राणत्यागे । मरुर्निर्जलो देशो गिरिश्च ॥ तृ प्लवनतरणयोः । तरु-र्वृक्षः ॥ त्सर छद्मगतौ । त्सरुरादर्शखड्गादिग्रहणप्रदेशो वञ्चकः क्षुरिका च ॥ तनूयी विस्तारे । तनुर्देहः सूक्ष्मश्च ॥ धन धान्ये सौत्रः । धनुरस्त्रं दानमानं च ॥ अनक् प्राणने । अनुः प्राणः । अनु पश्चादाद्यर्थेऽव्ययम् ॥ मनिंच् ज्ञाने । मनूयी बोधने वा । मनुः प्रजापतिः ॥ टुमस्जोंत् शुद्धौ । मद्गुर्जलवायसः ॥ शीङ्क् स्वप्ने । शयुरजगरः स्वप्न आदित्यश्च ॥ वट वेष्टने । वटुर्माणवकः ॥ कटे वर्षावरणयोः । कटू रसविशेषः ॥ पट गतौ । पटुर्दक्षः ॥ गड सेचने । गडुर्घाटामस्तकयोर्मध्ये मांसपिण्डः स्फोटश्च ॥ चञ्चू गतौ । चञ्चुः पक्षिमुखम् ॥ असूच् क्षेपणे । असवः प्राणाः ॥ वसं निवासे । वसु द्रव्यं तेजो देवता च । वसुः कश्चिद्राजा ॥ त्रपौषि लज्जायाम् । त्रपु लोहविशेषः ॥ शॄश् हिंसायाम् । शरुः क्रोध आयुधं हिंस्रश्च ॥ औस्वृ शब्दोपतापयोः । स्वरुः प्रतापो वज्रो वज्रास्फालनं च ॥ ष्णिहौंच् प्रीतौ । स्नेहुश्चन्द्रमाः संनिपातजो व्याधिविशेषः पित्तं वनस्पतिश्च ॥ क्लिदौच् आर्द्रभावे । क्लेदुः क्षेत्रं चन्द्रो भगः शरीरभङ्गश्च । क्लेदयतीति क्लेदुश्चन्द्रमा इत्यन्ये ॥ कदु रोदनाह्वानयोः । कन्दुः पाकस्थानं सूत्रोतं च क्रीडनम् ॥ इदु परमैश्वर्ये । इन्दुश्चन्द्रः ॥ विदु अवयवे । विन्दुर्विप्रुट् ॥ अन्धण् दृष्ट्युपसंहारे । अन्धुः कूपो व्रणश्च ॥ बन्धंश् बन्धने । बन्धुः स्वजनः । बन्धु द्रव्यम् ॥ अण शब्दे । अणुः पुद्गलः सूक्ष्मो रालकादिश्च धान्यविशेषः ॥ लोष्टि संघाते । लोष्टुर्मृत्पिण्डः ॥ कुन्थश् संक्लेशे । कुन्थुः सूक्ष्मजन्तुः ॥ ७१६ ॥

स्यन्दिसृजिभ्यां सिन्धरज्जौ च ॥ ७१७ ॥

आभ्यामुः प्रत्ययो[भव]त्यनयोश्च यथासंख्यं सिन्ध रज्ज इत्यादेशौ भवतः ॥ स्यन्दौङ् स्रवणे । सिन्धुर्नदो नदी समुद्रश्च ॥ सृजंत् विसर्गे । सृजिच् विसर्गे वा । रज्जुर्दवरकः ॥ ७१७ ॥

पंसेर्दीर्घश्च ॥ ७१८ ॥

पसुण् नाशने । इत्यस्मादुः प्रत्ययो [भवति] दीर्घश्च भवति ॥ पांसुः पार्थिवं रजः ॥ ७१८ ॥

अशेरान्नोन्तश्च ॥ ७१९ ॥

अशौटि व्याप्तौ । इत्यस्मादुः प्रत्ययो[भव]त्यकाराच्च परो नोन्तो भवति ॥ अंशू रश्मिः सूर्यश्च । प्रांशुर्दीर्घश्च ॥ ७१९ ॥

नमेर्नाक् च ॥ ७२० ॥

णमं प्रह्वत्वे । इत्यस्मादुः प्रत्ययो[भव]त्यस्य च नाक् इत्यादेशो भवति ॥ नाकुर्व्यलीकं वनस्पतिर्ऋषिर्वल्मीकश्च ॥ ७२० ॥

मनिजनिभ्यां धतौ च ॥ ७२१ ॥

आभ्यामुः प्रत्ययो [भव]त्यनयोश्च यथासंख्यं धकारतकारौ भवतः ॥ मनिंच् ज्ञाने । मधु क्षौद्रं सीधु च । मधुरसुरो मासश्च चैत्रः ॥ जनैचि प्रादुर्भावे। जतु लाक्षा ॥ ७२१ ॥

अर्जेर्ऋज् च ॥ ७२२ ॥

अर्ज अर्जने । इत्यस्मादुः प्रत्ययो [भव] त्यस्य च ऋज् इत्यादेशो भवति । ऋज्वकुटिलम् ॥ ७२२ ॥

कृतेस्तर्क च ॥ ७२३ ॥

कृतैत् छेदने । कृतैप् वेष्टने । इत्यस्माद्वा उः प्रत्ययो[भव]त्यस्य च तर्क इत्यादेशो भवति ॥ तर्कुश्चुन्दः सूत्रवेष्टनशलाका च ॥ ७२३ ॥

नेरञ्चेः ॥ ७२४ ॥

निपूर्वादञ्चेतेरुः प्रत्ययो भवति ॥ न्यङ्कुर्मृग ऋषिश्च ॥ ७२४ ॥

किमः श्रो णित् ॥ ७२५ ॥

किम्पूर्वात् शॄश् हिंसायाम् । इत्यस्माण्णिदुः प्रत्ययो भवति ॥ किंशारुः शूको धान्यशिखा हिंस्र इषुश्च ॥ ७२५ ॥

मिवहिचरिचटिभ्यो वा ॥ ७२६ ॥

एभ्य उः प्रत्ययो [भवति] स च णिद्वा भवति ॥ डुमिंगट् प्रक्षेपणे । मायुः पित्तं मानं शब्दश्च । गोमायुः सृगालः ॥ मयुः किंनर उष्ट्रः प्रक्षेप आकूतं च । बाहुलकादात्वाभावः ॥ वहीं प्रापणे । वाहुर्भुजः ॥ वहु प्रभूतम् ॥ चर भक्षणे च । चारु शोभनम् ॥ चरन्त्यस्माद्देवपितृभूतानि । भीमादित्वादपादानेपि । चरुर्देवतोद्देशेन पाकः स्थाली च ॥ चटण् भेदे । चाटुः प्रियाचरणं पटुजनः प्रियवादी स्फुटवादी दर्व्यमं शिष्यश्च ॥ चटुः प्रियाचरणम् ॥ ७२६ ॥

ऋतॄगॄमृभ्रादिभ्यो रो लश्च ॥ ७२७ ॥

एभ्यो णिदुः प्रत्ययो [भवति] रेफस्य च लकारो भवति ॥ ऋंक् गतौ । ऋं प्रापणे च वा । आलुः श्लेष्मा श्लेष्मातकः कन्दविशेषश्च ॥ तॄ प्लवनतरणयोः । तालुः काकुदम् ॥ शॄश् हिंसायाम् । शालुः कषायो हिंस्रश्च ॥ मृंत् प्राणत्यागे । मालुः पत्त्रलता यस्या मालुधानीति प्रसिद्धिः ॥ टुडुभृंग्क् पोषणे च । भालुरिन्द्रः॥ आदिग्रहणादन्येपि ॥ ७२७ ॥

कृकस्थूराद्वचः क् च ॥ ७२८ ॥

आभ्यां पराद्वचो णिदुः प्रत्ययो [भवति] ककारश्चान्तादेशो भवति ॥ वचंक् भाषणे । ब्रूंगक् व्यक्तायां वाचि । कृकमव्यक्तं वक्ति ब्रूते वा । कृकवाकुः कुकुटः कृकलासः खञ्जरीटश्च ॥ एवं स्थूरवाकुरुच्चध्वनिः ॥ ७२८ ॥

पॄकाहृषिधृषीषिकुहिभिदिविदिमृदिव्यधिगृध्यादिभ्यः कित् ॥ ७२९ ॥

एभ्यः किदुः प्रत्ययो भवति ॥ पॄश् पालनपूरणयोः । पुरुर्महांल्लोकः समुद्रो यजमानो राजा च कश्चित् ॥ कैं शब्दे । कुः पृथ्वी ॥ हृषच् तुष्टौ । हृषू अलीके वा । हृषुस्तुष्टोलीकः सूर्याग्निशशिनश्च ॥ ञिधृषाट् प्रागल्भ्ये । धृषुः प्रगल्भः संताप उत्साहः पर्वतश्च ॥ इषत् इच्छायाम् । इषुः शरः ॥ कुहणि विस्मापने । कुहुर्नष्टचन्द्रामावास्या ॥ भिदूंपी विदारणे । भिदुर्वज्रः कन्दर्पश्च ॥ विदक् ज्ञाने । विदुर्हस्तिमस्तकैकदेशः ॥ मृदश् क्षोदे । मृदुरकठिनः ॥ व्यधंच् ताडने । विधुश्चन्द्रो वायुरग्निश्च ॥ गृधूच् अभिकाङ्क्षायाम् । गृधुः कामः ॥ आदिग्रहणात् पूरैचि आप्यायने । पूरण् आप्यायने वा । पूरितमनेन यशसा सर्वमिति पूरू राजर्षिः ॥ एवमन्येपि ॥ ७२९ ॥

रभिप्रथिभ्यामृच्च रस्य ॥ ७३० ॥

आभ्यां किदुः प्रत्ययो [भवति] रेफस्य च ऋकारो भवति ॥ रभि राभस्ये । ऋभवो देवाः ॥ प्रथिष् प्रख्याने । पृथू राजा विस्तीर्णश्च ॥ ७३० ॥

स्पशिभ्रस्जेः स्लुक् च ॥ ७३१ ॥

आभ्यां किदुः प्रत्ययो [भवति] सकारस्य च लुग्भवति ॥ स्पशिः सौत्रस्तालव्यान्तः । पशुस्तिर्यङ् मन्त्रवध्यश्च जनः ॥ भ्रस्जींत् पाके । भृगुः प्रपातो ब्राह्मणश्च श्रुतः । कित्त्वात् ग्रह-व्रश्च-भ्रस्ज-प्रछ इति य्वृत् । न्यङ्कूद्गमेघादय इति गत्वम् ॥ ७३१ ॥

दुःस्वपवनिभ्यः स्थः ॥ ७३२ ॥

दुः सु अप वनि इत्येतेभ्यः परात् ष्ठां गतिनिवृत्तौ । इत्यस्मात्किदुः प्रत्ययो भवति ॥ दुष्ठु शोभनम् ॥ सुष्ठु सातिशयम् ॥ अपष्ठु वामम् ॥ वनिष्ठुर्वपासंनिहितोवयवोश्वः संभक्तोपानं च ॥ ७३२ ॥

हनियाकृभृपृतृत्रो द्वे च ॥ ७३३ ॥

एभ्यः क्रिदुः प्रत्ययो [भव]त्येषां च द्वे रूपे भवतः ॥ हनंक् हिंसागत्योः। जघ्नुरिन्द्रो वेगवांश्च ॥ यांक् प्रापणे । ययुरश्वो यायावरः स्वर्गमार्गश्च ॥ डुकृंग् करणे । चक्रुः कर्मठो वैकुण्ठश्च ॥ टुडुभृंग्क् पोषणे च। भृंग् भरणे वा । बभ्रुर्कपिर्नकुलो राजा वर्णश्च ॥ पृश् पालनपूरणयोः । पुपुरुः समुद्रश्चन्द्रो लोकश्च ॥ तृ प्लवनतरणयोः । तितिरुः पतंगः ॥ त्रैंङ् पालने । तत्रुर्नौका ॥ ७३३ ॥

कृग्र ऋत उर् च ॥ ७३४ ॥

आभ्यां किदुः प्रत्ययो [भव]त्यृकारस्य च उर् भवति ॥ कृत् विक्षेपे । कुरू राजर्षिः । कुरवो जनपदः ॥ गृश् शब्दे । गुरुराचार्यो लघुप्रतिपक्षः पूज्यश्च जनः ॥ ७३४ ॥

पचेरिच्चातः ॥ ७३५ ॥

डुपचींष् पाके । इत्यस्मादुः प्रत्ययो [भव]त्यकारस्य च इकारो भवति ॥ पिचुर्निरस्थीकृतकर्पासः ॥ ७३५ ॥

अर्तेरूर् च ॥ ७३६ ॥

ऋंक् गतौ । इत्ययस्मादुः प्रत्ययो [भव]त्यस्य च ऊर् इत्यादेशो भवति ॥ ऊरुः शरीराङ्गम् ॥ ७३६ ॥

महत्युर् च ॥ ७३७ ॥

अर्तेर्महत्यभिधेय उः प्रत्ययो [भव]त्यस्य च उर् इत्यादेशो भवति ॥ उरु विस्तीर्णम् ॥ ७३७ ॥

उड् च भे ॥ ७३८ ॥

अर्तेर्भे नक्षत्रेभिधेय उः प्रत्ययो [भवति] धातोश्च उडादेशो भवति ॥ उडु नक्षत्रम् ॥ ७३८ ॥

श्लिषेः क् च ॥ ७३९ ॥

श्लिषंच् आलिङ्गने । इत्यस्मात्किदुः प्रत्ययो [भवति] ककारश्चान्तादेशो भवति ॥ श्लिकुर्मृगास्थि [सव्यवसायो राज्यं] ज्योतिषं सेवकश्च ॥ ७३९ ॥

रङ्घिलङ्घिलिङ्गिर्नलुक् च ॥ ७४० ॥

एभ्य उः प्रत्ययो [भवति] नकारस्य च लुग्भवति ॥ रघु लघुङ् गतौ। रघू राजा ॥ लघु तुच्छं शीघ्रं च ॥ लिगुण् चित्रीकरणे । लिगुर्ऋषिः सेवको मूर्खो भूमिविशेषश्च ॥ ७४० ॥

पीमृगमित्रदेवकुमारलोकधर्मविश्वसुम्नाश्मावेभ्यो यः ॥ ७४१ ॥

पी मृग मित्र देव कुमार लोक धर्म विश्व सुम्न अश्मन् अव इत्येतेभ्यः परात् यांक् प्रापणे । इत्यस्मात्किदुः प्रत्ययो भवति ॥ पीयुरुलूक आदित्यः सुवर्णं कालश्च ॥ मृगयुर्व्याधो मृगश्च ॥ मित्रयुर्ऋषिर्मित्रवत्सलश्च ॥ देवयुर्धार्मिकः ॥ कुमारयू राजपुत्रः ॥ लोकयुर्वाक्यकुशलो जनः ॥ धर्मयुर्धार्मिकः ॥ विश्वयुर्वायुः ॥ सुम्नयुर्यजमानः ॥ अश्मयुर्मूर्खः ॥ अवयुः काव्यम् ॥ ७४१ ॥

पराङ्भ्यां शॄखनिभ्यां डित् ॥ ७४२ ॥

पर- आङ्पूर्वाभ्यां यथासंख्यं शॄखनिभ्यां डिदुः प्रत्ययो भवति ॥ शॄश् हिंसायाम् । पराञ्शृणाति । परशुः कुठारः ॥ खनूग् अवदारणे । आखुर्मूषिकः ॥ ७४२ ॥

शुभेः स च वा ॥ ७४३ ॥

शुभिं दीप्तौ । इत्यस्माड्डिदुः प्रत्ययो [भव] त्यस्य च दन्त्यः सो वा भवति ॥ सुः शुश्च पूजायाम् । सुपुरुषः । शुनासीरः ॥ ७४३ ॥

द्युद्रुभ्याम् ॥ ७४४ ॥

आभ्यां डिदुः प्रत्ययो भवति ॥ द्युंक् अभिगमे । द्युः स्वर्गक्रीडा स्वर्गश्च ॥ द्रुं गतौ । द्रुर्वृक्षशाखा वृक्षश्च ॥ ७४४ ॥

हरिपीतमितशतविकुकद्भ्यो द्रुवः ॥ ७४५ ॥

हरि पीत मित शत वि कु कद् इत्येतेभ्यः परात् द्रुं गतौ । इत्यस्माड्डिदुः प्रत्ययो भवति ॥ हरिद्रुर्वृक्ष ऋषिः पर्वतश्च ॥ पीतद्रुर्देवदारुः ॥ मितद्रुः समुद्रस्तुरंगो मितंगमश्च ॥ शतद्रुर्नाम नदो नदी च ॥ विद्रुर्दारुप्रकारो वृक्षश्च ॥ कुद्रुर्विकलपादः ॥ कद्रुर्नागमाता वह्निजातिर्गृहगोधा वर्णश्च ॥ ७४५ ॥

केवयुभुरण्य्वध्वर्य्वादयः ॥ ७४६ ॥

केवय्वादयः शब्दा डिदुप्रत्ययान्ता निपात्यन्ते ॥ केवलपूर्वाद्यातेर्ललोपश्च । केवलो यातीति केवयुर्ऋषिः ॥ भूपूर्वाद्यातेर्दुरण्वादौ भुवं यातीति भुरण्युरग्निः ॥

अध्वरं यातीति पूर्वपदान्तलोपे । अध्वर्युर्ऋत्विक् ॥ आदिग्रहणात् चरन्याति । चरण्युर्वायुः ॥ अभिपूर्वस्याश्नातेः । अभीशू रश्मिः ॥ ७४६ ॥

शः सन्वच्च ॥ ७४७ ॥

शोंच् तक्षणे । इत्यस्माड्डिदुः प्रत्ययो [भवति] स च सन्वत् सनीवास्मिन्द्वित्वं पूर्वस्य च इत्वं भवति ॥ शिशुर्बालः ॥ ७४७ ॥

तनेर्डउः ॥ ७४८ ॥

तनूयी विस्तारे । इत्यस्माड्डिदुः प्रत्ययो [भवति] स च सन्वद्भवति ॥ तितउः परिवपनम् ॥ ७४८ ॥

कैशीशमिरमिभ्यः कुः ॥ ७४९ ॥

एभ्यः कुः प्रत्ययो भवति ॥ कैं शब्दे । काकुः स्वरविशेषः ॥ शीङ्क् स्वप्ने । शेकुरुद्भिद्विशेषः ॥ शमूच् उपशमे । शङ्कुः कीलको बाणः शूलमायुधं चिह्नं छलकश्च ॥ रमिं क्रीडायाम् । रङ्कुर्मृगः ॥ ७४९ ॥

ह्रियः किद्रो लश्च वा ॥ ७५० ॥

ह्रींक् लज्जायाम् । इत्यस्मात्किल्कुः प्रत्ययो [भवति] रेफस्य च लकारो वा भवति ॥ ह्रीकुर्ह्लीकुश्च त्रपु जतुनी लज्जावांश्च ॥ ह्रीकुर्वनमार्जारः ॥ ७५० ॥

किरः ष च ॥ ७५१ ॥

कॄत् विक्षेपे । इत्यस्मात्किल्कुः प्रत्ययो [भवति] षकारश्चान्तादेशो भवति ॥ किष्कुश्छायामानद्रव्यम् ॥ ७५१ ॥

चटिकठिपर्दिभ्य आकुः ॥ ७५२ ॥

एभ्य आकुः प्रत्ययो भवति ॥ चटण् भेदे । चटाकुर्ऋषिः शकुनिश्च ॥ कठ कृच्छ्रजीवने । कठाकुः कुटुम्बपोषकः ॥ पर्दि कुत्सिते शब्दे । पर्दाकुर्भेको वृश्चिकोजगरश्च ॥ ७५२ ॥

सिविकुटिकुठिकुकुषिकृषिभ्यः कित् ॥ ७५३ ॥

एभ्यः किदाकुः प्रत्ययो भवति ॥ षिवूच् उतौ । सिवाकुर्ऋषिः ॥ कुटत् कौटिल्ये । कुटाकुर्विटपः ॥ कुठिः सौत्रः । कुठाकुः श्वभ्रः ॥ कुंङ् शब्दे । कुवाकुः पक्षी ॥ कुषश् निष्कर्षे । कुषाकुर्मूषिकोग्निः परोपतापी च ॥ कृषींत् विलेखने । कृषाकुः कृषीवलः ॥ ७५३ ॥

उपसर्गाच्चेर्डित् ॥ ७५४ ॥

उपसर्गपूर्वात् चिंगट् चयने । इत्यस्माड्डिदाकुः प्रत्ययो भवति ॥ उपचाकुः संचाकुर्ऋषिः ॥ निचाकुर्निपुण ऋषिश्च ॥ ७५४ ॥

शलेरङ्कुः ॥ ७५५ ॥

शल गतौ । इत्यस्मादङ्कुः प्रत्ययो भवति ॥ शलङ्कुर्ऋषिः ॥ ७५५ ॥

सृपृभ्यां दाकुक् ॥ ७५६ ॥

आभ्यां किद्दाकुः प्रत्ययो भवति ॥ सृं गतौ । सृदाकुर्दावाग्निर्वायुरादित्यो व्याघ्रः शकुनिरस्तो [भ]र्ता गोत्रकृच्च ॥ पृंक् पालनपूरणयोः । पृदाकुः सर्पो गोत्रकृच्च ॥ ७५६ ॥

इषेः स्वाकुक् ॥ ७५७ ॥

इषत् इच्छायाम् । इत्यस्मात्किल्स्वाकुः प्रत्ययो भवति ॥ इक्ष्वाकुरादिक्षत्रियः ॥ ७५७ ॥

फलिवल्यमेर्गुः ॥ ७५८ ॥

एभ्यो गुः प्रत्ययो भवति ॥ फल निष्पत्तौ । फल्ग्वसारम् ॥ वलि संवरणे । वल्गु मधुरं शोभनं च । वल्गुः पक्षी ॥ अम गतौ । अङ्गुः शरीरावयवः ॥ ७५८ ॥

दमेर्लुक् च ॥ ७५९ ॥

दमूच् उपशमे । इत्यस्माद्गुः प्रत्ययो [भव] त्यन्त्यस्य च लुग्भवति ॥ दगुर्ऋषिः ॥ ७५९ ॥

हेर्हिन् च ॥ ७६० ॥

हिंट् गतिवृद्ध्योः । इत्यस्माद्गुः प्रत्ययो [भव]त्यस्य च हिन् इत्यादेशो भवति ॥ हिङ्गू रामठः ॥ ७६० ॥

प्रीकैपैनीलेरङ्गुक् ॥ ७६१ ॥

एभ्यः किदङ्गुः प्रत्ययो भवति ॥ प्रींग्श् तृप्तिकान्त्योः । प्रियङ्गुः फलिनी रालकश्च ॥ कैं शब्दे । कङ्गुरणुः ॥ पैं शोषणे । पङ्गुः खञ्जः ॥ णील वर्णे । नीलङ्गुः कृमिजातिः सृगालश्च ॥ ७६१ ॥

अव्यर्त्तिगृभ्योऽट्टुः ॥ ७६२ ॥

एभ्योऽट्टुः प्रत्ययो भवति ॥ अव रक्षणादौ । अवट्टुः कृकाटिका ॥ ऋंक् गतौ । अरट्टुर्वृक्षः ॥ गॄत् निगरणे । गरट्टुर्देशविशेषः पक्ष्यजगरश्च ॥ ७६२ ॥

शलेराट्टुः ॥ ७६३ ॥

शल गतौ । इत्यस्मादाट्टुः प्रत्ययो भवति ॥ शलाट्टुः कोमलं फलम् ॥७६३॥

अञ्ज्यवेरिष्टुः ॥ ७६४ ॥

आभ्यामिष्टुः प्रत्ययो भवति ॥ अञ्जौप् व्यक्त्यादौ । अञ्जिष्टुर्भानुरग्निश्च ॥ अव रक्षणादौ । अविष्टुरश्वो होता च ॥ ७६४ ॥

तनिमनिकणिभ्यो डुः ॥ ७६५ ॥

एभ्यो डुः प्रत्ययो भवति ॥ तनूयी विस्तारे । तण्डुः प्रथमः ॥ मनिंच् ज्ञाने । मण्डुर्ऋषिः ॥ कण शब्दे । कण्डुर्वेदनाविशेषः ॥ ७६५ ॥

पनेर्दीर्घश्च ॥ ७६६ ॥

पनि स्तुतौ । इत्यस्माड्डुः प्रत्ययो [भवति] दीर्घश्च भवति ॥ पाण्डुर्वर्णः क्षत्रियश्च ॥ ७६६ ॥

पलिमृभ्यामाण्डुकण्डुकौ ॥ ७६७ ॥

आभ्यां यथासंख्यमाण्डु कण्डुक इति प्रत्ययौ भवतः ॥ पल गतौ । पलाण्डुर्लशुनभेदः ॥ मृंत् प्राणत्यागे । मृकण्डुक ऋषिः ॥ ७६७ ॥

अजिस्थावृरीभ्यो णुः ॥ ७६८ ॥

एभ्यो णुः प्रत्ययो भवति ॥ अज क्षेपणे च । वेणुर्वंशः ॥ ष्ठां गतिनिवृत्तौ स्थाणुः शिव ऊर्ध्वं च दारु ॥ वृग्ट् वरणे । वर्णुर्नदो जनपदश्च ॥ रींश् गतिरेषणयोः । रेणुर्धूलिः ॥ ७६८ ॥

विषेः कित् ॥ ७६९ ॥

विष्लृंकी व्याप्तौ । इत्यस्मात्किण्णुः प्रत्ययो भवति ॥ विष्णुर्हरिः ॥७६९॥

क्षिपेरणुक् ॥ ७७० ॥

क्षिपींत् प्रेरणे । इत्यस्मात्किदणुः प्रत्ययो भवति ॥ क्षिपणुः समीरणो विद्युच्च ॥ ७७० ॥

अञ्जेरिष्णुः ॥ ७७१ ॥

अञ्जौप् व्यक्त्यादौ । इत्यस्मात्किदिष्णुः प्रत्ययो भवति ॥ अञ्जिष्णुर्घृतम् ॥ ७७१ ॥

कृहृभूजीविगम्यादिभ्य एणुः ॥ ७७२ ॥

एभ्य एणुः प्रत्ययो भवति ॥ कृंग्ट् हिंसायाम् । डुकृंग् करणे वा । करेणुर्हस्ती ॥ हृंग् हरणे । हरेणुर्गन्धद्रव्यम् ॥ भू सत्तायाम् । भवेणुर्भव्यः ॥ जीव प्राणधारणे । जीवेणुरौषधम् ॥ गम्लृं गतौ । गमेणुर्गन्ता ॥ आदिग्रहणात् शमूच् उपशमे । शमेणुरुपशमनम् ॥ यजीं देवपूजादौ । यजेणुर्यज्ञादि ॥ डुपचींष् पाके । पचेणुः पाकस्थानम् ॥ पदेणुः । वहेणुरित्यादि ॥ ७७२ ॥

कृसिकम्यमिगमितनिमनिजन्यसिमसिसच्यविभाधागाग्लाम्लाहन्-हायाहिक्रुशिपूभ्यस्तुन् ॥ ७७३ ॥

एभ्यस्तुन् प्रत्ययो भवति ॥ डुकृंग् करणे । कर्तुः कर्मकरः ॥ षिंग्ट् बन्धने । सेतुर्नदीसंक्रमः ॥ कमूङ् कान्तौ । कन्तुः कन्दर्पः कामी मनः कुसूलश्च ॥ अम गतौ । अन्तू रक्षिता लक्षणं च ॥ गम्लृं गतौ । गन्तुः पथिकः । आगन्तुरवास्तव्यो जनः ॥ तनूयी विस्तारे । तन्तुः सूत्रम् ॥ मनिंच् ज्ञाने । मन्तुर्वैमनस्यं प्रियंवदो मानश्च ॥ जनैचि प्रादुर्भावे । जन्तुः प्राणी ॥ असक् भुवि । अस्तुरस्तिभावः । बाहुलकाद्भूभावाभावः ॥ मसैच् परिणामे । मस्तुर्दधिमूलवारि ॥ षचि सेचने । सक्तुर्यवविकारः ॥ अव रक्षणादौ । ओतुर्बिडालः ॥ भांक् दीप्तौ । भातुर्दीप्तिमाञ्शरीरावयवोर्मिर्विद्वांश्च ॥ डुधांग्क् धारणे च । धातुर्लोहादि रसादिः शब्दप्रकृतिश्च ॥ गैं शब्दे । गातुर्गायन उद्गाता च ॥ ग्लैं हर्षक्षये । ग्लातुः सरुजः ॥ म्लैं गात्रविनामे । म्लातुर्दीनः ॥ हनंक् हिंसागत्योः । हन्तुरायुधं हिमश्च ॥ ओहांक् त्यागे । हातुर्मृत्युर्मार्गश्च ॥ यांक् प्रापणे । यातुः पाप्मा जनो राक्षसश्च ॥ हिंट् गतिवृद्ध्योः । हेतुः कारणम् ॥ क्रुशं आह्वानरोदनयोः । क्रोष्टा सृगालः ॥ पूग्श् पवने । पोतुः पविता ॥ नित्करणं क्रुशस्तुनस्तृच् पुंसीत्यत्र विशेषणार्थम् ॥ ७७३ ॥

वसेर्णिद्वा ॥ ७७४ ॥

वसं निवासे । इत्यस्मात्तुन् प्रत्ययो [भवति] स च णिद्वा भवति ॥ वास्तु गृहं गृहभूमिश्च ॥ वस्तु सन्निवेशभूमिश्च ॥ ७७४ ॥

पः पीप्यौ च वा ॥ ७७५ ॥

पां पाने । इत्यस्मात्तुन् प्रत्ययो [भव]त्यस्य च पी पि इत्यादेशौ वा भवतः। पीतुरादित्यश्चन्द्रो हस्ती कालश्चक्षुर्बालघृतपानभाजनं च ॥ पितुः प्रजापतिराहारश्च॥ पातू रक्षिता ब्रह्मा च ॥ ७७५ ॥

आपोप् च ॥ ७७६ ॥

आपृट् व्याप्तौ । इत्यस्मात्तुन् प्रत्ययो [भव]त्यस्य च अप् इत्यादेशो भवति ॥ अप्तुर्देवताविशेषः कालो याजको यज्ञयोनिश्च ॥ ७७६ ॥

अञ्ज्यर्तेः कित् ॥ ७७७ ॥

आभ्यां कित्तुन् प्रत्ययो भवति ॥ अञ्जौप् व्यक्त्यादिषु । अक्तुरिन्द्रो विष्णू रात्रिश्च ॥ ऋक् गतौ । ऋतुर्हेमन्तादिः स्त्रीरजस्तत्कालश्च ॥ ७७७ ॥

चायः के च ॥ ७७८ ॥

चायृग् पूजानिशामनयोः । इत्यस्मात्तुन् प्रत्ययो भवत्यस्य च के इत्यादेशो भवति ॥ केतुर्ध्वजो ग्रहश्च ॥ ७७८ ॥

वहिमहिगुह्येधिभ्योतुः ॥ ७७९ ॥

एभ्योतुः प्रत्ययो भवति ॥ वहीं प्रापणे । वहतुर्विवाहोनड्वानग्निः कालश्च ॥ मह पूजायाम् । महतुरग्निः ॥ गुहौग् संवरणे । गूहतुर्भूमिः ॥ एधि वृद्धौ । एधतुर्लक्ष्मीः पुरुषोग्निश्च ॥ ७७९ ॥

कृलाभ्यां कित् ॥ ७८० ॥

आभ्यां किदतुः प्रत्ययो भवति ॥ डुकृंग् करणे । कृतुर्यज्ञः ॥ लांक् आदाने । लतुः पाशः ॥ ७८० ॥

तनेर्यतुः ॥ ७८१ ॥

तनूयी विस्तारे । इत्यस्माद्यतुः प्रत्ययो भवति ॥ तन्यतुर्विस्तारो वायुः पर्वतः सूर्यश्च ॥ ७८१ ॥

जीवेरातुः ॥ ७८२ ॥

जीव प्राणधारणे । इत्यस्मादातुः प्रत्ययो भवति ॥ जीवातुर्जीवितमौषधमन्नमुदकं द्रव्यं च ॥ ७८२ ॥

यमेर्दुक् ॥ ७८३ ॥

यमूं उपरमे । इत्यस्मात्किदुः प्रत्ययो भवति ॥ यदुः क्षत्रियः ॥ ७८३ ॥

शीङो धुक् ॥ ७८४ ॥

शीङ्क् स्वप्ने । इत्यस्मात्कित् धुः प्रत्ययो भवति ॥ शीधु मद्यविशेषः ॥ ७८४ ॥

धूगो धुन् च ॥ ७८५ ॥

धुगश् कम्पने । इत्यस्मात् धुक् प्रत्ययो [भव]त्यस्य च धुन् इत्यादेशो भवति ॥ धुन्धुर्दानवः ॥ ७८५ ॥

दाभाभ्यां नुः ॥ ७८६ ॥

आभ्यां नुः प्रत्ययो भवति ॥ डुदांग्क् दाने । दानुर्गन्ता यजमानो वायुरादित्यो दक्षिणार्थं च धनम् ॥ भांक् दीप्तौ । भानुः सूर्यो रश्मिश्च । चित्रभानुरग्निः। स्वर्भानू राहुः । विश्वभानुरादित्यः ॥ ७८६ ॥

धेः शित् ॥ ७८७ ॥

ट्धें पाने । इत्यस्मान्नुः प्रत्ययो [भवति] स च शिद्भवति ॥ धेनुरभिनवप्रसवा गवादिः ॥ शित्त्वादात्संध्यक्षरस्येत्याकारो न भवति ॥ ७८७ ॥

सुवः कित् ॥ ७८८ ॥

षूङौक् प्राणिगर्भविमोचने । इत्यस्मात्किन्नुः प्रत्ययो भवति ॥ सूनुः पुत्रः ॥ ७८८ ॥

हो जह् च ॥ ७८९ ॥

ओहांक् त्यागे । इत्यस्मान्नुः प्रत्ययो [भव] त्यस्य च जह् इत्यादेशो भवति ॥ जह्नुर्गङ्गापिता ॥ ७८९ ॥

वचेः कगौ च ॥ ७९० ॥

वचंक् भाषणे । इत्यस्मान्नुः प्रत्ययो [भवति] ककारगकारौ चान्तादेशौ भवतः ॥ वक्नुर्वग्नुश्च वाग्मी ॥ ७९० ॥

कृहनेस्तुक्नुकौ ॥ ७९१ ॥

आभ्यां कितौ नु नु इति प्रत्ययौ भवतः ॥ डुकृंग् करणे । कृतुः कर्मकरः । कृणुः कोशकारः कारुश्च ॥ हनंक् हिंसागत्योः । हतुर्हिंसः ॥ हनुर्वक्त्रैकदेशः बाहुलकान्नलोपः ॥ ७९१ ॥

गमेः सन्वच्च ॥ ७९२ ॥

गम्लृं गतौ । इत्यस्मात्तुक्नुकौ सन्वच्च भवतः ॥ जिगन्तुर्ब्राह्मणो दिवसो मार्गः प्राणोऽग्निश्च ॥ जिगत्नुः प्राणो बाणो मनो मीनो वायुश्च ॥ ७९२ ॥

दाभूक्षण्युन्दिनदिवदिपत्यादेरनुङ् ॥ ७९३ ॥

एभ्यो ङिदनुः प्रत्ययो भवति ॥ डुदांग्क् दाने । दनुर्दानवमाता ॥ भू सत्तायाम् । भुवनुर्मेघश्चन्द्रो भवितव्यता हंसश्च ॥ क्षणूग् हिंसायाम् । क्षणनुर्याया-

वरः ॥ उन्दैप् क्लेदने । उन्दनुः शुकः ॥ णद अव्यक्ते शब्दे । नदनुर्मेघः सिंहश्च ॥ वद व्यक्तायां वाचि । वदनुर्वक्ता ॥ पत्लृ गतौ । पतनुः श्येनः ॥ आदिग्रहणादन्येऽपि ॥ कित्त्वमकृत्वा डित्करणं वदेर्वृद्धभावार्थम् ॥ ७९३ ॥

कृशेरानुक् ॥ ७९४ ॥

कृशच् तनुत्वे । इत्यस्मात्किदानुः प्रत्ययो भवति ॥ कृशानुर्वह्निः॥७९४॥

जीवे रदानुक् ॥ ७९५ ॥

जीव प्राणधारणे । इत्यस्मात्किद्रदानुः प्रत्ययो भवति ॥ जीरदानुः ॥ कित्करणं गुणप्रतिषेधार्थम् । वलोपे हि नाम्यन्तत्वाद्गुणः स्यात् ॥ ७९५ ॥

वचेरक्नुः ॥ ७९६ ॥

वचंक् भाषणे । इत्यस्मादक्नुः प्रत्ययो भवति ॥ वचक्नुर्वाग्म्याचार्यो ब्राह्मण ऋषिश्च ॥ ७९६ ॥

हृषिपुषिघुषिगदिमदिनन्दिगडिमण्डिजनिस्तनिभ्यो णेरित्नुः ॥ ७९७ ॥

एभ्यो ण्यन्तेभ्य इत्नुः प्रत्ययो भवति ॥ हृषच् तुष्टौ । हृषू अलीके वा । हर्षयित्नुरानन्दः स्वजनो रङ्गोपजीवी प्रियंवदश्च ॥ पुषंच् पुष्टौ । पोषयित्नुर्भर्ता मेघः कोकिलश्च ॥ घुषूण् विशब्दने । घोषयित्नुः कोकिलः शब्दश्च ॥ गदण् गर्जे । गदयित्नुः पर्जन्यो वावदूको भ्रमरः कामश्च ॥ मदैच् हर्षे । मदयित्नुर्मदिरा सुवर्णमलंकारश्च ॥ टुनदु समृद्धौ । नन्दयित्नुः पुत्र आनन्दः प्रमुदितश्च ॥ गड सेचने । गडयित्नुर्बलाहकः ॥ मडु भूषायाम् । मण्डयित्नुर्मण्डयिता कामुकश्च ॥ जनैचि प्रादुर्भावे । जनयित्नुः पिता ॥ स्तनण् गर्जे । स्तनयित्नुर्मेघो मेघगर्जितं च ॥७९७॥

कस्यर्तिभ्यामिपुक् ॥ ७९८ ॥

आभ्यां किदिपुः प्रत्ययो भवति ॥ कस गतौ । कसिपुरशनम् ॥ ऋक् गतौ । रिपुः शत्रुः ॥ ७९८ ॥

कम्यमिभ्यां बुः ॥ ७९९ ॥

आभ्यां बुः प्रत्ययो भवति ॥ कमूङ् कान्तौ । कम्बुः शङ्खः ॥ अम गतौ । अम्बु पानीयम् ॥ ७९९ ॥

अभ्रेरमुः ॥ ८०० ॥

अभ्र गतौ । इत्यस्मादमुः प्रत्ययो भवति ॥ अभ्रमुर्देवहस्तिनी ॥ ८००॥

यजिशुन्धिदहिदसिजनिमनिभ्यो युः ॥ ८०१ ॥

एभ्यो युः प्रत्ययो भवति ॥ यजीं देवपूजादौ । यज्युरग्निरध्वर्युर्यज्वा शिष्यश्च ॥ शुन्ध शुद्धौ । शुन्ध्युरग्निरादित्यः पवित्रं च ॥ दहं भस्मीकरणे । दह्युरग्निः ॥ दसूच् उपक्षये । दस्युश्चौरः ॥ जनैचि प्रादुर्भावे । जन्युरपत्यं पिता वायुः प्रादुर्भावः प्रजापतिः प्राणी च ॥ मनिंच् ज्ञाने । मन्युः कृपा क्रोधः शोकः क्रतुश्च ॥ ८०१ ॥

भुजेः कित् ॥ ८०२ ॥

भुजंप् पालनाभ्यवहारयोः । इत्यस्मात्किद्युः प्रत्ययो भवति ॥ भुज्युरग्निरादित्यो गरुडो भोग ऋषिश्च ॥ ८०२ ॥

सर्तेरय्वन्यू ॥ ८०३ ॥

सृं गतौ । इत्यस्मादयु अन्यु इति प्रत्ययौ भवतः ॥ सरयुर्नदी वायुश्च ॥ दीर्घान्तमिममिच्छन्त्येके । सरयूः । श्लिष्टनिर्देशात्तदपि संगृहीतमेव ॥ सरण्युर्मेघोऽश्विनोर्माता समेघो वायुश्च ॥ ८०३ ॥

भूक्षिपिचरेरन्युक् ॥ ८०४ ॥

एभ्यः किदन्युः प्रत्ययो भवति ॥ भू सत्तायाम् । भुवन्युरीश्वरोऽग्निश्च ॥ क्षिपींत् प्रेरणे । क्षिपण्युर्वायुर्वसन्तो विद्युद[र्थः] कालश्च ॥ चर भक्षणे । चरण्युर्वायुः ॥ ८०४ ॥

मुस्त्युक् ॥ ८०५ ॥

मृंत् प्राणत्यागे । इत्यस्मात्किच्त्युः प्रत्ययो भवति ॥ मारयतीति मृत्युः कालो मरणं च ॥ ८०५ ॥

चिनीपीम्यशिभ्यो रुः ॥ ८०६ ॥

एभ्यो रुः प्रत्ययो भवति ॥ चिंग्ट् चयने । चेरुर्मुनिः ॥ णींग् प्रापणे । नेरुर्जनपदः ॥ पींङ्च् पाने । पेरुः सूर्यो गिरिः कलविङ्कश्च ॥ मींङ्च् हिंसायाम् । मेरुर्देवाद्रिः ॥ अशौटि व्याप्तौ । अश्रु नेत्रजलम् ॥ ८०६ ॥

रुपूभ्यां कित् ॥ ८०७ ॥

आभ्यां किद्रुः प्रत्ययो भवति ॥ रुक् शब्दे । रुरुर्मृगजातिः ॥ पूग्श् पवने । पूरू राजा ॥ ८०७ ॥

खनो लुक् च ॥ ८०८ ॥

खनूग् अवदारणे । इत्यस्माद्रुः प्रत्ययो [भवति] नस्य च लुग्भवति ॥ खरु-र्दर्पः क्रूरो मूर्खो द्वमो गीतविशेषश्च ॥ ८०८ ॥

जनिहनिशद्यर्तेस्त च ॥ ८०९ ॥

एभ्यो रुः प्रत्ययो भवत्यन्त्यस्य च तकारादेशो भवति ॥ जनैचि प्रादुर्भावे । जत्रुः शरीरावयवो मेघो घर्मावसानं च ॥ हनंक् हिंसागत्योः । हत्रुर्हिंस्रः ॥ शद्लृ शातने । शत्रू रिपुः । बाहुलकात्तादेशस्य विकल्पे । शद्रुः पुरुषः ॥ ऋंक् गतौ । अत्रुः क्षुद्रजन्तुः ॥ ८०९ ॥

श्मनः शीङो डित् ॥ ८१० ॥

श्मन् पूर्वात् शीङ्क् स्वप्ने । इत्यस्माड्डिद्रुः प्रत्ययो भवति ॥ श्मश्रुर्मुखलोमानि ॥ ८१० ॥

शिग्रुगेरुनमेर्वादयः ॥ ८११ ॥

शिग्र्वादयः शब्दा रुप्रत्ययान्ता निपात्यन्ते ॥ शिंगट् निशाने । किद्गोन्तश्च । शिग्रुः शोभाञ्जनको हरितकविशेषश्च ॥ गिरतेरेच्च ॥ गेरुर्धातुः ॥ नमेर्नञ्पूर्वस्य मयतेर्वा । एच्चान्तः । नमेरुर्देववृक्षः ॥ आदिग्रहणादन्येपि ॥ ८११ ॥

कटिकुट्यर्तेररुः ॥ ८१२ ॥

एभ्योरुः प्रत्ययो भवति ॥ कटे वर्षावरणयोः । कटरुः शकटम् ॥ कुटत् कौटिल्ये । कुटरुः पक्षिविशेषो मर्कटो वृक्षो वर्धकिश्च ॥ कुटादित्वान्न गुणः ॥ ऋंक् गतौ । अररुरसुर आयुधं मण्डलं च ॥ ८१२ ॥

कर्केरारुः ॥ ८१३ ॥

कर्केः सौत्रादारुः प्रत्ययो भवति ॥ कर्कारुः क्षुद्रचिर्भिटी ॥ ८१३ ॥

उर्वेरादेरूदेतौ च ॥ ८१४ ॥

उर्वै हिंसायाम् । इत्यस्मादारुः प्रत्ययो भवत्यादेश्च ऊकार एकार आदेशौ भवतः ॥ ऊर्वारुः कटुचिर्भिटी ॥ एर्वारुश्चारुचिर्भिटी ॥ ८१४ ॥

कृपिक्षुधिपीकुणिभ्यः कित् ॥ ८१५ ॥

एभ्यः किदारुः प्रत्ययो भवति ॥ कृपौङ् सामर्थ्ये । कृपारुर्दयाशीलः ॥ क्षुधंच् बुभुक्षायाम् । क्षुधारुः क्षुधमसहमानः । लत्वे । कृपालुः । क्षुधालुः ॥ पीङ्च् पाने । पियारुर्वृक्षः ॥ कुणत् शब्दोपकरणयोः । कुणारुर्वनस्पतिः ॥ ८१५ ॥

श्यः शीत च ॥ ८१६ ॥

श्यैङ् गतौ । इत्यस्मादारुः प्रत्ययो [भव]त्यस्य च शीत इत्यादेशो भवति ॥ शीतारुः शीतासहः । लत्वे । शीतालुः ॥ ८१६ ॥

तुम्बेरुरुः ॥ ८१७ ॥

तुबु अर्दने । इत्यस्मादुरुः प्रत्ययो भवति ॥ तुम्बुरुर्गन्धर्वो गन्धद्रव्यं च ॥ ८१७ ॥

कन्देः कुन्द च ॥ ८१८ ॥

कदु रोदनाह्वानयोः । इत्यस्मादुरुः प्रत्ययो [भव]त्यस्य च कुन्द इत्यादेशो भवति ॥ कुन्दुरुः सल्लकीनिर्यासः ॥ ८१८ ॥

चमेरूरुः ॥ ८१९ ॥

चमू अदने । इत्यस्मादूरुः प्रत्ययो भवति ॥ चमूरुश्चित्रकः ॥ ८१९ ॥

शीङो लुः ॥ ८२० ॥

शीङ्क् स्वप्ने । इत्यस्माल्लुः प्रत्ययो भवति ॥ शेलुः श्लेष्मातकः ॥८२०॥

पीङः कित् ॥ ८२१ ॥

पींङ्च् पाने । इत्यस्मात्किल्लुः प्रत्ययो भवति ॥ पीलुर्हस्ती वृक्षश्च॥८२१॥

लस्जीर्ष्यशलेरालुः ॥ ८२२ ॥

एभ्य आलुः प्रत्ययो भवति ॥ ओलस्जैति व्रीडे । लज्जालुर्लज्जनशीलः ॥ ईर्ष्य ईर्ष्यार्थः । ईर्ष्यालुरीर्ष्याशीलः ॥ शल गतौ । शलालुर्वृक्षावयवः ॥८२२॥

आपोप् च ॥ ८२३ ॥

आप्लृंट् व्याप्तौ । इत्यस्मादालुः प्रत्ययो [भव]त्यस्य च अप् इत्यादेशो भवति ॥ अपालुर्वायुः ॥ ८२३ ॥

गूहलुगुग्गुलुकमण्डलवः ॥ ८२४ ॥

एत आलुप्रत्ययान्ता निपात्यन्ते ॥ गूहतेर्ह्रस्वश्च प्रत्ययादेः । गूहलुर्ऋषिः॥ गुंङ् शब्दे । अस्यादेर्गुग्गुर्लोपश्च प्रत्ययादेः । गुग्गुलुर्वृक्षविशेषोऽश्वश्च ॥ कम्पूर्वादनितेर्डोन्तो ह्रस्वश्च प्रत्ययादेः । कमण्डलुरमत्रम् ॥ ८२४ ॥

पृः शुः ॥ ८२५ ॥

पॄश् पालनपूरणयोः । इत्यस्मात् शुः प्रत्ययो भवति ॥ पर्शुर्वङ्क्रिसंज्ञं वक्रास्थि ॥ ८२५ ॥

मस्जीष्यशिभ्यः सुक् ॥ ८२६ ॥

एभ्यः कित्सुः प्रत्ययो भवति ॥ टुमस्जोंत् शुद्धौ । मस्जेः स इति नोन्तः । मङ्क्षुर्मुनिः ॥ इषश् आभीक्ष्ण्ये । इक्षुर्गुडादिप्रकृतिः ॥ अशौटि व्याप्तौ । अक्षुः समुद्रो वमश्च ॥ ८२६ ॥

तॄपलिमल्लेरक्षुः ॥ ८२७ ॥

एभ्योक्षुः प्रत्ययो भवति ॥ तॄ प्लवनतरणयोः । तरक्षुः श्वापदविशेषः ॥ पल गतौ । मलि धारणे । पलक्षुर्मलक्षुश्च वृक्षः ॥ ८२७ ॥

उलेः कित् ॥ ८२८ ॥

उल दाहे । इत्यस्मात्सौत्रात्किदक्षुः प्रत्ययो भवति ॥ उलक्षुस्तृणजातिः ॥ ८२८ ॥

कृषिचमितनिधन्यन्दिसर्जिखर्जिभर्जिलस्जीर्ष्यिभ्य ऊः ॥ ८२९ ॥

एभ्य ऊः प्रत्ययो भवति ॥ कृषींत् विलेखने । कर्षूः कुल्याङ्गारः परिखा गर्तश्च ॥ चमू अदने । चमूः सेना ॥ तनूयी विस्तारे । तनूः शरीरम् ॥ धन शब्दे । धन धान्ये सौत्रो वा । धनूर्धान्यराशिर्ज्या वरारोहा च स्त्री ॥ अदु बन्धने । अन्दूः पादकटकः ॥ सर्ज अर्जने । सर्जूर [र्जुः] क्षारो वनस्पतिर्वणिक् च ॥ खर्ज मार्जने च । खर्जूः कण्डूर्विद्युच्च ॥ भृजैङ् भर्जने । भ्रस्जींत् पाके वा । भर्जूर्यवविकारः ॥ ओलस्जैति व्रीडे । लज्जूर्लज्जालुः ॥ ईर्ष्य ईर्ष्यार्थः । ईर्ष्यूरीर्ष्यालुः ॥८२९॥

फलेः फेल् च ॥ ८३० ॥

फल निष्पत्तौ । इत्यस्मादूः प्रत्ययो भवति धातोश्च फेल् इत्यादेशो भवति ॥ फेलूर्होमविशेषः ॥ ८३० ॥

कषेर्ण्डछौ च षः ॥ ८३१ ॥

कष हिंसायाम् । इत्यस्मादूः प्रत्ययो भवति षकारस्य च ण्डश्छश्चादेशौ भवतः ॥ कण्डूः कच्छूश्च पामा ॥ ८३१ ॥

वहेर्ध च ॥ ८३२ ॥

वहीं प्रापणे । इत्यस्मादूः प्रत्ययो [भवति] धकारश्चान्तादेशो भवति ॥ वधूः पतिमुपसंपन्ना कन्या जाया च ॥ ८३२ ॥

मृजेर्गुणश्च ॥ ८३३ ॥

मृजौक् शुद्धौ । इत्यस्मादूः प्रत्ययो [भवति] गुणश्चास्य भवति ॥ मर्जूः

शुद्धी रजको नद्यास्तीरं शिला च ॥ गुणे सिद्धे गुणवचनमकारस्य वृद्धिबाधनार्थम् ॥ ८३३ ॥

अजेर्जोन्तश्च ॥ ८३४ ॥

अज क्षेपणे च । इत्यस्माद्दूः प्रत्ययो [भवति] जकारश्चान्तो भवति ॥ अञ्जूर्जननी ॥ ८३४ ॥

कसिपद्यर्त्यादिभ्यो णित् ॥ ८३५ ॥

एभ्यो णिदूः प्रत्ययो भवति ॥ कस गतौ । कासूः शक्तिर्नामायुधं वाग्विकलो बुद्धिर्व्याधिर्विकला च वाक् ॥ पदिँच् गतौ । पादूः पादुका ॥ ऋक् गतौ । आरूर्वृक्षविशेषः कच्छूर्गतिः पिङ्गलश्च ॥ आदिग्रहणात् कचतेः । काचूः । शलतेः । शालूरित्यादयोऽपि ॥ ८३५ ॥

अणेर्डोन्तश्च ॥ ८३६ ॥

अणेर्धातोर्णिदूः प्रत्ययो भवति डश्चान्तो भवति ॥ अण शब्दे । आण्डूर्जलभृङ्गारः ॥ ८३६ ॥

अडो ल च वा ॥ ८३७ ॥

अड उद्यमे । इत्यस्माण्णिदूः प्रत्ययो भवति लकारश्चान्तादेशो वा भवति ॥ आलूर्भृङ्गारः करकश्च ॥ आडूर्दर्वी टिट्टिभो वनस्पतिर्जलाधारभूमिः पादभेदनं च ॥ ८३७ ॥

नञो लम्बेर्नलुक् च ॥ ८३८ ॥

नञ्पूर्वात् लबुङ् अवस्रंसने च । इत्यस्माण्णिदूः प्रत्ययो भवति नकारस्य च लुग्भवति ॥ अलाबूस्तुम्बी ॥ ८३८ ॥

कफादीरेर्ले च ॥ ८३९ ॥

कफपूर्वात् ईरिक् गतिकम्पनयोः । इत्यस्मादूः प्रत्ययो भवति लश्चान्तादेशो भवति ॥ कफेलूः श्लेष्मातको यवलाजा मधुपर्कं छादिषेयं च तृणम् ॥ ८३९ ॥

ऋतो रत च ॥ ८४० ॥

ऋत घृणागतिस्पर्धेषु । इत्यस्मादूः प्रत्ययो [भवति] रत इति चास्यादेशो भवति ॥ रतूर्नदीविशेषः सत्यवाग्दूतः कृमिविशेषश्च ॥ ८४० ॥

दृभिचपेः स्वरान्नोन्तश्च ॥ ८४१ ॥

आभ्यामूः प्रत्ययो भवति स्वराच्च परो नोन्तो भवति ॥ दृभैत् ग्रन्थे । दृन्भूः सर्पजातिर्वनस्पतिर्वज्रो मन्थकारो दर्भणं च । बाहुलकान्नकारस्य ञ्णां धुट्वर्गेन्त्योपदान्त इति न भवति ॥ चप सान्त्वने । चम्पूः कथाविशेषः ॥ ८४१ ॥

धृषेर्दिधिषदिधीषौ च ॥ ८४२ ॥

ञिधृषाट् प्रागल्भ्ये । इत्यस्मादूः प्रत्ययो [भवति] दिधिष् दिधीष् इत्येतावादेशावस्य भवतः ॥ दिधिषूर्ज्यायस्याः पूर्वपरिणीता पुंश्चली च ॥ दिधीषूरूढायाः कनिष्ठाया अनूढा ज्येष्ठा पुनर्भूराहुतिश्च ॥ ८४२ ॥

भ्रमिगमितनिभ्यो डित् ॥ ८४३ ॥

एभ्यो डिदूः प्रत्ययो भवति ॥ भ्रमूच् अनवस्थाने । भ्रूरक्ष्णोरुपरि रोमराजिः ॥ गम्लृं गतौ । अग्रे गच्छति । अग्रेगूः पुरःसरः ॥ तनूयी विस्तारे । कुत्सितं तन्यते । कुतूश्चर्ममयमावपनम् ॥ ८४३ ॥

नृतिशृधिरुषिकुहिभ्यः कित् ॥ ८४४ ॥

एभ्यः किदूः प्रत्ययो भवति ॥ नृतैच् नर्तने । नृतूर्नर्तकः कृमिजातिः प्लवः प्रतिकृतिश्च ॥ शृधूङ् शब्दकुत्सायाम् । शृधूः शर्धनः कृमिजातिरपानं बलिश्च दानवः॥ रुषच् रोषे । रुषूर्भर्त्सकः ॥ कुहणि विस्मापने । कुहूरमावास्या ॥ ८४४॥

तॄखडिभ्यां डूः ॥ ८४५ ॥

आभ्यां डूः प्रत्ययो भवति ॥ तॄ प्लवनतरणयोः । तर्डूर्द्रोणी प्लवः परिवेषणभाण्डं च ॥ खडण् भेदे । खड्डूर्बालानामुपकरणं स्त्रीणां पादाङ्गुष्ठाभरणं च ॥ ८४५ ॥

तॄदॄभ्यां दूः ॥ ८४६ ॥

आभ्यां दूः प्रत्ययो भवति ॥ तॄ प्लवनतरणयोः । तर्दूर्दर्वी ॥ दॄश् [विदारणे]। दर्दूः कुष्ठभेदः ॥ ८४६ ॥

कमिजनिभ्यां बूः ॥ ८४७ ॥

आभ्यां बूः प्रत्ययो भवति ॥ कमूङ् कान्तौ । कम्बूर्भूषणमादर्शत्सरुः कुरुविन्दश्च ॥ जनैचि प्रादुर्भावे । जम्बूर्वृक्षजातिः ॥ ८४७ ॥

शकेरन्धूः ॥ ८४८ ॥

शकॢट् शक्तौ । इत्यस्मादन्धूः प्रत्ययो भवति ॥ शकन्धूर्वनस्पतिर्दैवताविशेषश्च ॥ ८४८ ॥

कृगः कादिः ॥ ८४९ ॥

डुकृंग् करणे । इत्यस्मात्ककारादिरन्धूः प्रत्ययो भवति ॥ कर्कन्धूर्बदरी व्रणं यवलाजा मधुपर्कौ विष्टम्भश्च ॥ ८४९ ॥

योरागूः ॥ ८५० ॥

युक् मिश्रणे । इत्यस्मादागूः प्रत्ययो भवति ॥ यवागूर्द्रवौदनः ॥ ८५० ॥

काच्छीङो डेरूः ॥ ८५१ ॥

कपूर्वात् शीङ्क् स्वप्ने । इत्यस्माड्डिदेरूः प्रत्ययो भवति ॥ कशेरूः कन्द-विशेषो वीरुच्च ॥ ८५१ ॥

दिव ऋः ॥ ८५२ ॥

दिवूच् क्रीडादौ । इत्यस्मादृः प्रत्ययो भवति ॥ देवा देवरः पितृव्यश्चय-मिश्च ॥ ८५२ ॥

सोरसेः ॥ ८५३ ॥

सुपूर्वात् असूच् क्षेपणे। इत्यस्मादृः प्रत्ययो भवति॥ स्वसा भगिनी॥८५३॥

नियो डित् ॥ ८५४ ॥

णींग् प्रापणे । इत्यस्माड्डिदृः प्रत्ययो भवति ॥ ना पुरुषः ॥ ८५४ ॥

सव्यात्स्थः ॥ ८५५ ॥

सव्यपूर्वात् ष्ठां गतिनिवृत्तौ । इत्यस्माड्डिदृः प्रत्ययो भवति ॥ सव्यष्ठा सारथिः ॥ ८५५ ॥

यतिननन्दिभ्यां दीर्घश्च ॥ ८५६ ॥

यतेः नञ्पूर्वात् नन्देश्च ऋः प्रत्ययो [भव]त्यनयोश्च दीर्घो भवति ॥ यतैङ् प्रयत्ने । याता पतिभ्रातृभगिनी देवरभार्या ज्येष्ठभार्या च ॥ टुनदु समृद्धौ। ननान्दा भर्तृभगिनी ॥ नखादित्वान्नञोन्न भवति ॥ ८५६ ॥

शासिशंसिनीरुक्षुहृभृधृमन्यादिभ्यस्तृः ॥ ८५७ ॥

एभ्यस्तृः प्रत्ययो भवति ॥ शासूक् अनुशिष्टौ । शास्ता गुरू राजा च। प्रशास्ता राजर्त्विक् च ॥ शंसू स्तुतौ च । शंस्ता स्तोता ॥ णींग् प्रापणे । नेता सारथिः ॥ रुक् शब्दे । रोता मेघः ॥ टुक्षुक् शब्दे । क्षोता मुसलम् ॥ हृंग् ह-रणे । हर्ता चौरः ॥ टुडुभृंग्क् पोषणे च । भर्ता पतिः ॥ धृंङ् अवध्वंसने ॥ धर्ता धर्मः ॥ मनिच् ज्ञाने । मन्ता विद्वान्प्रजापतिश्च ॥ आदिग्रहणात् उपद्रष्टर्त्वि-क् । विशस्ता घातक इत्यादयोपि ॥ ८५७ ॥

पातेरिच्च ॥ ८५८ ॥

पांक् रक्षणे । इत्यस्मात्तृः प्रत्ययो भवति धातोश्च इकारान्तादेशो भवति ॥ पिता जनकः ॥ ८५८ ॥

मानिभ्राजेर्लुक् च ॥ ८५९ ॥

आभ्यां तृः प्रत्ययो [भवति] लुक् चान्तस्य भवति ॥ मानि पूजायाम् । माता जननी ॥ भ्राजि दीप्तौ । भ्राता सोदर्यः ॥ ८५९ ॥

जाया मिगः ॥ ८६० ॥

जाशब्दपूर्वात् डुमिंग्ट् प्रक्षेपणे । इत्यस्मात्तृः प्रत्ययो भवति ॥ जायां प्रजायां मिन्वन्ति तमिति जामाता दुहितृपतिः ॥ ८६० ॥

आपोप् च ॥ ८६१ ॥

आप्लृट् व्याप्तौ । इत्यस्मात्तृः प्रत्ययो भवत्यप् चास्यादेशो [भवति] ॥ अप्ता यज्ञोग्निश्च ॥ ८६१ ॥

नमेः प् च ॥ ८६२ ॥

णमं प्रह्वत्वे । इत्यस्मात्तृः प्रत्ययो भवति पकारश्चान्तादेशो भवति ॥ नप्ता दुहितुः पुत्रस्य वा पुत्रः ॥ ८६२ ॥

हुपूद्गोन्नीप्रस्तुप्रतिहृप्रतिप्रस्थाभ्य ऋत्विजि ॥ ८६३ ॥

एभ्य ऋत्विज्यभिधेये तृः प्रत्ययो भवति ॥ हुंक् दानादनयोः । होता ॥ पूग्श् पवने । पोता ॥ गैं शब्दे । णींग् प्रापणे । उत्पूर्वः । उद्गाता । उन्नेता ॥ ष्टुंग्क् स्तुतौ । प्रपूर्वः । प्रस्तोता ॥ हृंग् हरणे । प्रतिपूर्वः । प्रतिहर्ता ॥ ष्ठां गतिनिवृत्तौ । प्रति[प्र]पूर्वः । प्रतिप्रस्थाता ॥ एत ऋत्विजः ॥ ८६३ ॥

नियः षादिः ॥ ८६४ ॥

णींग् प्रापणे । इत्यस्मात् षकारादिस्तृः प्रत्ययो भवत्यृत्विज्यभिधेये ॥ नेष्टर्त्विक् ॥ ८६४ ॥

त्वष्टृक्षत्तृदुहित्रादयः ॥ ८६५ ॥

एते तृप्रत्ययान्ता निपात्यन्ते ॥ त्विषेरितोच्च । त्वष्टा देववर्धकिः प्रजापतिरादित्यश्च ॥ क्षद खदने । इति सौत्रः । क्षत्ता नियुक्तोविनीतो दौवारिको मुसलः पारशवो रुद्रः सारथिश्च ॥ दुहेरिट् किच्च । दुहिता तनया ॥ आदिग्रहणादन्येपि ॥ ८६५ ॥

रातेर्डैः ॥ ८६६ ॥

राँक् दाने । इत्यस्माड्डैः प्रत्ययो भवति ॥ राः द्रव्यम् । रायौ । रायः ॥ ८६६ ॥

द्युगमिभ्यां डोः ॥ ८६७ ॥

आभ्यां डिदोः प्रत्ययो भवति ॥ द्युंक् अभिगमे । द्यौः स्वर्गोन्तरिक्षं च ॥ गमॢं गतौ । गौः पृथिव्यादि ॥ ८६७ ॥

ग्लानुदिभ्यां डौः ॥ ८६८ ॥

आभ्यां डिदौः प्रत्ययो भवति ॥ ग्लैं हर्षक्षये । ग्लौश्चन्द्रो व्याधितः शरीरग्लानिश्च ॥ णुदंत् प्रेरणे । नौर्जलतरणम् ॥ ८६८ ॥

तोः क्किक् ॥ ८६९ ॥

तुंक् वृत्त्यादौ । इत्यस्मात्क्किक् प्रत्ययो भवति । ककारः कित्कार्यार्थ इकार उच्चारणार्थः ॥ तुक् अपत्यम् ॥ ८६९ ॥

द्रागादयः ॥ ८७० ॥

द्राक् इत्यादयः शब्दाः क्किक्प्रत्ययान्ता निपात्यन्ते ॥ द्रवतेरा च द्राक् शीघ्रम् ॥ एवं सरतेः । स्राक् स एवार्थः ॥ इयर्तेरर्वादेशश्च । अर्वागचिरन्तनम् ॥ आदिग्रहणादन्येपि ॥ ८७० ॥

स्रोश्चिक् ॥ ८७१ ॥

स्रुं गतौ । इत्यस्माच्चिक् प्रत्ययो भवति ॥ स्रुग् जुहूप्रभृत्यग्निहोत्रभाण्डम् । स्रुचौ । स्रुचः ॥ इकार उच्चारणार्थः ककारः कित्कार्यार्थः ॥ ८७१ ॥

तनेड्वच् ॥ ८७२ ॥

तनूयी विस्तारे । इत्यस्माड्ड्वच् प्रत्ययो भवति ॥ त्वक् शरीरादिवेष्टनम् ॥ ८७२ ॥

पारेरज् ॥ ८७३ ॥

पारण् कर्मसमाप्तौ । इत्यस्मादज् प्रत्ययो भवति ॥ पारक् प्राकारः शाकविशेषः सुवर्णं रत्नं च । पारजौ । पारजः ॥ ८७३ ॥

ऋधिप्रथिभिषिभ्यः कित् ॥ ८७४ ॥

एभ्यः किदज् प्रत्ययो भवति ॥ ऋधूच् वृद्धौ । ऋधक् समीपवाच्यव्ययम् ॥ प्रथिष् प्रख्याने । निर्देशादेव प्वृत् । पृथग्नानार्थेऽव्ययम् ॥ भिषः सौत्रः । भिषग्वैद्यः । भिषजौ । भिषजः ॥ ८७४ ॥

भृपणिभ्यामिज् भुरवणौ च ॥ ८७५ ॥

भृपणिभ्यामिज् प्रत्ययो भवति यथासंख्यं च भुर वण इत्यादेशौ भवतः ॥ भृंग् भरणे । भुरिग्बाहुः शब्दो भूमिर्वायुरेकाक्षराधिकपादं चर्कछन्दः ॥ पणि व्यवहारस्तुत्योः । वणिग्वैदेहिकः ॥ ८७५ ॥

वशेः कित् ॥ ८७६ ॥

वशक् कान्तौ । इत्यस्मात्किदिज् प्रत्ययो भवति ॥ उशिक्कान्त उशीरमग्निर्गौतमश्चर्षिः ॥ ८७६ ॥

लङ्घेरट् नलुक् च ॥ ८७७ ॥

लघुङ् गतौ । इत्यस्मादट् प्रत्ययो [भवति] नलोपश्चास्य भवति ॥ लघड्वायुर्लघु च शकटम् ॥ ८७७ ॥

सर्तेरड् ॥ ८७८ ॥

सृं गतौ । इत्यस्मादड् प्रत्ययो भवति ॥ सरड् वृक्षविशेषो मेघ उष्ट्रजातिश्च ॥ ८७८ ॥

ईडेरविड् ह्रस्वश्च ॥ ८७९ ॥

ईडिक् स्तुतौ । इत्यस्मादविड् प्रत्ययो [भवति] ह्रस्वश्चास्य भवति ॥ इडविड्विश्रवाः ॥ ८७९ ॥

क्विपि म्लेछश्च वा ॥ ८८० ॥

म्लेछेरीडेश्च क्विपि प्रत्यये वा ह्रस्वो भवत्यत एव वचनात्क्विप् च ॥ म्लेछ अव्यक्तायां वाचि । म्लिट् । म्लेट् । उभयं म्लेच्छजातिः ॥ इड् स्वामी मेदिनी च ॥ ईड् स एव ॥ ८८० ॥

तृपेः कत् ॥ ८८१ ॥

तृपौच् प्रीतौ । इत्यस्मात्किदत् प्रत्ययो भवति ॥ तृपच्चन्द्रः समुद्रस्तृणभूमिश्च ॥ ८८१ ॥

संश्चद्वेहत्साक्षादादयः ॥ ८८२ ॥

एते कत्प्रत्ययान्ता निपात्यन्ते ॥ सम्पूर्वात् चिनोतेर्डित्समो मकारस्यानुस्वारपूर्वः शकारश्च । संश्चदध्वर्युः कुहकश्च । अनुस्वारं नेच्छन्त्येके । सश्चत्कुहकः ॥ विपूर्वात् हन्तेर्डिद्वश्च गुणः । विहन्ति गर्भमिति वेहद्गर्भघातिन्यप्रजा च्यनड्वांश्च ॥ सम्पूर्वात् ईक्षतेः साक्षाभावश्च । साक्षात्समक्षमित्यर्थः ॥ आदिग्रहणात् रेहत् । चियत् । पुरीतदादयोऽपि ॥ ८८२ ॥

पटच्छपदादयोनुकरणाः ॥ ८८३ ॥

पटदित्यादयः कत्प्रत्ययान्ता निपात्यन्तेनुकरणशब्दाश्चैते ॥ पट गतौ। पटत् ॥ छुपंत् [सं]स्पर्शे। उकारस्याकारः। छपत् ॥ पत्लृ गतौ। पतत् ॥ शॄश् हिंसायाम्। शरत् ॥ शल गतौ। शलत् ॥ खट काङ्क्षे। खटत् ॥ दहेः प च। दपत् ॥ डिपेः। डिपत् ॥ खनते रश्च। खरत् ॥ खादेः। खादत् ॥ सर्व एते कस्यचिद्विशेषस्य श्रुतिप्रत्यासत्त्यानुकरणशब्दाः। अनुकरणमपि हि साध्वेव कर्तव्यं न यत्किंचिद्यथानक्षरमिति शिष्टाः स्मरन्ति ॥ ८८३ ॥

द्रुहिवृहिमहिपृषिभ्यः कतृः ॥ ८८४ ॥

एभ्यः किदतृः प्रत्ययो भवति ॥ द्रुहौच् जिघांसायाम्। द्रुहन्ग्रीष्मः ॥ वृह वृद्धौ। वृहन्प्रवृद्धः। बृहती छन्दः ॥ मह पूजायाम्। महान्पूजितो विस्तीर्णश्च ॥ महान्तौ। महान्तः। महती ॥ पृषू सेचने। पृषत्तन्त्वं जलबिन्दुश्चित्रवर्णजातिर्दध्युपसिक्तमाज्यं च। पृषती मृगी। स्थूलपृषतीमालभेत ॥ ऋकारो ङ्यर्थः ॥ ८८४ ॥

गमेर्डिद्वे च ॥ ८८५ ॥

गम्लृं गतौ। इत्यस्मात्कतृप्रत्ययो डिद्भवति द्वे चास्य रूपे भवतः ॥ जगत्स्थावरजङ्गमो लोकः। जगती पृथिवी ॥ ८८५ ॥

भातेर्डवतुः ॥ ८८६ ॥

भांक् दीप्तौ। इत्यस्माड्डिदवतुः प्रत्ययो भवति ॥ भवान्। भवन्तौ। भवन्तः ॥ उकारो दीर्घत्वादिकार्यार्थः ॥ ८८६ ॥

हृसृरुहियुषितडिभ्य इत् ॥ ८८७ ॥

एभ्य इत् प्रत्ययो भवति ॥ हृंग् हरणे। हरिद्धरितो वर्णः ककुब् वायुर्मृगजातिरश्वः सूर्यश्च ॥ सृं गतौ। सरिन्नदी ॥ रुहं जन्मनि। रोहिद्वीरुत्प्रकारो मत्स्यः सूर्योग्निर्मृगो वर्णश्च ॥ युषः सौत्रः। योषति गच्छति पुरुषमिति योषित्स्त्री ॥ तडण् आघाते। तडिद्विद्युत् ॥ ८८७ ॥

उदकात् श्वेर्डित् ॥ ८८८ ॥

उदकपूर्वात् ट्वोश्वि गतिवृद्ध्योः। इत्यस्माड्डिदित् प्रत्ययो भवति ॥ उदकेन श्वयति। उदश्वित्तक्रम् ॥ नाम्न्युत्तरपदस्य चेत्युदकस्य उदभावः ॥ ८८८ ॥

म्र उत् ॥ ८८९ ॥

मृंत् प्राणत्यागे। इत्यस्मादुत् प्रत्ययो भवति ॥ मरुद्वायुर्देवो गिरिशिखरं च ॥ ८८९ ॥

ग्रो मादिर्वा ॥ ८९० ॥

गॄत् निगरणे । इत्यस्मादुत् प्रत्ययो भवति स च मकारादिर्वा भवति ॥ गर्मुच्छब्द आदित्यो मधुमक्षिका तक्षा तृणं सुवर्णं च ॥ गरुद्गर्होजगरो मरकतमणिर्वेगस्तेजस्तां वर्तिश्च ॥ ८९० ॥

शक ऋत् ॥ ८९१ ॥

शकॢंट् शक्तौ । इत्यस्मादृत् प्रत्ययो भवति ॥ शकृत्पुरीषम् ॥ ८९१ ॥

यजेः क च ॥ ८९२ ॥

